The seventh and last Canto of 23 verses opens with an account of Suryaraj of Shringarapur a Kṣatriya family ruling there since olden times The Suryarao was helped by another family called Shirkas who employed as their family priest a Brahman named Keshav Bhat Upadhye He was introduced to Raghunath Pandit one of Shivaji s ministers Therefore Shivaji conquered both the Surves and the Shirkes and forced them into his service In due course Raghunath Pandit and Shivaji died and King Shambhu began to rule the country Shambhu appointed Keshav Bhat to the post of Panditarai a position which enabled him to give large charities to many Brahmans and set right abuses that had crept into religious practices

---

Section V

Shambhuji s Sacrifice to Kali

Cantos 1 5

Canto 1 of 77 verses begins with Shambhuji giving instructions to make preparations for performing a sacrifice in consonance with the advice tendered by Śivayogi The King employed competent agents for the vari ous tasks such as the fetching of holy waters from different places and inviting learned and expert representatives versed in the subject Thus in due course a large concourse of priests workers and mechanics gathered at Shringarapur and they were all respectfully received by the King He re quested them all to attend to every detail with scrupulous care and leave no chance for any error or omission to creep in All the assembled men work ed zealously and carried out the King s behests in minute detail Every care was taken to propitiate the Goddess Kali The priests assured Shambhuji that his highest wish would now be fulfilled Buildings were erected festoons and decorations were made in profusion Flowers and trees were properly set in order The King sent special messengers to invite chiefs and princes from foreign parts to grace the occasion Traders merchants musicians dancing girls and professionals of every description gathered to witness the ceremony

The second Canto containing 87 verses describes the several stages of the main sacrifice *viz* the King s taking the vow after an auspicious bath then his selection of the chief officiating priest and preparations for a grand dinner Deities were assigned for propitiating the nine planets and the various

form of cash, lands, horses, elephants, jewels, vehicles, clothes, rings, corn and maid servants Thus, Shambhuji's fame spread far and wide. He then had the final bath, put on his lustrous dress and dismissed the grand assemblage.

The fifth and last Canto of 84 verses describes the pregnancy of Shambhuji's queen Rājasā developing from month to month. The husband was highly gratified at this result and satisfied the peculiar cravings natural to an expectant mother He also prepared a suitable place for her confinement with all the necessary conveniences. He got ready expert physicians and competent nurses for rendering comfort to her when she would be a mother On an auspicious day she gave birth to a highly gifted son.

परमानन्दकाव्यम्

Section I

AN ACCOUNT OF THE BHONSALE FAMILY FROM SHAHAJI TO THE FLIGHT OF AKABAR TO PERSIA.

यद्यप्यन्यस्तनूजस्तरणिकुलमणेर्शभूपायुतोभूद्
गोप्ता सौभाग्यशाली प्रबलबल्युतो विज्वरो वैरिशै[श]ल्य ।
एतन्मध्ये तथापि प्रमथगविपते: प्रेमपात्र पवित्र
पुण्याश पुण्यशील समजनि रजनीनायक शाह एव ॥* ४

गौरीसर्वस्वभूत: सफलनृपशिरोधार्यमान्यैकमुद्रो
भक्त्याविर्भूतरुद्र परदलदलनो बद्धि[द्धि]सीमासमुद्र: ।
सत्कर्मा राजधर्मा स्थितिधृतिगतिभिर्ज्ञातधर्मावतार:
सार सर्वसहाया: समभवदतुल: साहसी शाहभूप: ॥ ५

यस्यानेकमहीमहेन्द्रसमरे मत्तेभकुम्भस्थले
विद्युद्भ्रान्तिकरी बभूव निभृता खड्गभ्रमिर्भास्वरा ।
आश्चर्य तु महत्त्वमङ्गलपरासृक्सङ्कलिता सती
जाता मङ्गलरूपिणी किल गले मालामला मौक्तिकी ॥ ६

कम्पन्ते चिकिरीया: शरणमनुसृता मैसुरीयास्तुरीया·
कारुण्यासिक्तमात्रप्रमुदितहृदया रायलीयास्तुरीया· ।
चञ्जीचञ्जापुरीया मधुरभणितिभिर्माथुरा नोद्धुरा स्यु:
शङ्कन्ते सेतुसस्था: समरविजयिन: शाहजीकासरसङ्गम् ॥ ७

कि ब्रूमश्चास्य भाग्य नियतिकृतिवशाद् द्रागजीरत्नयुक्तो
युक्तिप्रत्युक्तिरीत्या स्वयमिव सकले राजकार्ये धुरीण: ।
नि:शङ्क खड्गधाराग्रहणगरिमणि प्रोञ्ज्वलच्छैनिकाख्या
दिक्पाला: पातशाहा अपि समरविधौ यद्भुज प्रार्थयन्ति ॥ ८

पुत्रै: पौत्रैर्नरीनैरनुसृतपरमप्रेयसीभि प्रवीणै
क्रीडाभि: शोभिनीभि: प्रतिपदमनघद्वासरान्सौख्यसारान् ।
चश्चच्छ्रीचन्द्रमौलेश्चरणकमलयोर्मोदमग्न: सुलग्नो
याचित्त चञ्चरीकश्चलनयनयोर्नो निधि स्वीचकार ॥ ९

* The first three stanzas are missing

ब्रह्मण्यस्त्वद्वितीय प्रकृतिमुपगत शास्त्रसंस्कारशीला
ब्रह्मण्येऽप्यद्वितीये सुजनसरणिभिः पारमायात एव ।
तत्तादृक्पाण्डवेयप्रमुखनृपवरैश्चोपमेयोऽप्रमेयो
यातः श्रीरामजायाजनकनददतुर पुण्यभार जगत्याम् ॥ १०

उद्धृष्टाः समरे भटाः करिघटा प्रस्ताः करिभ्यः स्फुटाः
प्रोत्कृष्टाः किल कल्पपादपगुणा स्पष्टाः स्वय स्वीकृताः ।
सन्तुष्टैस्तरुणीजनैर्निवसता सङ्गीतशालान्तरे
सृष्टाः कामकलानिधे रसकला शिष्टाः प्रनष्टा अपि ॥ ११

गन्धर्वा इव गायकाः परिचराः प्रेष्या प्रवीणा इव
भाव्या क्षत्रधुरन्धरा इव धराधीशा इव प्रीतिदाः ।
सत्त्व सत्यसमाश्रयाः वणिग्जनाः ससारिणः सारिणः
सर्वे शाहमहीपतेः सुरसुहृत्साम्राज्यराज्ये बभुः ॥ १२

सर्वे सत्यपरायणाः सुकृतिन शुद्धीकृताः शासनाद्
ब्रह्मद्वेषसुरामहाप्रकरणजा वार्ता पुन स्यात् कथम् ।
किं वाच्य चरित तु शाहनृपतेश्चित्र विचित्र स्फुट
चक्र चौर्यकुलस्य येन सकल काशीजले मज्जनम् ॥ १३

गेह गेहमहो नु धान्यसदृशो राशिर्धनस्याभव-
च्चातुर्वर्ण्यमनन्तवैरिनिरत सम्यक् स्वधर्मे स्थिरम् ।
इत्थ शाहनृपेऽनुशासति महीं माहात्म्यमन्यादृश
दृष्टु चाख वसुन्धरेति च पद पृथ्व्या अभूत् सार्थकम् ॥ १४

आवाल्यात् बलवद्विरोधवलनात्स्वीय पद प्रोज्झित
तत्रापि प्रकटप्रतापधरणात्स्वाराज्यता नोज्झिता ।
य देश समुपाश्रित प्रवलधीः श्रीशाहभूमिपति
र्लोकैरेवमलोकि पूर्ववदसौ तद्देश एव प्रभुः ॥ १४

यद्यत्कार्यमुरीकराति बहुधा वायुप्रवद्धे पथि
प्रीत्या तत्परिपूरयत्यतितरा भक्त्या भवानीपतिः ।
राजानो बहुशो बभूवुरपरे प्राग्दाक्षिणात्याः पर
श्रीमच्छाहनृपस्य केवलमहाराजाभिधा पप्रथे ॥ १६

एक व्याकरणं विना प्रविदितो नो धातुवादः क्वचित्
प्रावृट्कालमृते व्यलोकि न पुनर्मालिन्यमेवाम्बरे ।
आश्चर्यं विदमेव शाहमनसा सच्छास्त्रसंसेवने
सम्प्राप्तं तु मनुत्वमेव हि कथं नाणुःसमात्रं जहौ ॥ १६

वारं वारमहो नु वर्ण्यमतुलं किं तद्यशो निर्मलं
पारावारपरम्परोपरिसरेष्वाजन्मतः प्रस्थितम् ।
दृष्टे शाहमहीपतौ मतिमतामित्थं मतिः प्राभवद्
धात्रैकत्रभरीकृतः स्वभरितः सर्वो गुणानां गणः ॥ १७

तद्राज्ञो रजनीकरस्य ललिते ज्योत्स्नेव शोभावहे
द्वे भार्ये सुबभूवतुः शुभगुणे शोणाधरे शोभने ।
तत्राद्याऽभवदादरावदुकुलोत्तंसा जिजाम्बाभिधा
चान्या तन्महितान्वयायमहिता ख्याता तुकाम्बा तथा ॥ १८

धुर्यास्ता अपराः समाहृतगुणाः सङ्गीतसन्नामका
नार्योऽनार्यगुणोज्झिता बहुतरा आसन् परा प्रेयसि ।
तासां सन्ततिसन्ततिः समुदभूच्छोभाधरा सद्गुणा
सर्वा शाहमहीपतिं सुचरितैरानन्दयाञ्चक्रिरे ॥ १९

ज्येष्ठा श्रेष्ठगुणैर्युता सुरसरित्साधारणी धोरणी
नाम्नाऽत्र कनिष्ठतानुलसती निष्ठा कनिष्ठा क्वचित् ।
मुख्ये श्रीजनमण्डने नरपते राज्ञ्यावुभे निर्वृते
मुख्यापेक्षतया ययोरनितरामाज्ञा नरीनृत्यति ॥ २०

शम्भोः सारकथानुसारवशतः शम्भोः परं सद्गुणं
श्रीशम्भोश्चरणारविन्दनिरतं राजन्यधर्मोद्धुरम् ।
सा काले समजीजनद्गिरिसुता पुत्रं कुमारं यथा
धाम्नैवाकलितं शिवस्य परमप्रेष्ठं शिवाख्यं सुतम् ॥ २१

एकं पुत्रमसूत तुष्टमनसा तूर्णं तुकाम्बा ततो
जुष्टं दैवगुणैरनन्तविभवैर्भूजानिभारक्षमैः ।
राज्ञा राज्यविधौ तथापि बहुशो भाव्यं सुसम्भावितं
श्रीमच्छ्रीशिव एक एव हि कुलोद्धारीभवन् सम्भवी ॥ २२

यात्रो यद्यपि दधातु विदधत्सर्वं च मत्तागज
स्वर्गो गर्वभरेण वामनमना सर्वोपरि भ्राजते ।
शिक्षस्निग्धसुपाणिताङ्कुर इवोद्दामण्डलामादरद्
यान्यादेव यगानुगस्य सततं चापल्यमत्राभ्यसत् ॥ २३

प्रोक्त मन्त्रिवरै सुयुक्तिमधुर युक्त निजाम्राम्नया
मुक्त पूर्वसपत्निभावभरितैरम्भस्तुराम्भोत्तरे ।
राना रा यमतादिभिर्गभिया भ्रान्तद्रवस्यानया
पुण्यप्राप्ति समाहिता निजप्रिया तारामयण्य शिवम् ॥ २४

[illegible] मोहसुधामयुगन्त्रगगद्दौ नर्मद्रुमा
पुष्पा एव तुहष्टिका हृदि सदा यथु सुरगाणका ।
[illegible] प्रेक्षणमात्रत भयमुपाजग्मुतना यात्रा
स्वर्पैरव सुधासीरे शिवशिव शा[illegible] धगमाभरत् ॥ २५

सर्वाण्येव मदा महेन्द्रवदसौ यज्ञाभवद्वैरिणा
वर्माण्यप्रतिमानुगानि रचयन्नानाविधा यादरात् ।
निस नीतिविशारदे परिजने प्रोत्साहयुक्तं कृत
पारावारपरिप्लुतामपि शिवा विश्वम्भरामाप्नुयाद् ॥ २६

श्यामाम्या समरे जिता गणपरा विद्या पगाणा पुन
गोराभद्रपगस्तया प्रमृन्तिता वैणपुराधा रण्ण ।
वर्णाग्र यन्दीकृता पणटिताऽप्यारण्ठत कुण्ठिता
स्नत्रा नाम नर शिवस्य भुवि य पद्मान्तर नामत ॥ २७

सिध तैर्विजयाद्दशानितसद्धोगुम[illegible]
पद्माद्दीशगुणिगिरे पुण्यदि पूर्ण पग्गाभा रे ।
पुराम्नत सुवर्ना यहि[illegible] सदा [illegible]
[illegible] [illegible] मिता निरता पति ॥ २८

[illegible] निमर
[illegible] ।
[illegible]
[illegible] ॥ २९

सामन्तप्रमुखा सचन्द्रदलवीमुख्यादयो दुर्मुखा
दुर्दान्तास्तरसा धृता सहगृहाः कारागृहे स्थापिता ।
युद्धप्रारभणैः कृता यमपुरप्रास्थानिका केचन
भ्रष्टा केचिदनि[व]भ्रमन्त्यभिमराद्भीमे मराट्सङ्घवत् ॥ ३०

युद्ध शुद्धमधारि षट्दशसमाः प्रत्ता वरिष्ठा नगा
गत्वा दर्शनमाचचार सहसा दिल्लीश्वरस्याप्यहो ।
स्वीय राज्यमथो बभार सहसा स्वल्पैरहोभिः स्वय
चित्र चारुतर शिवस्य चरित को वाऽनुगन्तु क्षम ॥ ३१

नानादेशनिदेशधर्मनिपुणाश्छत्राधिनाथैरल
मान्या नामिकजस्य यस्य वितता नामावली पप्रथे ।
आश्चर्य सुमहत्प्रतापनिकरैर्जाज्वल्यमानोऽपि सन्
जात· श्रीशिवभूपतेश्च विषये दिल्लीश्वरोऽनीश्वर ॥ ३३

शाइस्तो कुतुपाभिधस्य विलसत्कौटिल्यवारानिधे
र्निस्मृत्याखिलराजनीतिरचना गत्वा ददौ दर्शनम् ।
श्रीमच्छ्रीशिवविक्रमार्कविहिता विश्वोपकारक्षमा
क्ष्मानाथ समनुक्रमेण सकला चर्या चरीचक्रमे ॥ ३४

प्राणा एव बहिश्चरा खलु सुरत्राणस्य ये सम्मता
ये ख्यातास्तु समस्तदेशविषये खाना खुरासानजा ।
ते खड्गेन शिवेन सम्भ्रमवशात्खण्डीकृता लुण्ठिता-
स्तेषामेव हि दण्डनेन शमते भूमण्डलाखण्डल ॥ ३४

येन त्वेकनिशि प्रसह्य सबलाप्यौरङ्गजेबस्य सा
सेना रावणसन्निभस्य भरिता युद्धाब्धिसन्तारिणी ।
स्तेनैवाशु घटीचतुष्टयमिव न्यक्कर्णवारीकृता
नौकेवोग्रभटैरदभ्रकपटैरान्दोलना दोलिता ॥ ३५

गर्भश्चेदिलभूपतेर्भृतिभरो वजीरवर्गस्य तु
त्रासो हिन्दुगणस्य द्रुत उतोत्कर्षोऽसितास्यात्मनाम् ।
शल्य श्रीतुलजाम्बिकाहृदयत सद्यो[क्षो]भ्यमाणे शिवे
निच्छूच्छ्वालनत पतत्पयजले किं किं भ्रमान्नापतत् ॥ ३६

विच्छूच्छालनिपातितः क्षितिभृता पट्टा कपाले हतो
घट्टाटोपभरात्तथापि तरसा पल्लङ्किकामग्रहीत् ।
पश्चात्क्लेशभरैरकृन्ति च शिरः कष्ट सुरा अनुवन्
कालस्याप्यफजल्लखानकलने कालो न सल्लक्ष्यते ॥ ३७

पूर्व मासचतुष्टयाद् हृदि जनास्ता दुर्दशा भेजिरे
किं भाव्य ह्यफजल्लखाननृपतेर्जाते मिलापे शिवे ।
द्वित्रैरेव शिवप्रसादभरितैर्दृष्ट क्षणैरद्भुत
विश्वव्यापि यश शिवस्य समभूद्विश्वैकभोग्योऽसुरः ॥ ३८

सम्पातादफजल्लरस्य तुळजासस्थानशालान्तरे
सन्तोषादुदभूदल किलिकिलाशब्दो महानद्भुत ।
तालोत्तालविमिश्रणाच्छिवनृपस्याश्चर्यसञ्जातना-
-सञ्जात करतालिनादलहर श्रीकालिकाया पुर ॥ ३९

कालुष्यन्तु खले समागतमथो मोहस्य मोहान्धता
मालिन्यस्य विकासता प्रतिहता क्रोधस्य लोभस्य च ।
तृष्णाख्या ललना विमर्दिततनुस्तत्राभवत्तत्क्षणात्
पापोऽप्यप्रतिभ शिवक्षितिभृता पापेऽफजल्ले हते ॥ ४०

सङ्क्रान्त किल कालसन्निभभटैरत्युद्भटैरुत्कट
प्रध्वस्त बलमस्फुटस्फुटतर सञ्ज्वाल्यमान क्रुधा ।
विश्रान्तस्पृगखर्वगर्वमहिमासर्वस्वसंस्थापक
सर्व रुधवनैर्व्यलोकि यमवत्ज्वालनीकाननम् ॥ ४१

देवा प्रापुरल हवींषि सुखिनो गोब्राह्मणा स्युर्यदा
शेषस्यापि शिरस्थधूरभिहता भूमण्डल निर्मलम् ।
त्रैलोक्यस्थितिसञ्चरत्सुकृतिसम्मत्या त्वदीय तदा
मान्य मानदवस्य नोऽभवदिद वीराग्रगण्य रणम् ॥ ४२

चञ्चच्च[विष्णुदेप ?] सतृष्ण एव नितरामासीत्पुरा प्रेमत
शम्भुस्नेहपराङ्मुखोऽप्यतितरा मूढो वरीवर्तते ।
तद्वद् दुष्टदिल्लीश्वरोऽपि निवसन् लग्नोऽस्ति युद्धोद्यमे
नो जानाति यथैव कालयवन काल शिरःस्थ स्वकम् ॥ ४३

सर्वेऽपि प्रतिपन्थिन प्रसरिता अन्तर्बहि स्था जना
जानीते जनतागतो जनपद का नो गतिर्भाविनी ।
प्रत्यूहप्रतियातिजातिशुभदा शम्भौ नृपे सर्वदा
शम्भुस्नेहपरम्परैव नितरा वर्वर्ति सर्वोपरि ॥ ४४

चञ्चचन्द्रकपालकुण्डलधरो वेतालतालोत्करै
स्तालोच्चैस्तिरयस्तरन्नतितरा तारुण्यलीला वहन् ।
नृत्य नृत्यविशारदोऽप्यभिनयन्मुद्राञ्जलीर्मण्डली
र्मन्द मण्डयति स्म मण्डलमथो देवो मृडानीपति ॥ ४५

शाम्यच्छ्रीतुरजाशिरोन्यफजलोत्साही विदेहीभवन्
विश्वव्यापितभक्तवत्सल इति प्रोद्यत्प्रवाही पुन ।
विश्वस्योद्धरण कृत कृतमिति प्रेम्णा सुरास्त्वभ्रुवन्
श्रीमद्गोशिवराशसङ्कटहरो हृद्य हरो नृत्यति ॥ ४६

हर्षोत्फुल्लविलोचनो निजजनोत्कर्ष सतर्ष वहन्
शार्वे चन्द्रकलाम्बुनिर्झरझरीधारानुसारानयन् ।
धारावाहिकया कयापि कलया लोकान्समुद्धारयन्
श्रीमच्छ्रीशिवराजवैभवविधौ मन्यो भवोऽभूत्क्षणात् ॥ ४७

एतस्मिन्समये निरस्तकुहका प्रेङ्खत्प्रतापोत्कटा
प्रेक्ष्यन्ते परित पुरस्तत इत प्रोद्यत्प्रतापोज्झिता ।
भेरीभाङ्कृतिसम्भ्रमेण भरिता श्यामायमाने वने
खड्गा खड्गिवरामामिलन्ति सुभटा कण्ठीरवोद्यत्स्वना ॥ ४८

राजानो बहवो धृता खलु .

बन्ध सुसिद्ध एव। अङ्कुरितवैरिभावान्त करणतया शम्भुसञ्ज्ञ प्रविष्टस्य पुरोहितसूनो किञ्चिद्वक्रिमभावो विभाव्यते पितु पुत्रस्य च। स्वस्य वासनानुबन्धानुबद्धसम्बन्धा अपि त्रय त्रिगुणात्मिका शरीरसम्पद प्रापुरेव सूचनामात्रप्रदर्शन विहितमत्र ग्रन्थगौरवभयाद्धैर्येणाऽलम्।

श्रीशम्भोश्चरणानुसेवनरतौ तौ दम्पती सर्वदा
तत्तत्काल उपागतान्बहुविधान्सम्पूजयन्तौ सुरान् ।
प्रेमोदेरमुपेयुषोरनुदिन स्वल्पैरहोभिस्तयो
शम्भु प्रादुरभूत्सुत शुभतर स्वामी कुमारप्रभ ॥ ५१

राज्य वृद्धिमुपागत बहुतर शौर्य शिवेनार्जित
कीर्तिर्दिक्षु दशस्वपि प्रसरिता प्रत्यक्षभूचन्द्रिका ।
शम्भोरद्भुतविक्रमस्य विशद श्रीविक्रमार्कानुग
विज्ञात सकलैर्जनैस्तु जनुषो माहात्म्यमन्यादृशम् ॥ ९२

राज्ञ शम्भुगुणान्विता बहुतरा स्युर्मामकीना सुता
इत्येव प्रतिवासर दृढतरा दुर्वासना सन्दधे ।
शम्भोस्तत्तपस प्रभावनशात शम्भु कृपैवानु कि
राजाराममिति प्रिय द्रुततर पुत्र द्वितीय ददौ ॥ ९३

शर्मिष्ठेव गरिष्ठगौरवभरा निष्ठावती सर्वदा
पत्यु पादसरोजसेवनसमारम्भैकनिष्ठा सती ।
जाता श्रीमहितान्वयेऽतिमहिता श्रीसोयराम्बा परा
राजारामसुतेन सम्भ्रमवती लोकैरलोकि स्फुटम् ॥ ९४

विष्वग्विदृ[द्रु]मसम्भवा व्रतविका विस्तारभाव गता
व्याप्नोत्येव हि विस्तृत विभुतर सिन्धु यथा सर्वत: ।
श्रीशम्भोरतिमानुषा गुणगणा लीनास्तदङ्केऽप्यहो
त सम्बन्धिन एव दु खनिचयैर्नानाविधैरावृणोत् ॥ ९५

तथापि राजा रमणीयरीति
कनिष्ठभावैर्भरितो जहौ किम् ।
ज्येष्ठे सुते शम्भुनरेन्द्रसञ्ज्ञिके
सन्ध्याविहीनस्तु[न तु] शिवार्चन यथा ॥ ९६

शिवस्य शम्भोरनुरागिणोरल
दिनेषु गच्छत्सु तयोरतिस्फुटम् ।
प्राचीनसस्कारविशेष आदौ
विरुद्धतामङ्कुरयाञ्चकार ॥ ९७

शम्भो शिवाराधनतत्परस्य
प्रसादचिन्ह्रीकृतकन्धरस्य ।
सापत्न्यभावो च्यवनान्यथा तथा
भवस्य भावो बलवत्तरोऽभूत् ॥ ९८

सैन्य न सङ्गे न धन प्रसङ्गे
मनोनुषङ्ग किल युद्धरङ्गे ।
एव प्रसक्तेऽपि च दु प्रसङ्गे
राज्यैकसङ्गे शिवभक्तिरङ्गे ॥ ५९

हेला कदर्थीकृतसिन्धुवेला
लीला कनिष्ठीकृतमन्त्रिखेला ।
शम्भोस्तदानी जगदम्बिकाया
निष्ठैव निष्ठा नयति स्म राज्ये ॥ ६०

श्रीमच्छ्रीशिवराजराजमुकुटालङ्कारचूडामणि
र्माहात्म्य निजमाप्रसार्य जगतीनाथेषु जाग्रत्प्रभम् ।
कैलासे दमनोत्सवाय गिरिशेनाकारितो नु स्वय
शीघ्र ससृतिनाशनाय महसामाद्य प्रतस्थे स्थलम् ॥ ६१

नीलासपर्या शिवलोकचर्या
कर्तु शिवे भूमिपतौ प्रयाते ।
मार्गोऽशिवोऽभून्निजसेवकाना
तथाऽपि शम्भु शिवराज्यमाप ॥ ६०

यन्त्र त्रिलोहात्मकमात्रिलोक्याऽऽ-
ख्यात स्वतन्त्रे गिरिशोक्ततन्त्रे ।
त्रियन्तृयन्त्रेऽखिलब्रह्मयन्त्रे
नियन्त्रणा यस्य नियन्त्रणास्ते ॥ ६१

युग्माम्बरा रक्षति वृत्तिचित्रे
चैत्रे सिते वत्सरकालयुक्तके[क्ते]* ।
काम्यातिथौ तत्कलशाभिषेक
काम चमत्कारततिश्चकार ॥ ६२

राजन्नेत्रनभोङ्गभूमिभरिते रौद्रादिते रौद्रके
माघे मासि सिते रथोत्सवदिने मुख्ये मुहूर्ते शुभे ।
शम्भुर्भूमिपतित्वदर्पसमये सिंहासने भ्राजते
सशोभच्छिवयोरभीतिसुस्फुरच्छत्रप्रभाभास्वरे ॥ ६३

* कालयुक्तसम्वत्सर is from April 1678 to April 1679

† Shivaji s date April 3rd रौद्र

अरयारण्यसङ्गेन पुरश्चरणसङ्गिना ।
कथित पूर्ववृत्तान्तश्छन्दोगामात्यमन्त्रिणा ॥ ६५

यद्गिरोक्त समागत्य गणेन शिवयो रह ।
तत्प्रकाशजमायात मर्म जन्मान्तरोद्भवम् ॥ ६६

तद्वश एव राजन्योऽप्यसौ प्राक्सम्बभूव ह ।
तेनार्यशिष्यसम्बन्ध सुसम्बद्ध शुभावह ॥ ६७

द्वयारप्येकचित्तत्वमभवत्किं तदद्भुतम् ।
सिद्धसाधकता प्राप्तौ सम्प्राप्ते जननान्तरे ॥ ६८

अत्र सम्मतिमाह ।

सिद्धसाधकयोर्भेद स्त्रीपुसोरिव दृश्यते ।
तयोस्तु भेदसम्प्राप्तौ चपला चञ्चला भवेत् ॥ ६९

तत्सङ्गम सङ्गमेऽस्मिन् श्रीचक्रोद्धारसम्भवे ।
अवश्य सम्भवत्येव भाविसम्बन्धियोग्यता ॥ ७०

सूचनामात्रसम्बन्धो दिङ्मात्रेण प्रदर्शित ।
मनोज्ञवर्णनीयांशे वर्णनीयोऽनुवर्ण्यते ॥ ७१

राज्य प्राप्यमवाप्य शम्भुनृपति श्रीशम्भुभक्तो दृढ
नित्य श्रीजगदम्बिकाभजनकृद्दानैकशौण्ड सदा ।
ससेवन् विषयाननन्तविधया कार्याण्यनेकान्यल
शेमुष्या सुसमीकरोति विषमाण्याहो विचित्रा गति ॥ ७२

प्राग्भाराद्गणनागुणाद्गजपते सिंहासन साधित
नित्यानित्यविवेकसम्मतिसरत्क्रियामयन्त्रान्वितम् ।
यत्रश्रीपरिवेष्टित परमनुल्लङ्घ्य पर पार्थिवै
सद्वस्याभरण हासहामनिश दिक्छाम्बरस्याशये ॥ ७२

यावच्छम्भुमहाधनिर्महितधीर्दुर्मन्त्रिदुर्वेष्टिता
दामान परिपाल्येदनियताद् दुर्योगभोगोद्भवात् ।
सूर्ये श्यामघनान्तिसहनिमग्नभ्रटिहाभ्र यथा
जगत्तामशनिस्तु तावदनिश छत्र समागाच्छनि ॥ ७३

सेहे तस्य बल बलैर्बलरतो वैकुण्ठनाथादिवत्
शम्भुर्दैवबलेन पङ्क्तिरथवत्तार्णस्तदीया गतिम् ।
आश्चर्यं सुमहत्तर नरपतेश्चर्यानुचर्यानुग
प्राक्चर्या बहुधाऽन्यथा नरपतेर्दृष्टैर दृष्टयाऽकरोत् ॥ ७४

धिष्ण्येषु दैवज्ञविकल्पितेषु यथा यथा सप्तसु सप्तधाऽभूत् ।
तथा तथा सप्तसु पार्थिवानामङ्केषु वैषम्यभर बभार ॥ ७५

तद्योगादभयार्थमागतवता स्थातु स्थल याचित
दिल्लीशस्य सुतेन शुद्धमतिना श्रेष्ठै सह क्षत्रियै ।
सोत्साह ह्यभयङ्कर त्वकनरस्यादाच शम्भु प्रभु
देवस्थानविनाशनोद्धरमनस्तापापनुत्यै स्थिरम् ॥ ७६

दिल्लीशोऽपि यदा सुतोपरि रुषा क्षुब्धाब्धिरच्चुक्षुभे
छन्न तद्रविमण्डल तुरजसा दिङ्मण्डल च क्षणात् ।
शेषोध[च]त्फणिमण्डल विदलित भूमण्डल कम्पित
त्वेक ह्यप्रतिम निरैक्षत तदा शम्भोर्न हृन्मण्डलम् ॥ ७७

सङ्कुद्धस्तनय सञ्चचाल दलितक्षोणीशदिल्लीश्वर
श्चित्त चेदिलशाहत कुतुपयो (?) दिव्दक्षिण तत्रसे ।
गन्तु सर्वदिगन्तराणि सतत हन्तु सुखान्यप्यल
साशङ्क जगतीतल समभवन्नि शङ्कमासीद्भयम् ॥ ७८

सामन्ता शरणङ्गता शशमिरे पुण्डा॰ प्रचण्डा पृथक् ।
दैत्याशा वव्रुधुस्तदा गजघटाशुण्डाभृशुण्डायुधा॰ ॥
चामुण्डावररुद्रसम्भ्रमधर श्रीशम्भुराजस्थल-
च्छात्वव्यापृतपाणिपङ्कजतल स्वैर समाचेष्टते ॥ ७९

सावन्तो वृकवद्वृकोदरनिभा फैरङ्गिना सर्पवत्
श्यामास्या॰ श्ववत्सदैव परित कुर्वन्ति कोलाहलम् ।
दिल्लीशोऽपि पुर प्रचण्डवलभृन्नायात एव स्फुरन्
श्रीमद्रायगिरीश्वरो विजयते शम्भुर्नृसिंहप्रभ ॥ ८०

हेलोत्सानविपक्षलक्षदलितप्रत्यर्थिसन्मेखरो
वेलावेरविराजिताखिलजगद्वेवद्विजोत्सारण ।
शम्भो सन्महिमाप्रतापगरिमा वक्तु न सशक्यते
नि शङ्कोऽप्यवरङ्गशाहसदश शम्भु नृप शङ्कते ॥ ८१

मर्यादा भ्रंशुरशभूषणमणेरुल्लङ्घ्य सेनाभरैः
साष्टीरीप्रमुखान्पुरन्दरयुतान्देशान्सदाकोकणान् ।
सप्ताब्दावधि कालयवनतिनरां दुर्गाणि ससाधयन्
शम्भुर्दुर्यवनो द्वयोर्यवनयोस्तूष्णीं गलेष्वापतत् ॥ ८२

उत्पाता बहवो बभूवुरपरे कम्पो धरण्यामभूद्-
युद्धान्यप्यतिदुस्सहानि सुमहन्त्याहो ह्यभूवन्पृथक् ।
धृष्टो धैर्यधुरन्धर प्रसृमर पृष्ठे स्वय चेष्टते
सैन्य तत्र महारिवोदधिरिव प्रलयप्रतस्ये त्रिधा ॥ ८३

यन्त्रायन्त्रिक्रमद्भुतप्रतिभट बाणाबाणाचित
खड्गाखड्गिक्माबभूव तुमुल युद्धं चटारावधि ।
दैवादुद्धुरयावनीयमखिल सुन्दोपसुन्दायित
सैन्य तद्बलवत्तर समभवत्तूर्णीं क्षयैकोन्मुखम् ॥ ८४

धैर्योद्रिकवशात्तथैव युयुधुर्नेजापुरीया पुरा
कृत्वा चक्रियमण्डल बहुविध सीमा समीपागतैः ।
पश्चाद्विप्रवरेण पूर्णमतिना मादण्णनाम्ना सम
त्वासीत्तत्कलवर्गसीमसमयासङ्गो महान्सङ्गरः ॥ ८५

दिक्काल निभृता बभूव सुखिता विश्वम्भरा निर्भरा
श्वासोच्छ्वासविशेषमाप सहसा शेषोऽप्यशेष तदा ।
मोहान्मूढधियो मदोद्धतिभरा म्लेच्छा मिथो मङ्गला
श्वक्रुस्ते कुल्पासना बहुतरा नानाविधा दुर्दशाः ॥ ८६

अभिवभार पदातिभरः पुर
यवनदुर्जनसङ्गतिसवृत ।
निकटसम्भ्रमसम्भरसन्धरो
ह्यथ ससार शिकन्दरसङ्गर ॥ ८७

कुटिलमस्तकवेष्टनकञ्चुका
स्खलितवाग्वलिचक्रितकन्धरा ।
अपि महद्विजुनदिनिभा ह्युभा
विजयदुर्गमलं दधाति स्म ह ॥ ८८

अभयहस्तमवाप्य दयादरा-
नृपशिरोमणिशम्भुमहीपतेः ।
प्रकटमुद्गटतद्गटसङ्कुल
सुखमुवास शिकन्दरशाहकः ॥ ८९

निकटतद्गटसङ्कट आगते
सुपरिधौ परिखाभिविधौ स्थिते ।
स्थितिमवाप न कोऽपि तदा स्थिरा
बलमयाचत शम्भुनरेश्वरम् ॥ ९०

बलमदान्निजदेशसुरक्षण
द्विजवरावरबाहुजमिश्रणम् ।
विजयदुर्गमवाप्य महत्तर
तुमुलयुद्धमचीकरदद्भुतम् ॥ ९१

अपि दिल्लीशदल विपुल तदा
परमभूपरितो भयनपरम् ।
विनिहतं सुभटैर्बहुशो भृश
प्रबलशम्भुनृपस्य सुसैनिकैः ॥ ९२

प्रतिदिन त्वभिसङ्गसमुद्भव
सुमृधरङ्गमहो बवृधेतराम् ।
प्रतिभट मरहट्टकराहति
प्रतिगण समदृश्यत एव हि ॥ ९३

जगति शुद्धशिकन्दरविक्रमो
विषयमन्दतया विपयेप्सवम् ।
बहुविधैर्नु जनैरनुगीयते
न विजिना विजिना परिर्णा[पा]यते ॥ ९४

समय एवमभूद्विकोत्तम
गिरिवरूटमिरेयमुपागतम् ।
यवनदुर्जनसङ्गविमोहित
पुनर एव मवादमपाऽकरोत् ॥ ९५

निनिहतो नु वृथा द्विजपुङ्गव *
परिहृत परितोष इव श्रिय ।
प्रतिहताऽखिलकार्यविचारणा
प्रतिगता किल कुत्सितधारणा ॥ ९६

कृतभिदा स्वरङ्गपरोऽवलन्
निजरुषा कवलीकृतविग्रह ।
स्वपरसमेतशिव दरनिग्रहे
प्रकृतिविग्रहभेदमयो व्यधात् ॥ ९७

यदपि फेरुपद प्रतिरोपिता
स्तदपि सिंहकनाम समेधिता ।
प्रतिदिन बहलोल्मुखास्तदा
यवनलब्धपरा सहसाऽभवन् ॥ ९८

धृतिरगाद्धरणीतलतोऽखिला
सकलशूरजनस्य रसातलम् ।
प्रचलित खिलशम्भुबल पृथक्
सुविरला हि निदानपरा जना ॥ ९९

यदपि दूलककर्मरत स्थित
स्तदपि नो विभिये सुमहद्भये ।
कृतशिव दरसार्थसमुत्सुको
नृपशिरोमणिशम्भुसुमन्त्रिक † ॥ १००

अपि कलत्रयुतोऽपि परम्परा
न विजहौ निजधर्मपरम्पराम् ।
कतिपयैस्तु जनैरनुवेष्टितो
ध्रुवमतावदति[वि]ग्रदुरासद ॥ १०१

प्रबलदुर्यवनोद्भवकृद्भये
सुदयया दयति स्म दयानिधि ।
अत उपागत आशु दयानिधि
प्रचुरमादरमाप नृपान्तिके ॥ १०२

* Madanna ?

† Kaluṣa

यवनसङ्गरमेव रक्ष य
स हि बभूव शिकन्दररक्षक ।
अपि विधौ विपरीतपथि स्थिते
किमिव नो विपरीततर भवेत् ॥ १०३

तदनुसारवशा द्विजदुर्जना
यवनकौलरता सुतरा धृतिम् ।
अपि भवानुभवे प्रभवे पर
सुचरित किल कौलरता यथा ॥ १०४

स्थलनिराशतया विभु तत्यजु
सुजनसेवनसत्प्रभुसम्मतिम् ।
विगतवासनया गृहमेधिन
सकललौकिकलम्पटता यथा ॥ १०५

प्रचलिता प्रबला परिखोपरि
द्रुतमिराणतुराणसमुद्भवा ।
परिगृहीत शाहिति.. :
. सुचुकुशुरद्भुतमुच्चकै ॥ १०६

पारावारानुकारा प्रबलदलभरा पातशाहस्य पश्चा
दातोप घोषयन्त प्रमुदितहृदया ह्यासमन्ताद्भ्रमन्ति ।
नानाघोषानुसारा: समरजयभृतो वाद्यघोषा समन्ता-
त्स्थानास्तप्रचारा इव घननिवहा. काण्डसङ्घाञ्झरन्ति ॥ १०७

हस्त बीजापुरे द्राक् प्रसभमुपगते राजणाभो दिल्लीश.
प्रारंभे गोल्कुण्डाधिपकुतुपकृते प्राक्समारम्भणानि ।
मूढस्तपुत्रमल्या प्रमुदितहृदय सर्वकाल समास्ते
नो जानात्येव पाप स्वकृतफल्गुपां कर्मणा दुर्विपाकम् ॥ १०८

आसेतो स्थानहेतो. कपटकृतकलोद्घाटण किं कपाटो
दौर्मन्त्र्याद्गोल्कुण्डाधिपकुतुपकृता कार्यभङ्गोक्तिता वा ।
बीजापुर्या[पु]र्यस्तभावो बहुविधिनयवा भाविनो भाविकाय्यै
किं या दिग्दक्षिणाया कलुषकलुषिता व्यस्तनैवाभिरासीत् ॥ १०९

भूदुर्गाण्येव पूर्वं कतिचिदभयकृत्प्रेममार्गैर्गृहीत्वा
सेना कार्णाटिकेषु प्रकटकपटयुक्सूचनाभिः प्रसार्य ।
इन्द्रप्रस्थोपयात्रा निवृतिकृतिवशाच्छन्नयित्वा दिल्लीशो
मूढ भीया निगूढं कुतुपनृपतिना क्रोधपात्रं चकार ॥ ११०

चातुर्यं प्रागुपात्तं बहुदिवसनयाभ्यासयोगात्तुरीयं
मादण्णा मारणीयो यवनकुलपते कोटिशोऽप्यर्पणाया ।
द्रव्यं वाजापुरार्थं त्विगपि करुणया रक्षणार्थं प्रदेयं
दिल्लीन्द्रस्यैव हस्तादकवरसहितं शम्भुराममन्तर्नीय ॥ ११२

एवं धाटीप्रपाटी कपटविरचिता शम्भुभूपेऽनुसार्य
प्रच्छन्नाश्वासनेन प्रबलतरभटाभर्दयित्वा धनेन ।
निश्वासाघानपातप्रमनसुखमयो भोकुनाम प्रनाम
घामाचारप्रचार कुतुपनृपटधारितामुज्जहार ॥ ११३

नानाग्रामानुवेगानुक्षतिकृतिपग प्राणयन्तो दिल्लीश
क्रोधावेशानुनीते[चै]रुपरि च परितः प्रादुरासन्समन्तात् ।
लोनानादर्शयन्त कनकान्तिमिव द्राकू वंर्मपाक
दुष्टा दुष्टैष्टयैव प्रसभमभिमुखं वेष्टयामासुरेनम् ॥ ११४

युद्धारम्भेषु यन्त्रप्रमदरवभर सार्धयामार्धयाम
षड्ग्रामोद्देशमात्रं प्रलयसमयना का तु लीला बभार ।
पश्चात्पाथोधियुग्मोन्मिलनसमयज सेनयोस्तद्वदप
क्षुम्यन्मथाद्विमुग्रं जलधिसमभवद्भाव एवोज्जजृम्भे ॥ ११४

भागापुर्यानुपुर्यावृतिषु विगलितप्राणसम्प्राणनाशा
काचिन्नार्योशहीना समरजयविधौ कान्तिरवाक्तनार ।
सारासारं विवेकं तदनु च सहसोत्क्रम्य दूरानुदूरा
दिन्द्रप्रस्थेन्द्रनाथं वरितुमिव पुरो ह्यासुरा श्रीः ससार ॥ ११५

युद्धं त्वार्धर्यमात्रं दृढतरमतुलं यैस्तु नूनं प्रवृद्धं
ध्वस्तं तैरेव नाचैः कुतुपनियमितैः पामरानामिकाख्यैः ।
धर्माधर्मादिकार्याचरणकरणकृद्वद्भावोज्झिताङ्गै-
र्ध्वस्तैरेवामघातो विगलितमनसामग्र एव बभूव ॥ ११६

ब्रह्मस्वाघातपापक्षुभितहरधुरन्नेत्रवह्न्युत्थचक्र-
ज्वालाजालावलीढं कुतुपकपटिनो राज्यमाविर्बभूव ।
पश्चाद्दिल्लीन्द्रचक्रभ्रमणभरनत तेजसा व्यापृत त
न्नष्ट चासेतुसीमावधिजननिदित पप्रथेऽल प्रतस्थे ॥ ११७

व्याली प्रोत्साहवायोर्विधुतिरशनिजा धैर्यभूमीरुहस्य
द्रोहाद्रिकस्य जाया त्रिभुवनजननी कालचक्रस्य माया ।
कुद्रस्ता-यलोकस्य च हृदयतले मोहमार्गानुसारा
ससारध्वान्तधाराद्वतिरतिशनकैर्निर्जगमाजगाम ॥ ११८

चेष्टावन्तो विचेष्टा प्रकटतरमथो केऽप्यमीष्टस्य नेष्टा
प्रेष्टा प्रमास्पद नो दधति मतिहृता प्रेयसीषु प्रियासु ।
चिन्तासम्वर्धिताङ्गाश्चलन्वलनजप्रक्रमप्रोज्झिताशा
प्रत्यक्ष प्रेतभाव सपदि परिगता प्राणिन. प्रत्ययन्ति ॥ ११९

एव नानाप्रकारैरनुदिनमसकृज्जायमानेऽभ्युपाये
प्राकारान्त पुरेषु प्रबलकृतभिदा विद्यमानेऽप्यपाये ।
पापौघे पूर्यमाणे परमविमुक्तपावीक्षणे क्षीयमाणे
नानासाहप्रधानो ह्यभवदभिमुखो नैव नीचो निदाने ॥ १२०

सार सार समस्त कृतमिह सहसा नीचविस्तारयोग्य
भोग्य यद्वस्तु वाम तदपि विरचित नाममात्राभिरामम् ।
ग्राम ग्राम प्रकाम प्रथितनरमथो ग्राम्यनैवाविरासी
द्धामाच्चाराद्विधात्रा कुतुपवरपुरे नामनैव प्रदर्शि ॥ १२१

दाक्षिण्य दक्षिणात सकलशुभकलावीक्षण वीक्षणात
प्रोत्साह चालनात प्रकृतिकृतिविधौ प्राणन प्राणनात ।
नैर्मल्य वल्पनात सुरसनरगुण कोऽपि कान्ताङ्गनात
किं किं न क्षीणमासीत्कुतुपवरपुरे क्षीयमाणे क्षणेन ॥ १२२

द्वार्द्व[द्वन्द्व] पङ्के निमग्नोद्विप इव सहसा उपोज्जहारे विम्ब
कुर्व-कार्याण्यनेकान्यतिविषमतराण्याशुसम्पकराणि ।
दैवायोगाभिधाभ्या द्विरदनपदवी प्रापिताभ्यामुभाभ्या
दिल्लीन्द्रो दारुणाभ्या कुतुपवरपुर भञ्जयामास निलम् ॥ १२३

ज्यु[नि प्राह्यावित्स्वैरं यतिरभसभरप्रोल्लसल्लीलया वा
लोकानादर्शयन् किं निजवरविभवं प्रोल्लसद्वेलया वा ।
शम्भोस्तद्वृत्तनूत्नस्य च समितिमतो सम्प्रभूतो दिलीश
क्रोधान्धो त्रासगन्धं प्रकृतिमुपगतो वीक्षणं नो चकार ॥ १२३

प्रत्यूहप्रतिपातिनिशातिशुभदा शम्भौ नृपे सर्वदा
शम्भुस्नेहपरम्परैव नितरां वर्तेत सर्वोपरि ।
सर्वेऽपि प्रतिपन्थिनः प्रसरिता अन्तर्बहिःस्था जना
जानाति जनतागतो जनपदः का नो गतिर्भाविनी ॥ १२४

स्थाने स्थाने सुखाना प्रकृतिरुपहितं प्रेषिता प्राक् पठाणा
प्राणानुत्सृज्य कार्येष्वभिमतमतयः स्थापितास्ते तुराणा ।
श्यामास्या लोहितास्याः सलिलनिधिपथे प्रायशः सावधाना
जोषं रोषं पिधाय ह्यवरङ्गविषये धातुपोषं पुपोष ॥ १२५

प्रेमाविर्भावभेदं विविधविधितरं द्रागवाप्याविनाथे
नाथन् दिल्लीन्द्रनाथ स्वसुतविषयकं सामरस्यं समस्यन् ।
नित्यं सन्तुष्टचेता अवरङ्गविषयेऽप्यागतो नु प्रचेता
अयथो दर्शनं नो ह्यवरङ्गसुतनेर्भावि भव्यं बभाण ॥ १२७

प्राप्य राज्यमकण्टकं करगतं यद्वानुकूलस्य तत्
तद्वत्सम्भनुतेऽवरङ्गयवनोऽस्वाधिपादा मताम् ।
नो जानाति दुराशया विदलितं दुर्गादिदासादिभि
रित्यद्भप्रन्थसमृद्धराज्यमसितं मस्तं प्रदत्तं शिशो ॥ १२८

किं साध्या मम किं भवेदिममु भवेत्किं वा भवद्दर्हणा
विश्वम्यानवरेति[ग्स्य] काचिदपि ना दिल्लीश्वरे धारणा ।
तस्मादप्यनुमीमहे प्रियधने प्रायेण पृथ्यान्तरे
कार्याकार्यविचक्षणैर्नहुधा पश्यन्ति न क्रोधिनः ॥ १२९

कोपावेशमतस्तदा ह्यवरङ्गो दिल्लीं प्रतस्थे यदा
युद्धार्थं यत्नवता नहुन्य वेगादिदेशासुर ।
दुर्गादासमुखैर्विनाप्रभृतिभि शूरैस्तत शाम्भवे
सम्पासहस्रागण्य रचना चित्राऽद्भुताऽऽसीत्तदा ॥ १३०

स्थित्वान्यत्रधिया त्रिभिर्दृढतर सूत्र त्रिधा सूत्रित
शम्भुश्छत्रपतिस्तथा ह्यकबरश्छन्दोगमन्त्र्युत्तर ।
सिन्धोर्मार्गे इतोऽधिकोत्तमगुणो विज्ञाय निर्धारितो
येनासौ समवाप शाहसदन दिल्लीन्द्रदर्पापहम् ॥ १३१

स्वल्प स्वभवदातत तमसकृत्सम्यक् निनाय क्षणा
दाक्षिण्यात्परमेश्वरस्य करुणा जाग्रद्दशा दुर्दशाम् ।
आख्याधिपतोपमाब्धजनित दिल्लीश्वरेणाऽप्यल
नानाम्रपवृथामनारथशतैर्मोहात्समाराधितम् ॥ १३२

शम्भुश्छत्रपतेस्तदैव सुयशस्ताभैत्रसोमोदयो
ह्यत्रैवासमथाविमिरसमभूदास्ताद्रिपूर्वाचलम् ।
आवास समवाप्तवानकबरस्त्वावासशाहस्य त
च्छ्रुत्वा वासनिवास एवमुदभूद्दुष्टस्य दुःखोदधि ॥ १३३

श्रीमच्छाहअकब्बरे गतवति प्रायेण विघ्न विना
स्वात्मान कृतकृत्यमेव मनुते शम्भु प्रतिज्ञान्तरम् ।
राज्यद्वन्द्वमहर्निश रणभराद्ग्रहन्न[न्तु] निर्द्वन्द्वत
कृत्य धिक्कृतमेव सामि मनुते सर्व तु दिल्लीश्वर ॥ १३४

राज्य यातु पुनः प्रयात्वकबरो निर्यान्तु सयान्तु वा
स्थानस्था प्रबला. प्रचण्डयवना अर्हन्तु गर्हन्तु वा ।
स्पर्धन्तु प्रकट प्रसह्य समरे सीमास्थसामन्तका
स्वस्तिक्षेमतया नयामि नमयन्सर्वानपि द्राहिण ॥ १३५

कारागारनिवेशनाय निभृत शूरा सुताः कल्पिताः
स्वीयैरेव चरित्रैः शुभतैस्तातोऽभिसन्तोषित ।
इन्द्रप्रस्थमुपेत्य पूर्वसुकृतैरौरङ्गजेबेन सत्
कापि सर्वमकारि छद्मविधृता वन्ध्या [ध्या] कृता नान्यथा ॥ १३४

पुत्र धर्तुमपेच्छति स्वकवर वैरानुबन्धाद् ध्रुव
जीर्णं चारित्रदास्तून निजवयो जानाति नित्य नवम् ।
राऽऽस्यानिषिना गतोऽपि कुरुते क्व वा यत्र नवाथर्यवा
मध्य स्नतन प्रयाति सुतरां धावादन्यस्याशया ॥ १३७

आधिस्तैल्फणोद्गताशय इतो वर्धिष्णुता सययौ
व्याधि पुत्रनिरोध एव वबृधे भूयस्तरा मानसे ।
यद्यप्यलतिरोपत प्रकुर्स्तेऽप्यन्यत्र कोलाहल
सम्याग्दृश्यत एव साधु न तथा रङ्गोऽत्ररङ्गोद्भव ॥ १३६

कीर्ति सुप्रथिता तथैव चलिता सत्त्वाब्धिसीमास्वल
सम्प्राप्ते त्वनुकूलतामकबरे सर्तोत्तरे वत्सरे ।
राजा रायगिरौ रतान सुतरा सह्यादिसत्ताघने
शम्भु शम्भुकृपाभरादयमृयस्नान प्रकुर्वन्निव ॥ १३७

राजान शिविराजराजसदृशा भूयोऽभवन्भूतले
तत्कोटीसमतीत एव सहसा शम्भु शरण्योऽभवत् ।
दुर्गादाससमन्वित परिकर वध्वा ररक्ष ध्रुव
निष्क्रान्त वलिकालजाल्ययनक्रान्त तदीय सुतम् ॥ १४०

एकैव समनुक्रमेण सकल चैवत्र नो दृश्यते
शर्वाणीपतिशर्मसुद्धक्रपया शम्भौ तु सर्व विह ।
घोरेऽस्मिन्कलिकालके कलिमलक्रान्तातिलोकान्तरे
मानुष्य ह्यतिदुर्लभ तदनु सद्राज्य तत सद्यश ॥ १४१

शम्भुच्छत्रपतेरव्वरविधौ जाते महोदारता
रायस्याणुवथा नु का तदधुना केनोपमेय प्रभु ।
धैर्य धीरधुरन्धरस्य सुदृढ वीरस्य वीर्य तथा
देहत्यागविधि विनाप्यपरया को नाम तर्तु क्षम• ॥ १४२

यस्यास्तित्रयशाद्दसन्ति सदनेष्वष्टौ महासिद्धय
सिद्धैवास्ति सरस्वती सुवदने सिद्धा• सदा सार्थिनः ।
सैवाशु प्रसरीसरीति हृदये भक्तिर्दृढा शाम्भवी
शम्भुश्छत्रपतिर्दृढो दृढतर छत्र सुराज्य दृढम् ॥

मोद नैव दधाति नो प्रकटयत्यानन्दसन्दोहिनीं
वाच वाचन साम्प्रत नु पतिना मोहेऽपि सम्मोहिनीम् ।
गर्वादेव मुदाहृतिर्विदलिताप्यष्टादशाक्षौहिणी
मन्दाक्ष मनुते मन स्म सुरराट् मन्दाक्षमामीक्षते ॥ १४३

विष्णुद्वेषसतृष्ण एव नितरामासीत्पुरा प्रेमत
शम्भुस्नेहपराङमुखोऽप्यतितरा मूढो परीवर्तते।
तद्वद्दुष्टदिल्लीश्वरोऽपि निरसन् लग्नोऽस्ति युद्धोद्यमे
नो जानाति यथैव कालयवन• काल शिरस्थ स्वकम् ॥ १४३

सर्वेऽपि प्रतिपन्थिन प्रसरिता अन्तर्बहिस्था जना
जानीते जनतागतो जनपद था नो गतिर्भाविनी।
प्रत्यूहप्रतिघातिकातिशुभदा शम्भौ नृपे सर्वदा
शम्भुस्नेहपरम्परैव नितरा वर्धते सर्वोपरि ॥ १४४

सर्वेऽपि प्रथिता प्रतापभरिता प्रौढाहवाडम्बरा
प्रारब्धप्रचुरोत्सव हरहरेत्याभाषमाणा भटा ।
सानन्द सकुतूहल बत महामन्त्रोन्नता मन्त्रिण
शम्भाश्छत्रपते सहैव सकलाश्चक्रु पर विस्मयम् ॥ १४५

याते सागरमागरालिभिरभिव्याप्त[सि] तनूजे निजे
शम्भोश्छत्रपते प्रभावभरतो वीराग्रगण्येऽधिकम्
दिल्लीन्द्रोद्धतचिन्तया परिवृतो निद्रा न लेभेऽनिश
श्रीपूर्णेऽक्बेर क्रुधा हृदि धृढ सन्तापमापचिरम् ॥ १४६

दाता दानपरायणोऽधिसरणो नानागुणालङ्कृत
शम्भुश्छत्रपति प्रतीपदलन सम्प्रेपयित्वोदधिम् ।
प्रेम्णाकब्बरमाशु मन्त्रिनिवहै साक स्वचित्ते मुद
दध्रेऽनन्तमति प्रतातचरित क्षोणीतले साम्प्रतम् ॥ १४७

Section II

Rajarama's accession at Rajgad

कवीन्द्र उवाच ।

अथ कृताग्निसंस्कारा महाराजस्य धामतः ।
पुरोहितप्रभृतयो मन्त्रिणो मन्त्रकोविदाः ॥ १

प्रातर्द्वितीयदिवसे राजारामस्य मातरम् ।
ममता नाम दैत्यानां मायां कार्यार्थमागताम् ॥ २

दैवासम्पादितमनोरथां स्वार्थपथिस्थिताम् ।
आत्मजानन्दभारतो नहि शोकपरिप्लुताम् ॥ ३

शोचन्तश्चिरराजाय रुदन्तो घर्घरस्वरम् ।
परिनिर्वृत्यैच किञ्चिदूचुरस्वे समाहितुम् ॥ ४

मन्त्रिण ऊचुः ।

कष्टं कष्टं महत्कष्टं निरालम्बित गिरिम् ।
अनुगच्छन्ति मनुजा पशुपक्षिमृगादयः ॥ ५

धिगस्तु दृष्टिरस्माकं धिगस्तु ननु जीवितम् ।
यत्र जानीमहे मत्र महाराजविनाकृता ॥ ६

अनन्ते इमे लोका शोका तन्निकारिणः ।
अनुभूय प्रभूतानि नाम गच्छन्ति योगिनः ॥ ७

प्रिया पुत्री प्रियः पुत्रः प्रियौ भ्रातरसोदरौ ।
पितरावपि हि स्नेहा मृग्यबानि मानवः ॥ ८

कृत्वा यज्ञांस्तपस्तप्त्वा जप्त्वा नत्वा सदाशिवम् ।
महापदासना किं न तस्मान्न गणयन्युतः ॥ ९

परलोकप्रसक्तस्य स्वर्लोकेऽस्तस्य किं भवेत् ।
यथाऽमृतेन तृप्तस्य घटवारि क्रियाचरत् ॥ १०

पारलौकिकसक्तानां कठिनं मानसं किल ।
यत्र न न] निरा विष्णुरतत्र लभ्भा न पश्यति ॥ ११

अराण व्याकरण शास्त्राणि विविधान्यपि ।
इति मत्वा नु सुधिय: परलोकपरायणा: ॥ २६

विज्ञानाऽखिलसारस्या: प्रशस्या: मरुयास्वपि ।
अमोहिन: पर लोक नरा रोहन्ति केचन ॥ २७

अर्थानिनर्थरपश्यन्[वीक्ष्य] परमार्थसमुत्सुका: ।
अपवर्गं प्रशसन्ति परलोककृत[ते]क्षणा: ॥ २८

देहिनामिह देहस्य पाञ्चभौतिकताभृत:
औपाधिकमपञ्चात्र प्रकृति: किल पञ्चता ॥ २९

मृद्‌विकारभेदेन घट इत्यभिधीयते ।
विकृतौ तु विनष्टायां प्रकृति: किल तिष्ठते ॥ ३०

भस्मसाज्जायतां काम वपुर्यत्पाञ्चभौतिकम् ।
चैतनस्यास्ति चेद्‌ध्वंसनदनाशि यशोमयम् ॥ ३१

यस्य कीर्तिप्रतापाभ्यामापूरितमिदञ्जगत् ।
क्षितीशोऽय परोक्षोऽपि साक्षादेवेह वीक्ष्यते ॥ ३२

अथ शोचति य: शोच्य मन्तमन्योऽनुशोचिता ।
अतिरेकेऽरिमन्मरे शोच्यशोचित्रोरनवस्थता ॥ ३३

श्रुतिरागमं प्रपद्य राजागम स्वरागमजम् ।
राज्येऽस्मिन्नभिषेक्ष्याम सस्वामः स्वमनोरथम् ॥ ३४

आवा[प]न्नयकल्पेऽकस्मात् शोककमनोरथम् ।
मानमोऽन्न प सिंहगर्विते न वारिणा ॥ ३५

महाराजप्रतिनिधि निधि सम्पायसाम्पद: ।
स्वामिन्नायकुमाराय राजाराम विनिधाय ॥ ३६

स्वमार्ये प्रकृते कार्ये विनोदमिनत पदम् ।
अज्ञाय विजानस्मान्ताराय स्वमनोरथम् ॥ ३७

उत्पाता इव पाप: महापातकरूपं परम् ।
पर्वमिदं वपुर्मर्त महेन्द्रदयितोऽन्तरम् ॥ ३८

अनन्तर नु भेनादन प्रभृति प्रभुं मुक्तिम्न्यम् ।
अनुनाम्नानेन नूनं सूनुमु ना ॥ ३९

क उपैत्य पर लोक वनासु लोकमागतः ।
नोररीक्रियते जातु सुधीभिः शोकमागतः ॥ ४०

इत्थमुक्तस्ततस्तत्र सापत्रपमनागतान् ।
स्थित्वा क्षणमिव राज्ञी न्यगदद्गद्गदस्वरा ॥ ४१

यथार्हवस्तुसंसर्गवञ्चकाय विरिञ्चये ।
स्वजीवितमयानाथा बत नायामि नात्मना ॥ ४२

मन्ये मदह[दह]सामेव रहसा सहसामितः ।
प्रभ्रश्याभ्रमिद सर्वमपतन्मम मूर्धनि ॥ ४३

नितान्तमुचना येन ध्वस्त दैन्यमय तमः ।
तमधीशमपश्यन्त्या सर्वमन्धममूज्जगत् ॥ ४४

भृश विश्रम्भणीयेषु भवत्सु प्रभवत्सु च ।
विश्रब्धाहमसन्दिग्धाभिमतार्थपथार्थिनी ॥ ४५

यदिदानीं मदभ्यर्णे भवद्भिरुररीकृतम् ।
कर्णाकर्णिकया सर्व तदाकर्ण्य त्रिमातृजः ॥ ४६

क्रोधन पृथुक क्रोध पातयेत्पृथुके मम ।
तदोपसत्यमाधत्ता भास्करभुजविक्रमः ॥ ४७

इद निगद्य निर्वेदवती तूष्णीकता गताम् ।
सा मन्त्रिमण्डली भूयोऽप्यनर्घाकमवीलपत् ॥ ४८

भवती जीवतु चिर जीवनाय शिशोः परम् ।
जीवनामोऽपि जनताजीवनाय शत समा ॥ ४९

प्रभु सर्वस्य लोकस्य यदन्तर्हितवान् सः ।
न तदेवाम्ब तथापि किन्त्वस्माकमपि ध्रुवम् ॥ ५०

भवती भवतीमेव यथमेवाह शोचते ।
बालोकमयं यस्याः स्तोक त्रिभुवन किल ॥ ५१

विधिविधिर्यो विविना त्वद्दत्तविधिनाऽधुना ।
आनायितो निज धाम शार्ङ्गजामज. शिव ॥ ५२

पूज्या मातर्जहानस्या नजस्य समगद्ना ।
राजन्यार्पी यथा धीरल्टने लच्च भूवदे ॥ ५३

अखण्डपण्डापाण्डित्यपरिखण्डितपण्डिताः ।
दण्डीनाखिलनैतण्डी तुण्डीं मा दधनश्चिरम् ॥ ६७

स्वविशेषैः शेषमपि भर्त्सयन्तो सुधीवरा. ।
अशेषा भाष्यसत्कारो वैयाकरणिका अमी ॥ ६८

अतर्क्यतर्ककलित[ता]शेषब्रह्माण्डमण्डलाः ।
प्राकामकामाः सोत्साहा महान्तो बत तार्किकाः ॥ ६९

प्रध्वंसितमहामायाविकारपरिलक्षिता. ।
स्वमतस्थापनरतस्था: केचिन्मीमांसका अमी ॥ ७०

घोषणातोषणस्फीताः स्वरशिक्षाविचक्षणाः ।
स्वच्छन्द छान्दसाः सर्वे स्वच्छा प्रोच्छ्रायतर्पुलाः ७१

गणयन्तोऽतिगणशो भगणङ्गुणरङ्गिण ।
गणका शास्त्रगुणनागुणिनो गणिताशया ॥ ७२

इदं कार्यमकार्यं वाऽकृत्य कृत्यमिद खलु ।
समालपन्तः सतत प्रथिता धर्मशास्त्रिण ॥ ७३

नानातन्त्रार्थवेत्तारश्छेत्तारः कार्मणस्य च ।
शर्मणो निलयीभूता सुलया बत मान्त्रिका ॥ ७४

असद्वृत्तेक्षरमिद लघुसयतिरंजितम् ।
इत्यालपन्तः परमछन्दोगा वैद्धला ध्रुवम् ॥ ७५

चारुसङ्गीतविद्यङ्गीता गीताः किल क्षितौ ।
गायकाः सार्वभगिता गन्धर्वा इव सुस्वरा ॥ ७६

कलानिव कलकलाः सकला कमलाकुला ।
सर्वान्सरिन्सलोकभूतामेनोविहारिणः ॥ ७७

अचिन्त्यमादित्यमहाप्रौढिमानमहोद्यमाः ।
विचक्षणाः केऽपि नवोजृम्भमाणसुरक्षणाः ॥ ७८

कृतनाट्यश्रमा ज्ञातार्थितसम्भृतनाटका. ।
कार्णाटका नटाः स्वप्रकर्षाश्रुतकौशला ॥ ७९

यथानो यथसाः केऽपि विदग्धा कृतकौतुका ।
महस्यानो यवस्यानो प्रशस्यानो मनामरि ॥ ८०

इतिहासपुराणज्ञा विज्ञाः सुज्ञजनप्रियाः ।
पौराणिकास्त्यक्तशङ्का निष्कलङ्का गुणोज्ज्वलाः ॥ ८१

पाखण्डताण्डवाखण्डा वितण्डावादडिण्डिमाः ।
मण्डलीभूय मिलिता रत्नकुण्डलमण्डनाः ॥ ८२

अपरेऽपि च विद्वांसो सहसोत्सवहेतवः ।
सेतवो ज्ञानविज्ञानसागरस्य जितश्रमाः ॥ ८३

बौद्धा सिद्धा इवासिद्धार्थाल्पिप्रतिनिदर्शकाः ।
कर्कशा जठरापूर्तिमात्रोदर्काः प्रकामुकाः ॥ ८४

अनवद्यमहाविद्यागद्यपद्यप्रवर्तकाः ।
कवयः सनयोपेता नवयोगप्रदर्शकाः ॥ ८५

उल्लसच्चारपीयूषकरा दस्रानुकारिणः ।
चिकित्सकाश्चिकित्सासु सर्वासु कृतगौरवाः ॥ ८६

ज्ञातकोकाः खड्गगजहयलक्षणवेदिनः ।
अखर्वगर्वैकमहापर्वता शर्वसेवकाः ॥ ८७

नानायोगप्रवक्तारो योगिनो गतविभ्रमाः ।
ससम्भ्रममिहायाताः सयता यतवासनाः ॥ ८८

अनेकरत्नकेयूरधारिणो वारवाणिनः ।
सभ्या केऽपि महाशूरा इभ्या अपि समागताः ॥ ९२

बालमार्त्तण्डरश्मीन प्रतीक्षन्तः क्षणं क्षणम् ।
राजारामस्याभिषेकं वसन्त्यातोरणान्तरम् ॥ ९३

सत्सारेऽस्मिन्नसारेऽपि क्षणिकैकसुखास्पदे ।
स्वससारं स्वराज्येऽस्मिन्मा निर्वेदमुरीकुरु ॥ ९४

अशाश्वतमिदं सर्वं विगणय्याऽतिशाश्वतम् ।
वर्तितव्यं मनुष्येण नव्यमन्यप्रतीक्षया ॥ ९५

स्वायत्तो यावदात्मास्ति सर्वे परिचरा अपि ।
तावद्यत्नं समातिष्ठेद्यत्नाद्भद्राणि पश्यति ॥ ९६

स्वहृत्परक्षणायासः प्रकर्तव्यो विपश्चिता ।
सत्कृत्य सकलं लोकं स्थिरायां स्थीयतां स्थिरम् ॥ ९७

न धैर्येण विनोद्योगो नोद्योगेन विना धृतिः ।
धृत्युद्योगौ समारभ्य स्वार्थे कार्ये प्रसज्जता ॥ ९८

वैकल्यं कीदृशं प्राहुर्महासाम्राज्यभञ्जनम् ।
अतो वृणु समुद्योगं सुयोगं वीरनायके ॥ ९९

राजनीतिरियं शश्वद्विश्वे विश्वविमोहिनी ।
विशेषेण विज्ञातव्या सर्वदा राज्यतर्षुणा ॥ १००

इतरेषां तु लोकानामन्यो धर्मः सनातनः ॥
राजर्षीणां पुराणानामन्यदीयोऽस्ति सुव्रते ॥ १०१

राजा विराजते लोके लोकरञ्जनकारणम् ।
अतोऽन्यथा विधातव्यः स्वधर्मो विजिगीषुणा ॥ १०२

सन्धार्या क्लेशपदवी पार्श्वैरेव सर्वथा ।
राज्ञोपज्ञानुजीवेन मह एव महा[महत्]सदा ॥ १०३

असमर्थेन कर्तव्यो यत्न सादो दिने दिने ।
भाव्यं महीमहेन्द्रेण महाविक्रमिणावनौ ॥ १०४

असमर्थः कथं स्वार्थं लभतेऽर्थं समर्थवत् ।
समर्थे सर्वथा सिद्धिरर्थिनोऽर्थन्त्यनेकदा ॥ १०५

शाहराजस्नुषा वीरमहाराजशिरोमणे
शिवराजस्य रमणी स्मरणीयोरुसद्गुणा ॥ १०६

सर्वार्थसाधिनी धीरकन्या मोहितरशजा ।
धीरमाना वीरधुरीणत्वपरायणा ॥ १०७

मम प्रशाधि सकलानिद्धरान्वयवर्तिन ।
राजाराम पुरस्कृत्य महासाम्राज्यदीक्षितम् ॥ १०८

महाम्बुधिपरिभ्राजमेघसाधन्यापिनाम् ।
यशुभ्रं शास्तु चिरं राजारामस्तवाग्रज ॥ १०९

फल काल पुनः सत्यमिदमेव न संशयः ।
यत्नादिह यत्र सर्वे तत्र हेतोरनागतः ॥ ११०

इति समभिहितार्थं प्रार्थितं मन्त्रिमार्गं ।
प्रथितनयदशोभिः साऽथ नय सरस्याम् ।
किल कलितविकल्पं स्व मानसं सादन्ती
विमति मरणदानी मन्मतेनानन्द ॥ १११

इत्य नानाहितार्थं हितमिव कलिना प्रस्तचित्तैस्दग्रै
प्रेम्णा सम्बोधिता सा शिवनृपरमणी कारणीभूय किञ्चित् ।
ऐच्छद्दक्तु निविक्तै[बुध]समधिषणा दैवयोगावतार्णा
वीरस्तार्णी क्षोणिमेता निजशुभचरितैरिच्छती व्याप्तुमारात् ॥ ११२

इत्यनु० अध्याय ॥ ? ॥

कवीन्द्र उवाच ।

इत्य राजकुमारस्य राजारामस्य सा प्रसू ।
मन्त्रिप्रवरसम्प्रोक्ता व्यक्तामाकर्ण्य भारतीम् ॥ १

आनन्दसिन्धुलहरासम्मग्नहृदया सती ।
तत्कालोपहित वाक्यमाजहार शुचिस्मिता ॥ २

राजपत्न्युवाच ।

सत्यमुक्त भवद्भिस्तु प्रभवद्भिरहर्निशम् ।
सनाथवानुनाथामि बत राज्यमकण्टकम् ॥ ३

तथाऽपि मम चित्तस्य न पर्याप्ति प्रदृश्यते ।
बलिना परिभोक्तव्य बलिना निखिलञ्जगत् ॥ ४

अन्वेषयन्ति सतत द्विषिणश्छिद्रमप्यरम् ।
राज्यस्याबल्या तत्र यत्न कीदृक्प्रकल्प्यताम् ॥ ५

बलेनैव भवति राजा लोकेषु केवलम् ।
बुद्धिमानतिमान् शश्वदामुङ्क्ते परमम्पदम् ॥ ६

नीतिरेव पुरस्कार्या कार्याऽकार्ये विजानता ।
आर्यवृत्त विचार्याशु वर्तितव्य प्रयत्नत ॥ ७

यत्नवान् विजयी लोके सङ्गच्छति महत्पदम् ।
शङ्खो मुरद्विषा मत्स्यजनुषा स्ववशीकृत ॥ ८

कपटैकपटाच्छन्नाभूय पात्यो बली रिपु ।
सख्य विधाय शक्रेण वृत्रोऽय विनिपातित ॥ ९

सदसद्वापि वर्तव्य निर्विशङ्क बुभूषुणा ।
नृपेण राज्य सम्प्राप्य वर्तितव्य यथा तथा ॥ १०

सहजा सुहृद क्वचित् कृत्रिमा केचन स्मृता ।
उभाभ्यामनुकूलाभ्या राज्यमुद्योतते चिरम् ॥ ११

केचित्स्वपक्षमाश्रित्य परपक्षमुपासिन ।
अदभ्रधिषणाश्रमभ्रजनयन्त्युत ॥ १२

कृत्रिमा दुर्हृदः केऽपि तथा साहजिका अपि ।
राज्यक्षयाय महते सन्नद्धाः सन्ति सर्वथा ॥ १३

बहिरुत्साहजनका अन्तर्भेदविकारिणः ।
नराः पिशुनयन्केऽपि घातयन्ति नृपश्रियम् ॥ १४

उत्साहभङ्गिन. केऽपि कृतयात्र्यैकरञ्जनाः ।
जनयन्ति नृप भूयो वैक्लव्यैकनिकेतनम् ॥ १५

केप्याशयैकज्ञानार्थं सावधानेन चेतसा ।
कथयन्ति कथाः काश्चित्क्षितीशानन्दहेतुकाः ॥ १६

वाचाटिकाः केऽपि नरा प्रजल्पन्तः स्वपौरुषम् ।
रञ्जयन्ति नृपश्रेष्ठं वृथा समनुजीविनः ॥ १७

किञ्चिदुच्चारच कर्माचरन्त कैतवान्विताः ।
आघातयन्ति भूमीन्द्रचन्द्र परिचरा. क्वचित् ॥ १८

मायामोहमदाविष्टा दिष्टया दिष्टाः क्वचित्क्वचित् ।
साकमेवात्मना नार्थं मज्जयन्त्यसुहृज्जले ॥ १९

हिताय यतन काँश्चित्स्वामिनो यतमानसान् ।
आतन्वन्त्यपरे केचिद्भेद मिथ्याप्रलापिनः ॥ २०

सहस्रभानुप्रतिमाः प्रतापप्रथितौजसः ।
काश्चित्स्वामिहितान्केचित्प्रशयन्ति मनिषमै. ॥ २१

उत्कर्षमपि केषाचिदसहन्तो नृपगृहे ।
राजानमन्यथा बुद्धिं दर्शयन्ति मुखप्रियाः ॥ २२

मिथ्या केचि प्रशसन्ति राजानमनयोद्यतम् ।
साधयन्ति पर स्वार्थं समर्थां इव सर्वथा ॥ २३

नानागृहाग्भङ्गीभि. सुभगाभिरितस्ततः ।
व्यामोहयन्ति राजानं जनाः केऽपि प्रियंवदा ॥ २४

आशामात्रनिशानप्रनिशाः प्राशवञ्जनाः ।
पातयन्ति नराधीश गलमन्याहिते परे ॥ २५

केचिद्भिन्नमर्यादां दर्शयन्त. कृतार्थवत् ।
विरहन्तः फला भूप दुःपदूरे क्षिपन्त्यहो ॥ २६

अप्रधाना प्रधानस्तु प्रथयन्त प्रधानताम् ।
असन्धानेऽनुसन्धाय भूमीन्द्र मज्जयन्त्यमी ॥ २७

मुखदाक्षिण्यमासाद्य सद्य स्निग्धतराक्षरा ।
केचित्क्षोणीन्द्रहृदय हरन्ति सदय खल ॥ २८

नानानतिमतिप्रौढिसेवाभि • पुरतोऽधिपम् ।
रञ्जयन्ति पुन पश्चाद्विहसन्त्यप्यलक्षितम् ॥ २९

स्वामिनोऽग्रे प्रतिज्ञाय महत्कर्मापि मन्त्रिण ।
मिथ आमन्त्र्य सम्मन्त्र्य समुपेक्षा चरन्ति ते ॥ ३०

आदिष्टा • क्षोणिचन्द्रेण क्षीणारातिपराजये ।
निर्णयन्ति त द्रव्यैर्मन्त्रिण स्वार्थदर्शिन ॥ ३१

स्वस्वाभिमानहान्यर्थं व्यर्थं शत्रुपताकिनीम् ।
समानयन्ति नयतोऽनयतो मानपूजिता ॥ ३२

वृत्तान्तजातमखिल खला केचन मन्त्रिण • ।
आवेदयन्ति रिपवे स्वाम्युत्कर्षपराङ्मुखा ॥ ३३

अनल्प स्वामिनाक्षिप्ता प्रज्वलन्तश्चिर हृदि ।
जनयन्ति मिथो भेद छेदयन्ति नृपश्रियम् ॥ ३४

इत्थ महादु खभार प्राज्य राज्य नराधिप • ।
रुन्धन् छिद्राणि सर्वाणि स यशोकुरुते चिरम् ॥ ३५

क्षोणीन्द्रचूडामणिना वलिनातिसुबुद्धिना ।
ज्ञात्वा सर्वस्य हृदय वर्तितव्य यथायथम् ॥ ३६

अथ मे तनयो बालो हरिणो हरिणेक्षण ।
कथ भार समर्थ स्याद्वोढु सोढुमरेर्बलम् ॥ ३७

दिल्लीन्द्र सतत सान्द्रच्छिद्रान्वेषी दुराशय • ।
नि सशय भक्षयिता बालक मामकम्बलात् ॥ ३८

शम्भुराजापि मेधावी क्रुद्ध क्रूर • कृतान्तवत् ।
नून कृतान्त पुत्र मे कृतान्त प्रापयिष्यति ॥ ३९

अहमेव निजान्प्राणास्त्यक्ष्यामि हतदु खिता ।
कदापि नैव शक्ष्यामि वैमात्रेयात्पराभवम् ॥ ४०

युष्मान्समाराध्य

Section III

Last Days of Shivaji

श्रीगोविन्दाय नमः । कवीन्द्र उवाच ।
एकमेवेश्वरं स्वस्य वतेश्वरममन्यत ॥ १

तदा निर्विद्यमानेन विद्यमानेषु वस्तुषु ।
अतर्कि गन्धर्वपुरप्राकाराकारतामुना ॥ २

आचार्यायत्तमतिना पटुना कर्मठात्मना ।
एतेनाकारि कृतिना तत्कृत्यं पितुरन्तिमम् ॥ ३

दिनानि विधिना तेन तदा तानि निनाय सः ।
तथाध्यात्मविदध्यात्मकथया ताश्च शर्वरी. ॥ ४

अथैष मङ्गलस्नातः सुवासा. सुपरिष्कृतः ।
चन्दनेनानुलिप्ताङ्गः सुमनोभिर्मनोरमः ॥ ५

पुरोहितप्रभृतिभिर्विहितस्वस्तिवाचनः ।
वित्तविश्राणनैर्विप्रान्विदधन्मुदितात्मनः ॥ ६

स्वनन्निःसाणनिस्वानपूरिताद्रिदरीमुख. ।
सुमुखः सैनिकै स्थायैः साकमास्थानमासदत् ॥ ७

अथ सम्प्रेषितचराश्चरास्तस्य तदन्तिके ।
सर्वमावेदयामासुर्वृत्त रैङ्गिरिवार्तिनाम् ॥ ८

यस्य यद्यन्मत तत्तद्भूतमित्येव ने पुनः ।
नोदिताः क्षोभिताशेषवृत्तास्तमिदमब्रुवन् ॥ ९

अभिषिच्य पदेऽमुष्मिन्राजाराम कुमारकम् ।
आसमुद्रं वसुमतीमवितारः स्वय वयम् ॥ १०

इदमुद्दिश्य मनसा मयूराद्यैः कुमन्त्रिभिः ।
सन्दोहयद्भिः पृतनां वितीर्णोचितवेतनाम् ॥ ११

ससज्जे शम्भुवैराय ललज्जे न मनागपि ।
जनाः सर्वे वदन्तीमां किंवदन्तीं गृहे गृहे ॥ १२

द्विपि दिल्लीश्वरे दर्पाद्युध्यमाने दिवानिशम् ।
न वरं बाल्लिशो राजा सहास्यास्य वरं विषम् ॥ १३

क्रियावतामधिभुवे मभूतप्रभुतामुवे ।
हन्तामी स्पृहणीयाय स्पृहयन्ति न शम्भवे ॥ १४

इत्थं मयूरप्रभृतीन्विनिन्दन्त्य: पदे पदे ।
प्रजास्त्वाशासतेऽद्य त्वा शासितारं दिने दिने ॥ १५

शम्भुराजो नियन्तव्यो मन्तव्यो मन्तुमान्ध्रुवम् ।
अथवा हन्त हन्तव्यस्तत्र योधैरुदायुधैः ॥ १६

इत्यन्वहमह युत्वान्[श्रुत्वा]मयूरादीन्प्रशासती ।
जागर्ति ममताप्युच्चैः पुत्रे स्वे ममतावती ॥ १७

सिंहासनस्य यो भर्ता स नो भर्ता भवेदिति ।
राद्धान्तितमिदं चित्ते तत्तद्दुर्गाधिकारिभि. ॥ १८

अस्ति हम्बीरराजस्य ममता ममतात्मजे ।
तदप्यतितमा पक्षपातस्त्वयि महाभुजे ॥ १९

उदन्तमेनमन्यच्च तेभ्यः श्रुतवताऽमुना ।
विविक्तवार्तिना मन्त्रनिधिना क्षात्रमूर्तिना ॥ २०

हन्त हम्बीरराजाय सेनान्ये शम्भुवर्मणा ।
अलेखि किल लेखोऽयं वर्णमुक्तामनोरम. ॥ २१

मयि राज्यमिदं न्यस्य वैरं दिल्लीश्वरस्य च ।
परोक्षभावमभजत्प्रत्यक्षः परमेश्वरः ॥ २२

पिता मम प्रतापी तत्कृच्छ्रं वाचामगोचरः ।
सुदुस्तरो ह्ययं कालः पापीयानुत्तरोत्तर. ॥ २३

भवितव्य भवन्येवेश्वरगतस्त्वया स्थिया ।
तदुपक्रम्य ते केन यत्र नास्ति प्रतिक्रिया ॥ २४

उपजापप्रवृत्तानाममात्यानां दुरात्मनाम् ।
मामुद्दिश्य जिगीषा यत्तवैव स्वजिजीविषा ॥ २५

दम्भोलिवद्भवानां मदर्थे वः समुद्यमे ।
अहीनविक्रमस्याद्य भवत्येव भयं न मे ॥ २६

अनवाप्य भवत्पक्षं विपक्षास्ते ममाधुना ।
बत स्वाय निकेताय किमुत्पातं वितन्वते ॥ २७

प्रभुभूपति यः स्वेन प्रभुं चाभिबुभूपति ।
स राजानमजानानमितरस्तु न काङ्क्षति ॥ २८

शम्भुः कनीयसोऽमुष्य द्विपन्नेवेति किञ्चन ।
अज्ञापयन्नर्तीवाज्ञास्तन्मात्रेऽमी कुमन्त्रिण ॥ २९

प्रशास्ता त्वस्य राज्यस्य मद्दत्तस्यार्भकः स वा ।
अमर्पणामसौ ताम्राननाश्चेन्न जिघृक्षव ॥ ३०

राज्यं नार्जति राजानं राजैव तु तदर्जति ।
तृणवद्गणयन्त्येतत्केचित्तदतिगुर्वपि ॥ ३१

सद्यः शृङ्खलिता एव मयात्र निखिला खलाः ।
ते तु त्वया विभागे स्वे विनिग्राह्याः कुमन्त्रिण ॥ ३२

आहूय यवना नमक्रमाः स्वामिविद्विपः ।
मज्जयेयुरिमं सह्यमसह्ये मय्यमी रुपा ॥ ३३

येषां हि महती माया त्वमायाहि मदन्तिके ।
पालनायास्य राज्यस्य सेनानीः सेनया सह ॥ ३४

इदमानन्दराजाय योध्दे मानजिते तथा ।
प्रबोधनीयं भवता दो.प्रतापभृता मिथ. ॥ ३५

विसृष्टं शम्भुराजेन संश्रितप्रश्रया श्रिया ।
सेनापतिः स्वय लेखममु सम्यगलोकत ॥ ३६

मम त्वन्यन्न विज्ञाप्यमाज्ञया भवदीयया ।
द्रुतमागन एवास्मि सन्नद्धः सेनया मया[म] ॥ ३७

एवं सिंहासनार्हाय शम्भुराजाय सत्पृहः ।
सद्यः स्वेन जनेनैप सन्देशं समदेशयत् ॥ ३८

उदारमतिरानन्दराजाद्यैरनुमोदितः ।
अरोचदपि चामात्यचरं प्रच्छन्नवर्तिनम् ॥ ३९

लेखावलोकनाज्ज्ञातं मनमण्णमयूरयोः ।
विवक्षुरसि चेदन्यदपि तच्चेन वक्षि न ॥ ४०

अण्णाय च मयूराय प्रल्हादाय च राहवे ।
सधः सन्देशमेनं च मदीयं विनिवेदय ॥ ४१

तत्र तत्र समेष्यामि यत्र यत्रागमिष्यथ ।
पथिकीभूयतेऽस्माभिर्भवन्मुक्तस्य[केन] किं पथ.[था] ॥ ४२

सन्दिष्टमेतदथ ते सचिवाः समेताः
सेनापतिप्रहितमाशुचरान्निशम्य ।
रोद्धुं प्रणालमचल प्रचुराभिमानाः
स्थानान्निजादुदचलन्वरवारणाः ॥ ४३

इत्यनुपुराणे सूर्यवंशे निवास क० कवी० अध्यायः ॥

कवीन्द्र उवाच ।

अथ प्रस्थितमात्रस्य तुरगारोहणक्रमे ।
मयूरस्य शिरोवेष्टः पपात धरणीतले ॥ १

पिचिण्डिलस्य त्वण्णस्य याप्ययानाधिरोहिणः ।
निरुष्णीषो नरः कृष्णो दशोरभिमुखोऽभवत् ॥ २

अनाल्हादह्रदस्तावत्प्रल्हादस्य च गच्छतः ।
अमन्दमन्दं पस्पन्दे तत्र चक्षुरदक्षिणम् ॥ ३

तस्योपरिष्टात्सैन्यस्य व्यूढस्य प्रौढिमीयुषः ।
मण्डलान्यपसव्यानि गृध्रवृन्दैर्विदध्रिरे ॥ ४

एत्य दक्षिणतः स्फारमारटन्तः कटुस्वनम् ।
प्रजा सकृत्प्रजाना चाप्यव्राजिषुरदक्षिणम् ॥ ५

निमित्तान्यशुभाशासीन्यमून्यन्यानि चाभितः ।
पश्यताथ मयूरादीन्प्रल्हादेनाभ्यधीयत ॥ ६

प्रल्हाद उवाच ।

भवन्ति हन्त नास्माक शकुनाः शकुनावहाः ।
दशां द्रक्ष्यामहे कां नु बलिना कृतविग्रहाः ॥ ७

ममता मन्मता नैव ममताममतामते ।
यत्कृतेऽद्य प्रवृत्ताः स्थ पथि सद्भिरसत्कृते ॥ ८

तत्र गत्वाऽतिसत्त्वाढ्यो दिल्लीन्द्रादात्तवाञ्छ्रियम् ।
पित्रे दिदृक्षमाणाय दर्शयन्निजपौरुषम् ॥ ९

सन्धिविग्रहयानादिवेदिना प्रौढकर्मणा ।
अहो युष्माभिरारेभे विरोधः शम्भुवर्मणा ॥ १०

मतं सेनापतेर्नैव स्वमतेर्विपर्यीकृतम् ।
न चाद्रिदुर्गपालानां स्वतन्त्राणामिवाधुना ॥ ११

मन्ये हम्बीरराजाद्याः पृतनापतयोऽधुना ।
बलिना शम्भुना स्वस्य विहिताः पक्षपातिनः ॥ १२

तस्मादद्य प्रपद्यध्वमनवद्याय शम्भवे ।
परथा[तो] भवदीयानाम्भवताञ्च न शम्भवेत् ॥ १३

इत्थमुद्यन्नीतिभास्वती प्रह्लादभारती ।
नान्वमोदि मयूराद्यैर्दिष्टादिष्टानुवर्तिभिः ॥ १४

अथाण्णमुखमालोक्य मयूरो वाक्यमब्रवीत् ।
प्रह्लादं तत्तथा मन्ये नान्यथाऽत्र यदब्रवीः ॥ १५

दिगन्तान्वा दिवं तां वा पाताल वावलम्बताम् ।
तथापि न जनस्यास्यान्यथा स्याद्वैधसी लिपिः ॥ १६

कृतावदाताः सन्मानदानदूरीकृतश्रमाः ।
वयं कृताः कृतज्ञेन स्वामिना स्वात्मनः समाः ॥ १७

अनेन सहसा दैवाद्यातुमुन्मनसा दिवम् ।
यस्तु न्यास इव न्यस्तः शिशुरस्माकमन्तिके ॥ १८

तस्य राज्यमिदं सर्वं त्वदीयस्य यवीयसः ।
त्वं तु कर्णाटक देशं शाधि तातनिदेशतः ॥ १९

अदो वदोचितं तस्मै न शृणोत्युद्धतो यदा ।
ऋते दिल्लीश्वरं तस्य नावलम्बान्तरं तदा ॥ २०

इत्युक्त्वा प्रहितस्ताभ्यामुभाभ्यामपि सन्मतिः ।
सताङ्गतिमसौ शम्भुवर्माणं प्रत्यपद्यत ॥ २१

अथ हम्बीरराजेन प्रहितः स्वहितः स्वराः ।
परयन्नण्णं मयूरञ्च मध्येसभमभाषत ॥ २२

कार्यं तदतिसंसक्तं यदव्यक्तं हितं भवेत् ।
अतो द्रक्ष्ये विरक्षुर्वौ विरक्तस्थावुभावपि ॥ २३

एवं सन्देशमाकर्ण्य पृतनाधिपतेरमू ।
सपदि प्रतिसन्दिश्य तत्र प्राहिणुतां चरम् ॥ २४

अथ पञ्चाननगतिः सेनापतिररिन्दमः ।
तत्क्षणोत्स्फारितश्मश्रुरेखो रूक्षारुणेक्षणः ॥ २५

पिनद्धवर्मा चर्मासिपाणिः सानीकिनीगणः ।
वृषस्कन्धसमस्कन्धप्रतिष्ठितशरासनः ॥ २६

प्रत्युद्व्रजद्भ्यामभितो रुद्राभ्यां सह सेनया ।
ताभ्यां तत्र तथाऽलोकि भवत्येव यथा स न ॥ २७

कौ युवां किमनीकं वां कं प्रत्ययमभिक्रमः ।
कुतो मर्कटकाभ्यां किं भवद्भ्यामयमुद्यमः ॥ २८

यस्यान्नमत्तमाजन्म तस्मिन्नसति तत्सुतम् ।
विनियन्तु प्रवृत्ताः स्थ दुर्वृत्ताः स्थ न संशयः ॥ २९

निगदन्निति निग्राह्यौ व्यग्राहयदुभावपि ।
अधिपद्विपदुत्पायी प्रतापी पृतनापतिः ॥ ३०

ततः स्वस्वशिरोवेष्टनियन्त्रितभुजावमू ।
उभौ हीतौ दुर्विनीतौ नीतौ दीनां दशामिमाम् ॥ ३१

तदवश्यीकृतां तद्वत्तदीयाननुबन्धिनः ।
सम्बन्धिनश्च सुहृदः सोदरान्बान्धवानपि ॥ ३२

हृतायुधान्कृतक्रोधान्योधानपि च कांश्चन ।
प्रदाय रक्षणार्थाय पृतनां स्वां प्रजाघ्नीम् ॥ ३३

विधाय रक्षितान्दाश्वस्तया पृतनया नयी ।
स्वामिभक्तो महासत्त्वः संगरं कार्यलालसः ॥ ३४

पुरः प्रस्थापयामास प्रणाळमचलं प्रति ।
यस्माद्राजाकिल क्षिप्रं प्रस्थितः पृतनापतिः ॥ ३५

मर्त्याविग ऊचुः ।

विसृष्टः शम्भुराजाय प्रविष्टोऽपि च तं किल ।
यद्दृष्टमस्तोऽत्र प्रल्हादस्तदुदीरय ॥ ३६

कवीन्द्र उवाच ।

स तु मन्तुमतां तेषां शम्भुद्वेषान्धचेतसाम् ।
श्रेयसः समुदायेन समुदाये वसन्नभूत् ॥ ३७

ज्यायस्तु ज्यायसः श्रेयो यवीयस्तु यवीयसः ।
चिरं निरचिनोदेतदयं तु निजचेतसि ॥ ३८

अतो दूर्लोपधिस्तावत्प्रल्हादः सुधिया वरः ।
शम्भुवर्माणमभजत्भ्राजमानः स्वया श्रिया ॥ ३९

कमपि वसुधालोकेऽमुष्मिन्सुधामयदीधितिं
तनयमकनीयांसं पश्यन् प्रभोः शिवशर्मणः ।
स किल पृतनापालस्तावत्प्रणाल्महीधरे
मुदमतितमां लेभे देधेऽपि चाप्यधिकां श्रियम् ॥ ४०

विश्वव्यापि भुजोद्यमे शिवमहीपाले प्रयाते दिवं
कः स्यादस्य पदस्य सम्प्रति महाबोहुर्नियन्तेति यः ।
सन्देहः स्वर्मिणोऽतिथिः स नुनुदे श्रीशम्भुराजाभिधं
दृष्ट्वा मानुषदैवतं प्रमुमुदे चानन्दराजादिभिः ॥ ४१

इत्यनुपुराणे सूर्यवंशे कवीं० अध्यायः ॥ २

कवीन्द्र उवाच ।

इत्थं विनिगृहीतेषु मन्तुकारिषु मन्त्रिषु ।
अपरेष्वपि पापेषु ममतामतवर्तिषु ॥ १

तप्ततैलकटाहान्तः क्वाथ्यमानेषु केषुचित् ।
निशातक्रकचाग्रैः कर्तितेषु च केषुचित् ॥ २

चूर्णतां भृगुपातेन गमितेषु च केषुचित् ।
द्विरदोदग्रदन्ताग्रदारितेषु च केषुचित् ॥ ३

प्रकृतिष्वनुकूलासु विषयेषु वशेषु च ।
सेनाधिपेषु सर्वेषु विविधेषु विशेषतः ॥ ४

सर्वदुर्गेषु निर्विघ्नं निघ्नतां प्रापितेषु च ।
चकितेष्विव ताम्रेषु तटस्थेषु च सर्वशः ॥ ५

श्रीरङ्गपत्तनादिन्दुपुराच मङ्गाचलात् ।
सिंहलादन्तरीपाच सेतुबन्धाच दुर्जयात् ॥ ६

तथैव भागानगरात्पुराच विजयाह्वयात् ।
गजवाजिप्रभृतिषु प्राभृतेष्वागतेषु च ॥ ७

भूयिष्ठभुजमाहात्म्यममात्यपदवीं स्पृशन् ।
शम्भुराजमिदं प्राह कलशः सरसं वचः ॥ ८

कलश उवाच ।

स्थितोऽसि चिराराय हिताय जगतामिह ।
महामनेऽतिमहते द्विषतामहिताय च ॥ ९

अथ राज्याभिषेकाय त्वाय रैह्निरिमावज ।
भजतां राज्यलक्ष्मीस्त्वा सहृतां त्वं च तां भज ॥ १०

सद्यः शिवविपोगोत्थ वैक्लव्य विजिहासनी ।
तत्र त्वां क्षमामणे सिंहासनलक्ष्मीः प्रतीक्षते ॥ ११

गुरौ गते शिवे राज्ञि लघुता लघुतां गताः ।
त्वया भजन्तु गुरुता भूधरा रैधरादयः ॥ १२

सूनु मूर्धाभिषिक्तस्य त्वामनून गुणश्रिया ।
अनूचानजनेनोच्चैस्तत्तत्तीर्थाहृतैर्जलैः ॥ १३

महाभाग महाभाग भगीरथमिवानघम् ।
तत्राभिषिष्यमाण द्रागानन्दभरमेदुरः ॥ १४

आभ्या दृग्भ्यां कदा द्रक्ष्येऽभिलापमहो वहन् ।
निद्राणोऽपि महाराज निद्रा नोपलभेऽन्वहम् ॥ १५

एनामनल्सो होव कलशोदीरिता गिरम् ।
निशम्य रम्यविषया प्रयाणाभिमुखोऽभवत् ॥ १६

तत्र सेना सुमहतीं न्यस्य युद्धाभिमानिनीम् ।
स प्रास्थितपृथुप्रत्यः सत्रानीकेन भूयसा ॥ १७

अथ तस्याप्यनीनस्य भवन्दुन्दुभिरध्वनि ।
[1] दिक्तटानधिकाम्यर्णेन यः कर्णे जयध्वनि. ॥ १८

ततः कतिपयैरेव दिवसैर्भूदिवस्पतिः ।
सुखान्यनुभवन्नुच्चैर्वासवीं वसतिं प्रति ॥ १९

उपलभ्याभिलाषार्हविषयोऽतिशयोज्वले ।
बलेनात्मभुवा चान्तकल्पान्तहुतभुक्बले ॥ २०

प्रतापिनि प्रतापाद्रौ पृथुलोत्तनमेखले ।
स्थितामास्थावती तुष्टामुत्सृष्टतुलजापुराम् ॥ २१

शिवराजस्य हस्तेन निध्वस्ताफजलासुराम् ।
सद्य प्रसादाभिमुखीमुच्चप्रासादमध्यगाम् ॥ २२

तत्तदाभरणद्योतद्योतिताभ्यर्णदीपिकाम् ।
अतुला तुलजा नाम वरदा परदेवताम् ॥ २३

सिंहपृष्ठागतामष्टभुजामभयदायिनीम् ।
पुरोहितेन सहित सहित प्रोल्लसन्मना ॥ २४

स्वदृशोर्गोचरीकृत्य सर्वदा सर्वमङ्गलाम् ।
अमस्त स्वाय राज्याय सर्वमङ्गलमङ्गलम् ॥ २५

चन्दनागरुकाश्मीरक्षोदेन मृगनाभिना ।
वज्रवैदूर्यमाणिक्यमुक्तामणिभिरक्षतै ॥ २६

सौगन्धिकैरनेकैश्च सुमनोभि सुगन्धिभि ।
धूपैर्दीपैश्च नैवेद्यैरुपहारैश्च भूरिभि ॥ २७

अभ्यर्च्य देवीमभ्यर्च्यामुषितोऽपि च ता निशाम् ।
यथोचितव्रताचारपर परपुरञ्जय ॥ २८

पुरः प्रयातुमुदितो मुदितो मोदितद्विज ।
नासीरध्वनदुद्दामदत्तदानद्विपव्रज ॥ २९

घोरपङ्क्तिघटोद्घोषत्सङ्घट्टितककुप्तट ।
सोऽद्राक्षीद्द्रिङ्गिरिं दूराद्दिदूराद्दिद्विगत ॥ ३०

अथ धरमधिरह्य त प्रतापी
सह पटुना ध्वनितेन दुन्दुभीनाम् ।
सपदि सदसि पश्यते जनाय
व्यतनुत मङ्गलमात्मदर्शनेन ॥ ३१

इत्यनुपुराणे सूर्यवंशे निवासकरकवीन्द्र परमा० अध्याय

श्रीगोविन्द । धर्मेन्द्र उवाच ।

अथ शम्भुर्महातेजाः स्वर्णाध्यक्षनियोगिनम् ।
व्यधत्त पर्वते तस्मिन्यथार्हमधिकारिणम् ॥ १

तेषु तेषु प्रदेशेषु स्वर्णाध्यक्षाधिकारिणः ।
यथायोग्यान्विकल्प्याकार्यप्रकर्षेण विचक्षणः ॥ २

वैमात्रेयश्च संमान्य वसनाभरणादिभिः ।
तन्मातरं तथान्याश्च मातृस्तास्ताः सदुक्तिभिः ॥ ३

असामान्यमतिर्मान्यानन्यानपि महामनाः ।
कुबेरभवनाकारं कोशागारं व्यलोकयत् ॥ ४

तत्र रैङ्गिण्येऽमुष्मै सौहार्दगरिमस्पृशे ।
प्रणयात्प्रहितानीव प्रस्थानि स्वानि मेरुणा ॥ ५

पुञ्जीकृतानि रत्नानि स्वर्णानि च सहस्रशः ।
सप्रभावः स्वनयनातिथिभावमुपानयत् ॥ ६

अथ राज्याभिषेक[केऽस्य] प्रक्रान्ते पृथिवीपतेः ।
क्रमान्महः प्रववृते महीयान् रैमहीधरे ॥ ७

ततस्ते तेऽग्रजन्मानो बाहुजाश्च सहस्रशः ।
आर्याः शूद्राश्च बहुशः स्वस्वचर्याविशारदाः ॥ ८

तत्तद्देश्यास्तथा वैश्याः शैलूषा अप्यनेकशः ।
कुशीलवाश्च कुशलास्तत्तदातोद्यवादकाः ॥ ९

वैतालिकाश्चारणाश्च विरुदावलिपाठकाः ।
मार्दङ्गिका वैणिकाश्च गायनाश्चानुगायनाः ॥ १०

बह्वाश्चर्यमहेऽमुष्मिन्महेऽमुष्य महीभुजः ।
आययुः सह्यमचलं प्रस्थितः[ताः] स्वस्वनीवृतः ॥ ११

अथाभ्यर्हितवेशेषु तत्तद्देश्येषु राजसु ।
चिरस्यास्थानमास्थाय स्थितेषु स्थिरमूर्तिषु ॥ १२

मागधेषु च सूतेषु ब्रुवत्सु विरुदावलिम् ।
श्रवःस्वाद्येषु वाद्येषु ध्वनत्सु पटहादिषु ॥ १३

गायनैर्गीयमानेषु गीतिष्वपि च सुस्वरम् ।
नृत्यन्तीषु च वेश्यासु स्वर्वेश्यास्विव शोभनम् ॥ १४

क्रियमाणपरिष्कारेष्वमन्द मण्डपेषु च ।
देवेष्वाहूयमानेषु हूयमानेषु चाग्निषु ॥ १५

उपक्रान्तेषु विधिवत्साङ्गग्रहमखेषु च ।
परिवारसमेतासु मातृकास्वर्चितासु च ॥ १६

निशाचरघ्नमन्त्रेषु पठत्सु शुभहेतुषु ।
इद ज्ञानमिद ज्ञेयमिति जल्पत्सु केषुचित् ॥ १७

इत्थमात्मा परात्मेत्यमभेदः शिवजीवयो ।
वितण्डवादपाण्डित्यमालपत्स्वपि केषुचित् ॥ १८

शातकुम्भमयै कुम्भैर्गङ्गासागरयामुनैः ।
समाहृतैः पुण्यजलै कृतमाङ्गलिकाप्लवम् ॥ १९

कृताह्निक कृतमहानित्यदानमहोत्सवम् ।
कृतदेवार्चन प्रेम्णा कृतसौरभिपूजनम् ॥ २०

कृतप्रणाममाचार्यपितृमातृपुरःसरम् ।
कृतकौलमहादेवस्मरणश्चारुभूषणम् ॥ २१

कृतनान्दीमुखश्राद्ध श्रद्धावन्त यतव्रतम् ।
नानारत्नकृतापीड समस्तायुधभासुरम् ॥ २२

प्रतपन्तमिवादित्य दिनमध्यमुपागतम् ।
विप्राशिषा वेदघोषैर्मङ्गलैरपरैरपि ॥ २३

अनुवीत महोत्साह कृतपुण्याहवाचनम् ।
दक्षिणैर्लक्षणैः पूर्ण दीक्षोत्कर्षप्रदीक्षितम् ॥ २४

पुरोहितपुरन्ध्रीभि कृतनीराजनक्रियम् ।
आनन्दसम्भृतैर्लोकैरालोकितमनारतम् ॥ २५

उपात्तपूर्णपात्रीभि पूजिताभिरनेकधा ।
सुवेषाभिः सुवस्त्राभि सकुतूहलमादरात् ॥ २६

आलक्षित मृगाक्षीभि स्वाक्षै साक्षात्क्षमापतिम् ।
सम्भावयन्त भव्यैः स्वै. सभ्यान्सवीक्षणैरलम् ॥ २७

कम्पते न तरोः पत्रं मशकोऽपि न चेष्टते ।
शासनेन विना यस्य स कालः कोऽनुलङ्घते ॥ ४१

स्थिरः स्थिरायां स्थितये स्थास्यत्येष चिरं यदि ।
तर्हि मङ्क्ष्यति भूयोऽपि जराजन्मभरापदि ॥ ४२

अनेन देवीरचनात्प्रायेणाधिगतं फलम् ।
अतःपरमिमं स्वीयं प्रापयिष्यावहे स्थलम् ॥ ४३

प्रशाधि भारतं वर्षं समयो यावदस्ति ते ।
लोभमोहादयः सर्वे सहायास्त्वा ह्युपासते ॥ ४४

यथा दशरथस्यासीत्पत्नी केकयराजजा ।
तथैव तस्य नृपतेर्मोहितान्वयसम्भवा ॥ ४५

यास्ति प्रियतमा कापि देवैर्माययैव निर्मिता ।
महामोहस्य भगिनी मानुषीरूपमास्थिता ॥ ४६

ममता नाम सा तत्र तामसी तामसीनिभा ।
दैवादिष्टैव सपदि त्वदभीष्टं विधास्यति ॥ ४७

भवानप्यधिकारं स्वं वर्षे भारतसञ्ज्ञिते ।
यथाविधि विधायान्ते स्वं स्थानं प्रतिपत्स्यते ॥ ४८

इत्युक्तः किल कण्ठोक्त्या श्रीकण्ठेन कृपालुना ।
कलिरागम्य कैलासादिलातलमलोकत ॥ ४९

लोभमोहादयोप्येनं वज्रन्तमनुवव्रजुः ।
सैनिका इव राजानं याचका इव भूरिदम् ॥ ५०

मनीषिण ऊचुः ।

प्रमथानामधिपतेः प्रथितः प्रमथः पुरा ।
स आसीदिति शर्वोक्त्या कवीन्द्र ज्ञापितं त्वया ॥ ५१

केन पापविपाकेन कञ्च शापमवाप सः ।
किञ्च नामास्य तत्सर्वमिच्छामः श्रोतुमञ्जसा ॥ ५२

न हि शप्तुममुं कोऽपि शर्वपारिषदं प्रभुः ।
ऋते स्वामिनमीशानं पार्वतीं वा मनस्विनीम् ॥ ५३

फणीन्द्र उवाच ।

स तण्डिरेव नामासीद्वितण्डिरिति विश्रुत ।
पार्श्ववर्ती पशुपतेर्नन्दिप्रेष्ठ पृथुस्मय ॥ ५४

पीयूषसमपीयूषपरिपूर्णे मनोहरे ।
अतल्स्पर्शतास्पर्शस्पष्टपन्नगनिष्टपे ॥ ५५

भ्रमदिन्दिन्दिरे फुल्लदरविन्दपरम्परे ।
तपनोपल्सोपानकिरणश्रेणिकर्बुरे ॥ ५६

तरत्कादम्बकनके चरच्चक्रकदम्बके ।
तनुरिङ्गत्तरङ्गा त प्रतिमानितपुष्करे ॥ ५७

व्रती व्रतविधानार्थी महासरसि निर्भय ।
अवाचिनोत्सरोजानि स जातु सह भार्यया ॥ ५८

अत्रान्तरे द्रवत्सान्द्रिमरन्दमसृणात्मना ।
कदम्बचम्पकाशोकवनलग्नेन वर्त्मना ॥ ५९

जयाद्याभिर्वयस्याभि समन्त्र नित्र्पा स्थिताम् ।
गन्धर्वसुन्दरीवृन्दगीतसङ्गीतसादराम् ॥ ६०

विचेतुमब्जखण्डानि सद्यस्तत्र समुद्यताम् ।
झाङ्कारकारिमधुपी झम्पासम्पातकातराम् ॥ ६१

देवीं दाक्षायणीं नैष मनागपि ननाम ताम् ।
अथ सा सहसा किञ्चित्सहसा तमवोचत ॥ ६२

देव्युवाच ।

मदमन्दमतेऽकारि बत मन्तुरय त्वया ।
तदस्य दायते तुभ्य सान्दृष्टिकमिद मया ॥ ६३

दृष्ट्वा जन्मान्यनेकानि सृष्ट्वा धर्माननकधा ।
पृष्ट्वा पापमशेष च स्पृष्ट्वा तीर्थानि सर्वश ॥ ६४

भवान्दक्षिणदिग्वर्ती चक्रवर्ती भविष्यति ।
निहत्यैनस्विनो म्लेच्छान्सुरकार्यं करिष्यति ॥ ६५

जले स्थले च विजने वने निरवनेऽपि च ।
प्रपाते वज्रपाते च हेतिपात च सर्वत ॥ ६६

ग्रहाणां सन्निपाते च तद्वद्दल्लाहितेष्वपि ।
किं बहूक्तेन सर्वत्र स्वपार्श्वे पार्श्ववर्तिनी ॥ ६७

सततं पालयिष्यामि स्मृतमात्रैव सर्वथा ।
पावयिष्यति लोकञ्च तवैषा प्रथिता कथा ॥ ६८

तमंहसो निवृत्त्यर्थमित्युदीर्य दयावर्ता ।
प्रशशास प्रसादेन सती न तु शशाप सा ॥ ६९

सोऽथ तेनाहसा स्पृष्टः परिभ्रष्टः पदात्ततः ।
स्वरूपमात्मनो हित्वा विस्मृत्य च महीतले ॥ ७०

भ्रमन्मानुषदेहेन लब्ध्वा जन्मानि कानिचित् ।
वितण्डिर्जनुपानेन शिवराजो व्यजायत ॥ ७१

मया भवत्प्रयुक्तस्य वाक्यस्यार्पितमुत्तरम् ।
श्रूयतां चातिदुर्वृत्तेः कलेर्वृत्तं तदुत्तरम् ॥ ७२

स तदानीं रटद्दटयवनानीकसङ्कटम् ॥ ७३

विलुप्तयजनस्थानं जनस्थानं विलोकयन् ।
विकत्थमानोऽतितमां मोहादीनिदमब्रवीत् ॥ ७४

कलिरुवाच ।

हे हे मोहकामलोभमानक्रोधमदादय. ।
मन्नामेव हस्तेऽद्य विपने जगतीजय: ॥ ७५

कुलयोषिदिव स्पृष्टा यवनैर्दुष्टचेष्टितैः ।
अतीव बत निर्वेदवती गोदावरी नदी ॥ ७६

इदानीं फल्गुर्भूता प्रभूतावर्तवर्तिनी ।
न भाति सुस्नाताङ्कष्टा परित्यक्ता द्विजातिभिः ॥ ७७

जग्त्यर्थं वध्यते धेनुर्भिक्ष्यर्थं वध्यते द्विजः ।
पचार्थं चात्र भज्यन्ते यवनैर्यज्वनां गृहा. ॥ ७८

म्लेच्छाः सर्वे मम बलं म्लेच्छानामप्यहं बलम् ।
अत एतैर्मयाप्युच्चैराक्रान्तमवनीतलम् ॥ ७९

अविद्धधर्मप्रोल्लासपरित्रासमयेऽर्णवे ।
मया वाराणसी नाम नगरी विनिर्मज्जिता ॥ ८०

गुप्तमेव द्विजा स्नान्ति न जपन्ति तपन्ति न ।
यथा भागीरथीतीरे तथा वन मया कृतम् ॥ ८१

त्याजितैस्तुलसीदाम नाम चाप्रतिम हरे ।
माधुरैर्यवनत्रासाज्जीविताशा व्यमुच्यत ॥ ८२

दत्त्वा वरमनिद्देभ्य पश्चात्तापमुपेयुषा ।
क्वापि ज्वालामुखा देवा गुप्तेनाद्यापि तिष्ठति ॥ ८३

स्ववृत्तिमेव कुर्वाणा श्ववृत्ति सश्रयन्ति ये ।
अधर्म एव तैर्नून क्षत्रियैरद्य शिश्रिये ॥ ८४

दृष्टो गौडश्चाद्दुयाणस्तथा विन्ध्यस्य चाधिप ।
एतम क्षत्रियोऽमीषा म्लेच्छै सह युयुत्सति ॥ ८५

ये ये सुकृतिनोऽभूवन् कृतिनोऽपि दिने दिने ।
ते तेऽमज्जन्क्षितिभुज क्षुभिते मयि सागरे ॥ ८६

अनिद्धपतिना ह्यद्य क्षत्रिया काल एव ते ।
कालरूपेण विध्वस्ता शिव एको विशिष्यते ॥ ८७

आराधिनचरा दत्तवरा भगवती यत ।
अत सर्वनितानेन ताम्रवक्त्रा पराजिता ॥ ८८

त एते सह्यमादात् प्रागव्भन्त यदा यदा ।
अपराद्धपृषत्कत्वमन्वभूवुस्तदा तदा ॥ ८९

अनिद्धनिहितावर्तादार्यावर्तादुपद्रुता ।
अद्य सह्याद्रिमासाद्य सुखिन्य सन्ति देवता ॥ ९०

या विनिर्मितपूर्वा हि मया मद्धर्मपद्धति ।
साऽस्मिन्सह्याद्रिखण्डेऽद्यप्रभृति प्रचरिष्यति ॥ ९१

यत्र कार्मणससिद्धि सिद्धीना सिद्धिरुत्तमा ।
सम्यगङ्गपूजास्नान ध्यान मेत्रनिर्मीलता ॥ ९२

परसेवा महाभाग्य कृषिवृत्ति कुलीनता ।
सम्बन्धिभोजन धर्म पितु श्राद्धमुदारता ॥ ९३

पाखण्डवाद पाण्डित्य नास्तिक्य ब्रह्मवादिता ।
अदाक्षिण्य परिच्छद कार्पण्यमुचितज्ञता ॥ ९४

प्रतिष्ठार्थं पुण्डरीको वृत्त्यर्थं साधुवृत्तिता ।
व्यायामार्थं देवयात्रानमस्कारपरिक्रमा ॥ १०९

निवृत्त्यर्थं गुरुत्वादेर्गदस्योदरवर्तिनः ।
शिवरात्रिव्रतं तद्वत्सम्यगेकादशीव्रतम् ॥ ११०

चान्द्रं तथा हविष्यान्नं नक्तमेकाशनं तथा ।
कृष्यर्थं वार्षभीसेवा न तु धर्मार्थमागमनं ॥ १११

कले तव बलेनैव यवनैर्वृजिनात्मभिः ।
भञ्जिता मथुरा नाम तथा वाराणसी पुरी ॥ ११२

भञ्जिता च तथायोध्या युद्ध्वा युद्ध्वाप्यनेकधा ।
भञ्जितं च कुरुक्षेत्रं स्थाणुतीर्थसमन्वितम् ॥ ११३

अथारभ्य मदांधैस्तु सह्याद्रिः परिभूयते ।
यमिना शिवराजेन यद्यप्यत्र प्रभूयते ॥ ११४

धर्मं एव प्रवर्तन्ते मन्त्रिणोऽस्य विचक्षणाः ।
अतोऽमून्भ्रंशयिष्यामो यथामी स्युर्विलक्षणाः ॥ ११५

मन्त्रिणां लेखकानाञ्च सैनिकानाञ्च भूयसाम् ।
आश्रितानां श्रोत्रियाणां दीक्षितानां पुरोधसाम् ॥ ११६

सामाजिकानां सर्वेषां तत्तद्दानाधिकारिणाम् ।
हृदयानि प्रवेक्ष्याम करिष्याम स्वमीप्सितम् ॥ ११७

विलम्ब्यतां नापि मनाक्कार्यमवलम्ब्यताम् ।
आदिश्यतां विवेकेन केन किं क्रियतामिति ॥ ११८

कलिरुवाच ।

अये मोहमहो हन्त मनो हृत्वा समाविश ।
मदीयेन प्रभावेण प्रपूरय दिशो दश ॥ ११९

यशो ब्रह्मगिरिर्यस्य ब्रह्मविष्णुशिवात्मकः ।
ऋते त्वां तन्मतिभ्रंशं विधातुं प्रभवन्न कः ॥ १२०

अधर्मं पण्डितम्मन्यमण्णाजिं विशतु ध्रुवम् ।
दत्ताजिं द्विजविद्वेषो दम्भो नीराजिनामकम् ॥ १२१

मत्तं मयूरनामानममात्यं चापि मत्सरः ।
श्यामाभ्मानं श्यामजिनं मदलोभावुभावपि ॥ १२२

क्रोध पण्डितराजञ्च दानधर्माधिकारिणम् ।
स्तेयं सेनापतिं सर्वे नास्तिक्यं च पुरोधसम् ॥ १२३

राजप्रतिनिधिं राहुरित्याहुर्ये विचक्षणाः ।
आदिशत्यविवेकस्तमवसादितसज्जनः ॥ १२४

समास्थाय पदं स्वं स्वं निधत्ताथ पदं स्थिरम् ।
अथवा ह्यद्य सर्वेऽपि सर्वान्विशत माचिरम् ॥ १२५

इति किल कलिना विनीय गाढं
शिवनृपतौ मलिनात्मना नियुक्ताः ।
कथमपि निजकार्यभारभग्ने
शिरसि निजेऽथ यथा विभागमूहुः ॥ १२६

यन प्रोद्यत्प्रेन त्रिगतिविजयी निर्जितः पञ्चबाणः
किञ्च स्तम्भेन लोभोप्यहह विरचितो येन रेणुप्रमाणः ।
यश्चैवैकाधिकारी शिव इति विदितो यः सुमेरोः समानः
स लभे विप्रलब्धुं किल कलिवचनात्कोऽपि मोहः समानः ॥ १२७

इत्यनुपुराणे सूर्यवंशे क० अध्यायः ॥ ५

कवीन्द्र उवाच ।

अथ मोहः शिवनृपं प्रवेष्टुमुपचक्रमे ।
तथापि लोकपालाशतया तस्य न चक्षमे ॥ १

ततः सदाशिवेऽमुष्मिन्विचिन्तितसदाशिवे ।
स्वसारं निःसहं वीक्ष्य स्वसारं स्वामवाविशत् ॥ २

अथ माध्वीमधुरया मृदुगम्भीरया गिरा ।

आयतापाङ्गपर्यन्तगामिना वाक्षितेन च ।
स्नैग्धेन सुप्रसिद्धेन वैदग्ध्येन च भूयसा ॥ ४

व्यक्ताव्यक्तेन तन्मन्तुज्ञापकनेङ्गितेन च ।
मीनकेतोः सवयसा वयसा मध्यमेन च ॥ ५

अत्युन्नतेन घनयोः स्तनयोर्द्वितयेन च ।
माल्यबन्धोल्लसन्मौलेर्मौलेरान्दोलनेन च ॥ ६

स्तनभारविनम्रेण तिर्यग्वलनमञ्जुना ।
क्वणत्काञ्चीकलापेन तनुना मध्यमेन च ॥ ७

नमतोन्नमता धन्वसमेन भ्रूयुगेन च ॥ ८

ह्रीतकादम्बवृन्देन सिञ्जन्मञ्जीरशालिना ।
जितमन्दगजेनातिवल्गितेन गतेन च ॥ ९

स्फुरत्स्वर्णवलयश्रेणिसौष्ठवशालिना ।
परिहासकथावेशनस्तरालितमना ॥ १०

ऊर्मिकारुचिभिर्भीरनखरश्मिमहोर्मिणा ।
पाणिना ताम्रनलिनप्रतिमाततलेन च ॥ ११

ताम्बूलतानलेनापि मस्तकान्दोलनेन च ।
क्षुत्तृड्वेलापरिज्ञानविधिना च दिने दिने ॥ १२

वसनाञ्चलचाञ्चल्यवशात्प्रचलता मुहुः ।
अलकाना ललाटान्ता सम्यगाकुञ्चनेन च ॥ १३

मस्तकादविनस्निग्धमुग्धकुन्तलहस्तकात् ।
वसनान्तस्य चलतस्तस्थानीकरणेन च ॥ १४

अपत्रपाप्रपञ्चेन निचोलाडम्बरेण च ।
दर्शितोरसुविस्या लीलया च कयाचन ॥ १५

तेन तेन च वेषेण विशेषेण विलासिनी ।
राजानं रञ्जयामास राज्ञी मोहितदर्शना ॥ १६

सा तेन पत्या सुश्रोणी व्यभादतितमा तथा ।
सर्वास्वपि सपत्नीषु शशिना रोहिणी यथा ॥ १७

तस्यामजनयद्राजा राजारामाभिधं सुतम् ।
महतेऽनिष्टयोगाय ग्रहं केतुमिवोद्गतम् ॥ १८

शिशुः सुलक्षणोऽप्येष वैलक्षण्यमधात्तदा ।
उपचित्यापचित्या च पक्षे पक्षे यथा शशी ॥ १९

तत्तद्गुणगर्विष्ठासमसपत्नीषु सतास्वपि ।
राजारामस्य जननी पुत्रिणीऽधिकाऽभवत् ॥ २०

आरामेण दशोस्तेन राजारामेण सूनुना ।
मुमुदेऽभ्यधिक माता ममता नाम दानवी ॥ २१

मधुरास्फुटया द्राक्षासदक्षाक्षरया गिरा ।
स कीर इव वाचाल पितरौ समरञ्जयत् ॥ २२

त्रैमात्रेयममु शम्भोरम्भोजसमलोचनम् ।
व्रतास्तुत्यमपि प्रीत्या पिता स्तुत्यमिवास्तुत ॥ २३

मनीषिण ऊचु ।

कुलैकवर्मण प्रौढकर्मण शम्भुवर्मण ।
कनिष्ठमपि त कस्मात्प्रभु. प्रेष्ठममन्यत ॥ २४

कवीन्द्र उवाच ।

शम्भोरेव प्रसादेन शम्भु पितुरनन्तरम् ।
पृथिव्या सागरान्ताया. कर्ता राज्यमकण्टकम् ॥ २५

रहस्यमिति देवानामगम्य कलिस्तयो ।
अन्तरा वर्तमानस्तमन्तराय किलाकरोत् ॥ २६

अत स त महाबाहुर्महाबाहु महाद्युतिम् ।
द्वितीय स्वमिवात्मान जितात्मान प्रतापिनम् ॥ २७

प्रथित तेजसात्युच्चैश्चतुर्थमिव पावकम् ।
त्रयोदशमिवादित्यमादित्यपतिविक्रमम् ॥ २८

शम्भु शम्भुकृपावाप्त स्वनिष्ठ ज्येष्ठमात्मजम् ।
अवमत्य विमुग्धात्मा कनिष्ठ बहमन्यत ॥ २९

मनीषिण ऊचु ।

ममताया प्रसङ्गेन राज्ञि रायगिरीश्वरे ।
प्रावर्तत यथा मोहस्तथाभिहितवानभवान् ॥ ३०

अथ क्रोधादय सर्वे कलिकालनियोजिना. ।
समस्तान्प्रविविक्षन्तस्तास्तास्तत्राधिकारिण ॥ ३१

प्रावर्तन्त यथा येन यत्र यत्र यथा यथा ।
कवीन्द्र परमानन्द निरूपय तथा तथा ॥ ३२

यद्यदादत्त हस्तेऽसौ प्रतिपक्षवधोद्यत ।
तत्तद्विदुरता भेजे भगवत्या प्रभावत ॥ ६२

त भूपालमपारवाहुविभव मोहेन तेन स्वय
स त धीसचिव च नर्मसचिव क्रोधादिभि क्रोधिभि ।
आविश्येति निपात्यमानमपथ पश्यन्प्रतापाधिक
स्व मेने पुरुषार्थमात्मनि त्रिलोक्यर्थ कृतार्थ कलि ॥ ६३

इत्यनुपुराणे सूर्यवशे कवीन्द्रपरमानन्दप्रकाशितायामध्यायशतसम्मितायां
शुभलक्षणलक्षिताया वैयासिक्यामध्याय ॥ 6

मनीषिण ऊचु ।

कथ मोहस्य माहात्म्यमतिमानुषतेजसम् ।
सदाशिवार्चन यत्त यत्त शिवममोहयत् ॥ १

स यतोऽप्रतिमप्रेमा ममतामतमास्थित ।
शम्भुराजे महाराजस्तदा कथमवर्तत ॥ २

कवीन्द्र उवाच ।

कस्याञ्चन निशाथि यामवार विमनायिताम् ।
प्रसह्य केनचिन्मानसर्वस्वामिव दुःस्थिताम् ॥ ३

निशम्य सहसा राजा राजारामस्य मातरम् ।
विवर्णवदनस्तूर्णमन्त पुरमथाविशत् ॥ ४

तत्र चित्रमये तल्पे निषण्णे मणिकुट्टिमे ।
नि सहा निरलङ्कारा निराहारा निपेतुषीम् ॥ ५

चिरस्योपचरन्तीभि सख्यन्तीभिरन्तिके ।
अवनम्रमुखीमात्मसखीभिरुपवेशिताम् ॥ ६

निषण्णा स्तम्भमालम्ब्य विषण्णा स्तब्धविग्रहाम् ।
विद्रुमप्रावजप्रावमयी पाञ्चालिकामिव ॥ ७

दिने दिने ह्रीयमानतमा तनुमिवेन्दवीम् ।
दशादिग्व्यापिना स्वेन प्रसादेन विना कृताम् ॥ ८

परिव(प्र)श्नान्ता ता ता कान्ता समवगाहयन् ।
व्यवादम्य विशेषेण व्यवादक्ष वदन्निवे ॥ ९

नलिनीदलमादाय मृदुल मृदुमानस ।
सता माणि सता तत्र मन्द मन्दमवीजयत् ॥ १०

अयोर्वासलभ स्वेन पल्लवेनेव पाणिना ।
सतर्ष इव परपर्श भूयो भूय स तद्वपु ॥ ११

स्वपाणिस्पर्शमात्रेण प्राणता प्राणदस्तदा ।
वसुधावासव प्राह सुधारसकिर गिरम् ॥ १२

किमपूर्वमभूवेन यथापूर्व न बाक्षसे ।
अन्यादृक्षेव वामाक्षि कार्श्येनानेन लक्ष्यसे ॥ १३

शिरीषकुसुमप्राये काये च तव कश्चन ।
गदश्चेदगदङ्कारै सव एवापनायत ॥ १४

यदि नास्ति व्यथा कापि मानसे मानसीमिमाम ।
अयेऽपलप मा पद्मलपने लप माधुना ॥ १५

मुग्धे स्निग्धान्परिस्पृष्टनिटिलान्कुटिलानिमान् ।
समागतेन समया मया नियमयालकान् ॥ १६

मा विषीद विशालाक्षि निषीद मदुपह्वरे ।
विलसे स्वविलासेन हस परिहसेरपि ॥ १७

ममेव तव वामोरु सर्वा वसुमती वशा ।
अवलम्बस्व मामेव किं स्तम्भमवलम्बसे ॥ १८

स्पृश[स्य]से येन तापेन तमावदय सुव्रते ।
एनमेन इतोऽपेतमपनेतुमह यते ॥ १९

ईदृशीं त्वद्दशा वीक्ष्य न प्रायेऽहमयि प्रिये ॥ २०

एवमुक्ताऽमुना भूमे सुनासीरेण सर्वथा ।
अनुनीता सुवचसा प्रतिवाचमुवाच सा ॥ २१

राज्ञी उवाच ।

यशसा भवदायेन महीमिव हि मा हिमाम् ।
न कदाचन भूपाल तापस्तापयितु प्रभु ॥ २२

त्वया पीयूषहस्तेन नासत्यसममूर्तिना ।
दृष्ट्वा स्पृष्ट्वा च पृष्टाहमभव लब्धजानिना ॥ २३

मदर्थमबर्नापाए त्रिधा सञ्जीविनीमिमाम् ।
मुनि भार्गवमानाय्य कदा पठितवान्भवान् ॥ २४

त्रिश्च येनामयेनाऽहं दु सहेन वशीकृता ।
व्यथामेतावतीमेतवती तमधुना शृणु ॥ २५

सुकृतै सुकृतैर्लब्धो राजाराम शिशुर्मया ।
अदृष्टया दृश्यत होन शम्भुवर्मा महाशय ॥ २६

विजहासति चेदानीं त्वामिद मन्यम त्रय ।
दुरन्तया दिवारात्र दूयेऽहं चिन्तयाऽनया ॥ २७

समर्थ शम्भुरत्यर्थमसमर्थश्च मे शिशु ।
अमुना हेतुनाऽमुष्मिन्विमर्शे मदुपक्रम ॥ २८

मातर पितर पुत्र भ्रातरश्चापि सोदरम् ।
घातयन्ति महाराज राजानो राज्यलोलुभा ॥ २९

अनयोऽय यदनयोरुग्रविग्रहयोरिह ।
एकत्र स्थितिरेकेऽपि ग्रहयोरुग्रयोरिव ॥ ३०

भवन्तमिव त सर्वेऽप्यनमन्त नमन्ति हि ।
नून तदीयतामेतुमनीशोत्सहते मही ॥ ३१

अहयु स महाञ्छम्भुवर्मा त्व सचिवानिमान् ।
नमतो मा न मनुते तद्वेत्ति न किम्भवान् ॥ ३२

अद सुदु सह शल्यमन्त स्थ सोढुमक्षमाम् ।
रक्ष मा पक्षमात्मीय क्षमाजाने जहि क्षमाम् ॥ ३३

नियामक भवान्देवात्पारोक्ष्य भविता यदा ।
अविता भविता परय मत्पोतस्यास्य कस्तदा ॥ ३४

इदमुक्तवती सा तु स्वरोदारन्तुदारवम् ।
अभियन यथा मयस्तदा हृदपि दारवम् ॥ ३५

ततस्तद्वेदनावेगप्रव्यक्तकरुणारस ।
तद्वक्त्रमश्रुसंसिक्त नक्तकेन मर्मार्ज स ॥ ३६

त्रस्त नवाचहस्त च स्निग्धाञ्जनसमप्रभम् ।
स्वाभ्यां नियमयामास हस्ताभ्यो म महाप्रभु ॥ ३७

अथाक्षिप्य निवेश्याङ्के शशाङ्केन समाननाम् ।
जगाद ता दतान्धाम निःक्रिरत्नधिगाम स ॥ ३८

मा भैर्भीरु तत शम्भो स्वाभिकानिष्टशङ्किनी ।
अपथस्यास्य किं पान्थ स वत्स स गुणाग्रणी ॥ ३९

मत्प्राग्जन्मसखीपद्मसहोदरमुखी सती ।
मद्धर्मपत्नी या ह्यासीत्प्रथिता प्रथितान्वया ॥ ४०

शम्भु शम्भुप्रसादेन सुतमेन प्रसूय सा ।
जगाम सद्य स्व धाम स्वप्रलब्धेव देवता ॥ ४१

अत एव सुत श्रेष्ठ प्रेष्ठश्च मम शिक्षित ।
मयाप्यनवमन्तव्यो मन्तव्योऽन्यैरह यथा ॥ ४२

प्रतापी तपति ह्येष तपातप इव स्वयम् ।
हन्तह न सहन्तेऽद्य तेन धीसचिवा इमम् ॥ ४३

अह्युताभिपन्नास्ते सचिवा मामवाधिय ।
महीधीरमूर्धन्यरत्न नापसहन्तु तु ॥ ४४

यथेनत्रानयोर्वासस्वत्परित्रासकारणम् ।
अम्भोजनयने तर्हि शम्भोरस्तु स्थलान्तरम् ॥ ४४

इत्युक्तया तया तत्र निरपत्रपया पुन ।
स्वगत पृथिवीपाल प्रवक्तुमुपचक्रमे ॥ ४६

यदि चाहमनुग्राह्या प्रेयस प्रेयसी तव ।
यदि कर्तुमकर्तु वा त्वमीश्वर इवेश्वर ॥ ४७

तर्हि राज्यमिद राजन्राजारामाय दीयताम् ।
प्रौढाय शम्भुराजाय भवनान्यद्धि मृग्यताम् ॥ ४८

अनयावहमप्येनप्रणयार्थी स पार्थिव ।
तदुक्तमुररीचक्रे वामचक्रेण मोहित ॥ ४९

अथ हर्षभरोद्भूतरोमहर्षविभूषिता ।
अनीव सरसापाङ्गी कृशाङ्गी मधुरस्मिता ॥ ५०

हासेन परिहासेन विलासेन च भूयसा ।
रमण रमयामास रमणाया चिराय सा ॥ ५१

अथामुष्मिन्भूभृत्यनुभवति सौषुप्तिकसुख
चिरेण प्राग्भाग समयमिव भेजे दिनमुखम् ।
स्थिरीभूता सूता अपि भृशवत्प्रौढिविषयाम्
सुधाम्भोधे. सीमां वरदविरुदश्रेणिमपठन् ॥ ५२

इत्यनुपुराणे सूर्यवंशे निवासकर कवीन्द्रपरमानन्दकृतौ ममताग्रह-
विग्रहाङ्कुरनिरूपण नाम अध्याय: । 6

कवीन्द्र उवाच ।

शय्यानिशान्तपर्यन्तान्निशान्तेऽथ निशाम्पति ।
निशान्तेर सभावेश्म भाभि स्वाभिरभासयत् ॥ १

स्वर्णसिंहासनारूढ निरूढ स्वेन तेजसा ।
तमुद्यतमिवादित्य ददृशुस्तत्र सर्वशः ॥ २

बभाराभरण यद्यत्स क्षताभरणं भुवः ।
तत्तस्याभरणायैव न निजस्येति निर्णय ॥ ३

आस्थानीमास्थितेऽमुष्मिन्सुमनोभिर्मनोहराम् ।
सृष्टां स्वयम्भुवा भूमौ सुधर्माणमिवापराम् ॥ ४

स्तम्भा इवास्य सदसः सस्तभ्यात्मानमुन्नतम् ।
उपासाञ्चक्रिरे सभ्यास्तमभ्याशजुषोऽधिपम् ॥ ५

सञ्चरच्चन्द्रकिरणश्रेणीपुञ्जसमप्रभे ।
भ्राजमाने भुवोर्भर्तुरुभयोरपि भागयो ॥ ६

भूयो भूयोऽप्युद्गगनाभारदम्भात्प्रकीर्णके ।
प्राशंसतामिवोत्कर्षं जगत्यत्र परत्र च ॥ ७

यत्र यत्र प्रभोस्तस्य प्रचरन्ति स्म दृष्टय: ।
तत्र तत्र सरोजानामभवन्निव वृष्टय: ॥ ८

उभाभ्यामपि भागाभ्या बद्धाञ्जलिपुट स्थिते ।
विरेजतुर्निराजोऽस्य पुरो राजपरम्परे ॥ ९

अथ प्राचीमुखोल्लासविलासविनिवेदिनाम् ।
पठत्सु विरुदश्रेणीं निकुरम्बेषु बन्दिनाम् ॥ १०

स्वर्णवञ्जुलहस्तेन जयजीवेति वादिना ।
पुरुषेण सुवेषेण तत्तदन्वयवेदिना ॥ ११

उदितेन समं ह्येनमभिनन्तुमुपेयुषाम् ।
क्रमेण कीर्त्यमानेषु नामधेयेषु भूभृताम् ॥ १२

उच्चैस्तरां महाराज द्रष्टुमुत्कण्ठितात्मनाम् ।
सम्मर्दात्तोरणापान्ते मृष्यतामितरेतरम् ॥ १३

तत्तन्नावृदुपेताना मौलिभागेषु भूभुजाम् ।
समन्तान्निष्पतन्तीषु रत्नवेत्रलतासु च ॥ १४

घनदम्भोधिनाधिर्यमुद्रोद्भेदविधायिभि ।
भरेण भेरीभाङ्कारैर्दिक्षु भाङ्कारितासु च ॥ १५

व्यायामभवनात्सद्यो विनिर्यातो जितश्रम ।
प्रसादमधुरस्मेरवदनो मदनोपम ॥ १६

पाणिना चापमेकेन शरान्पञ्चापरेण च ।
कलयन्वलय भूमे सद्योऽनितुमिवोद्यत ॥ १७

अरव्यायततारस्क प्रोच्चस्कन्ध सुलोचन ।
विचक्षण क्षमाशाली महासत्त्व सुलक्षण ॥ १८

अतृप्तानामिवापत्य भूयो भूयो प्रपश्यताम् ।
आददानो दृगन्तेन समन्तान्नमता नता ॥ १९

अनार विनयोपेतै सवयोभि स्मयाञ्चितै ।
सुवेषै पञ्चषै सम्यगनुयाता महामना ॥ २०

द्वारि दौवारिकैर्दूरादत्तवर्मा दुरासद ।
उद्गच्चौवननावस्थो वनद्विप इवोन्मद ॥ २१

मध्यसभ सहस्रांशुसमे सिंहासन स्थितम् ।
सहस्रपत्रपत्राक्ष सहस्राक्षमिवापरम् ॥ २२

समुच्छलितवात्सल्यव्यक्तवीक्षणलालसम् ।
ननाम पितर शम्भुमौलिना चरणौ स्पृशन् ॥ २३

प्रणमन्तममु दोर्भ्या परिगृह्य स पार्थिव ।
उपावेशयदभ्यर्णे जयन्तमिव वासव ॥ २४

उपवेष्टु पुरा पित्राप्युच्यमानः पुनः पुनः ।
समर्यादे समर्यादः स बतोपविवेश न ॥ २५

तमैक्षन्त सभास्तारास्तारापतिसमश्रियम् ।
मेनिरे च समेष्यन्त्याः श्रियस्तस्याः समाश्रयम् ॥ २६

दुर्निरीक्ष्यो हि वैलक्ष्यात्सद सद्भिरुदीक्षितः ।
प्रराज महाराजकुमारोऽय सुशिक्षित ॥ २७

वेत्तार सर्वनीतीना भेत्तार परवक्षसाम् ।
बहु मेने महाराजस्तमामानमिवात्मजम् ॥ २८

अथ सञ्जातमध्याह्नसमयस्याभिधायके ।
ध्वनत्युदारगम्भीरमधुरस्वरमानके ॥ २९

शाखिशाखान्तनीडान्तर्निलीने पत्रिमण्डले ।
वाचयम इवातीव स्थिते सपदि निश्चले ॥ ३०

तपातपभयोत्तापतप्तात्मसु पदे पदे ।
स्थिरीभूतेषु पान्थेषु तरुप्रच्छायमण्डले ॥ ३१

यथामतमनन्ताध्वमध्यभागमुपागते ।
तान्तितः किमु विश्रान्तिकामे कान्तिपतौ स्थिते ॥ ३२

स्वेन भ्रूचेष्टितेनैव विनिर्दिष्टे महाशये ।
स्वाय स्वाय निकेताय प्रयाते राजमण्डले ॥ ३३

दत्तम्मिनमुख शम्भुपमु शम्भुदयाफलम् ।
वसन्तो वसुधालोकवृषा किल विगोऽप्यन् ॥ ३४

व्यपेतदोपमोजस्विप्रसादमधुरं मृदु ।
नयोपचितमत्युच्चैरोचत वचोऽर्थवत् ॥ ३५

शिवराज उवाच ।

महाभारमिद राज्य भारवाडिव दुर्वह ।
वोढु न क्षमते जातु साधारणगुणो नृप ॥ ३६

अष्टाना लोकपालानामशेष्याविनो नृपः ।
जायतेऽर्थाय जगतामनर्थाय विलापरः ॥ ३७

दानशौण्डित्वमिन्द्रस्य प्रतापो जातवेदसः ।
स तु दण्डधरस्यांशो यस्तु दण्डो यथोचित ॥ ३८

नैर्ऋतस्य ह्यमौघ्यत्व नीतिमत्त्व प्रचेतस ।
अनिलस्य बल चैकपिङ्गस्योच्चैः समृद्धता ॥ ३९

ईश्वरस्येश्वरत्व च गुणा येषा पृथक्पृथक् ।
यत्रैकत्र वसन्त्येते स राजा राज्यमश्नुते ॥ ४०

शृणु वत्स यथा राज्यमुपलब्धमिद मया ।
अतीव दयया देव्या स्वधिया च समृद्धया ॥ ४१

य आसीदिभरामस्य महमूदस्य चाश्रय ।
अल्लीशाहस्य च पद प्रविष्टस्य महाशय. ॥ ४२

श्रुतिस्मृतिपुराणेषु शास्त्रेष्वपि च सर्वश. ।
तत्त्वदर्शी महासत्त्व सत्यवादी दृढव्रत ॥ ४३

सकलस्यापि लोकस्य प्रियकारी महायशा. ।
कृशानुरिव तेजस्वी मनस्वी शौरिवि श्रिय ॥ ४४

सहस्रबाहुसदृश· शौर्ये धैर्ये धरासम· ।
ज्ञाता दातावदातात्मा स कारणिकसत्तम ॥ ४५

लक्षणानि मदीयानि सामुद्रिकमते पुन ।
पश्यन्समुत्समुत्साहशाली शाह पिता मम ॥ ४६

उदश्रनयसम्बन्धान्निबन्धाञ्जलिमप्रत ।
सम्बोध्य मा महाबुद्धिर्मिथ एतदभाषत ॥ ४७

शाहराज उवाच ।

अपर्याप्तमिति प्राज्यमपि राज्यमिद मम ।
तस्मादन्यस्य तस्याप्त्यै त्वया कार्य· परिश्रम ॥ ४८

सन्त्यन्येऽपि हि मे पुत्रा. येषामशा पृथक्पृथक् ।
तेन तेन विधानेन विभास्यन्ते नयान्मया ॥ ४९

नार्जयन्ति स्वत. स्व ये पित्र्यमेव तु भुञ्जते ।
ताननूनगुणोपेतानपि लोको न मन्यते ॥ ५०

सुत· सुविधना धत्ते पारोक्ष्येण यथा पितु ।
तथा खलु न सान्निध्यादिति नीतिविदो विदु ॥ ५१

मन्ये दुग्धोद एवादो मन्यते मतमुत्तमम् ।
प्रापयामास यः सद्य स सद्यश्चन्द्रमस शिवम् ॥ ५२

कल्पद्रुम सुरपुर सुधार्दीधितिरम्बरम् ।
विभूषयति सा भूषा क्षीरोदमपि सान्तरम् ॥ ५३

प्रकाशता सत्राशे मे प्रकाशात्मा स तेऽग्रज ।
प्रशास्त स्वेन वृत्तेन यौवराज्य प्रशास्ति य ॥ ५४

त्व तु पुण्य जनपद मदीय मदनुज्ञया ।
अनवद्यमते सद्य प्रपद्य परिपालय ॥ ५५

स्वस्य पूर्वेण पुण्येन पूर्वेषा च प्रथीयसा ।
आदेशाच्च महेशस्य पुण्यदेशाधिपो भव ॥ ५६

क्रमात्त्रिविक्रमस्येव पराक्रमवतस्तव ।
मेधाविन्महती मेधा मद [महत्]पदमुपैष्यति ॥ ५७

बल न केवल बुद्धेर्न च बाह्वोर्बल बलम् ।
उभे अपि बले यस्य मन्ये तस्य बल बलम् ॥ ५८

इदमादिश्यमाशिष्यमाचार्य[इदमाशास्यमादिश्य आचार्य] इव सुव्रत ।
पुण्यवान्पुण्यदेशाय प्रतापी प्रजिघाय स ॥ ५९

अथ येदिल्दिल्लीन्द्रराज्यद्वितयसीमया ।
सरिता भीमया नाम सुधासोदरनीरया ॥ ६०

शरदभ्रघटाशुभ्रसिकताङ्किततीरया ।
विराजमानमारामनगरग्रामलक्ष्मया ॥ ६१

अन्याभिरापगाभिश्च वापिकाभिश्च भूरिश ।
कामिनीकुचकाश्मीरकलुषाभिरशोषत ॥ ६२

चक्रकादम्बकवकप्लवप्लवपरिप्लवै ।
पर्यन्तस्फुरदुद्दामप्रच्छायद्रुमदामभि ॥ ६३

तर्कुटङ्कमुखोन्मृष्टशिलासोपानशालिभि ।
शशिबिम्बसमाकारै कासारै सुमनोहरै ॥ ६४

सरोवरैश्च बहुभि सरोजरुचिराम्बुभि ।
नितान्तमातपक्रान्तपान्थतान्तिनिवारकम् ॥ ६५

सदाफलसदापुष्पवृक्षससक्तषट्पदम् ।
सदावासमनायास प्रभवसर्वसम्पदम् ॥ ६६

अखर्वचेतसा सर्ववेदसा शर्वतेजसा ।
अपास्ततमसा तप्ततपसा प्रेष्ठमास्पदम् ॥ ६७

उपेत्य त जनपद पूर्वेषामात्मनः पदम् ।
अध्यवात्स सम सैन्यैः सोत्सव पुण्यपत्तनम् ॥ ६८

तदा प्रभावलीपालस्तथा पल्लीवनाधिपः ।
जयवल्लीपतिस्ते ते सामन्ता अपि सर्वश ॥ ६९

सह्यपर्वतपर्यन्तवर्तिनोऽन्ये च भूभृतः ।
विषयानन्तरस्ताम्रो येदिलश्च विशेषतः ॥ ७०

तत्र मे वर्तमानाय सभया इव सर्वशः ।
स्व स्व सम्प्रेषयामासुरुपायनमुपायतः ॥ ७१

आस्तामिदमथा वृत्तमवर्तत यथा यथा ।
सर्वत्र विदित सर्वैर्वेदितव्य न तत्तथा ॥ ७२

आसमुद्रमिद राज्य समर्थमधिकृ मया ।
विधाय दर्शितं खण्डपरशोरनुकम्पया ॥ ७३

दिनेष्वेतेषु मद्वर्ष्म विवशी कुरुते जरा ।
नेतु मा परलोकाय कालदूतीव सत्वरा ॥ ७४

अतो नास्थितचित्तस्य मम सम्पदिय तथा ।
पुर प्रस्थातुमुत्कस्य पान्थस्य वसतिर्यथा ॥ ७५

अथाह नि सहीभूय न सहेऽन्यस्य कस्यचित् ।
वचनश्चार्वपि यदा कथ राज्यमिद तदा ॥ ७६

सर्वमेतद्धि विन्यस्य वा मध्ये मूर्ध्नि कस्यचित् ।
त स्वर्गमपवर्गं वा हन्तु गन्तुमिहोद्यत ॥ ७७

उक्तिप्रत्युक्तिमान्युक्तिप्रत्युक्तिक्रमकोविद ।
कमनीय कनीयान्यस्तव भ्राता विमातृज ॥ ७८

अन्ते वयसि सञ्जात इति योऽतीव मे प्रिय ।
पश्य सोऽप्यस्य राज्यस्य न भाग भोक्तुमिच्छति ॥ ७९

भवास्तु स्वगुणोदग्र. समग्रा भुवमर्हति ।
वर्तेत वर्तिनव्येषु मन्त्रिणा सम्मते यदि ॥ ८०

यस्तु पश्यति नादर्शसदृशा मन्त्रिणा दृशा ।
स राजाऽराजता लब्ध्वा राजता भागधेयत ॥ ८१

प्रायो राजकुमाराणा गुणा एते सुदुर्लभा ।
सवयोभि सस्तुताना स्तुतानाञ्च पदे पदे ॥ ८२

एकस्यैकमिद राज्य द्वितीयश्च न विद्यते ।
शरीरस्येव सर्वस्य न विभागोऽस्य युज्यते ॥ ८३

अतोऽमुष्यापरस्यापि यतेऽहमुपलब्धये ।
त्वदर्थं वा तदर्थं वा यत्सर्वमुपयोक्ष्यते ॥ ८४

पर्यन्तनियकार्यस्य यावदागमन मम ।
त्व शृङ्गारपुरे तावत्तिष्ठ मनिष्टमानस ॥ ८५

तेन तातनिदेशेन वन्दनीयेन सर्वथा ।
अन्वशासमह सम्यक्कमेत्य विषय यथा ॥ ८६

तथा त्वमपि हे वत्स शृङ्गारपुरमास्थित ।
शाधि प्रभावर्ता सर्वा मन्त्रियोगानुसारत. ॥ ८७

गर्हिते रैङ्गिरावरिमन्महेंण धाल्मिनाऽधुना ।
असंहर्षैर्बहुभिः सार्धं वसतिस्तत्र मध्यमा ॥ ८८

यथा सेनासु सर्वासु यथा सेनाधिपेषु च ।
कोशाधिकारिषु यथा यथा राष्ट्राधिकारिषु ॥ ८९

यथा चराचरचरेष्वखिलेषु चरेषु च ।
यथा च परिचर्येषु यथा परिचरेष्वपि ॥ ९०

अमित्रेषु च मित्रेषु यथा साधुषु च मन्त्रिषु ।
यथा प्रजासु सर्वासु यथाऽऽयेषु व्ययेषु च ॥ ९१

अपरत्र च नरेन्द्रेण वर्तितव्य यथा यथा ।
तथा तथाऽप शिक्षेथास्त्वमाचार्यादतन्द्रित ॥ ९२

स्फुरत्स्वस्फुट लोके कठोरमपि कोमलम् ।
पद्माभा भासमानस्य भ्राजमानस्य भानुवत् ॥ ९३

परिशुद्धमति सर्व निशम्य वचन पितु. ।
महाराजस्य सविधे सविनय समुल्लसन् ॥ ९४

अथा अपदसम्बा अमगाधमपविस्तरम् ।
उपपत्तिमदल्पार्थ समर्थ वाक्यमब्रवीत् ॥ ९५

शम्भुरुवाच ।

आदिशन्ति यदेतस्मै पिता माता गुरुस्तथा ।
तदनेन विधातव्य कदाचिदपि नान्यथा ॥ ९५

निशम्याश्रुतपूर्व हि भवदीयमिद वच ।
चिरेण जगतीपाल जनयित्री मया स्मृता ॥ ९६

न पिता न पुनर्माता न भ्रातापि सहोदर ।
नियतिर्नियत हेतुरसुखस्य सुखस्य च ॥ ९७

भवानेवावनि सर्वा प्रजास्तु शतश समा ।
स्वारा येऽपि न रज्येत त्वद्वियुक्तस्य मे मन ॥ ९८

येनाजितमिद राज्यमर्जयिष्यति चापरम् ।
स भवानस्तु मे नित्यमस्तु वा मास्तु वापरम् ॥ ९९

समर्था एव जायन्ते समर्थाना कुले नरा ।
न बाजगुणमुज्झन्ति जातु दीपा इवाङ्कुरा ॥ १००

असमर्थे सुते पित्रोर्वात्सल्यमधिक यदा ।
स एव सचिरे सार्द्ध प्रगास्ति पृथिवा तदा ॥ १०१

असमर्थ समर्थाच्चेत्समर्थश्चासमर्थत ।
तर्हि तद्धेतुदोषेण तावभव्यावुभावपि ॥ १०२

यस्मादुत्पद्यते यस्तु तदन्य स न सर्वथा ।
अन एतद्विभागार्थो व्यवहारस्था वृथा ॥ १०३

याचते पितर यस्तु पि यमर्थ सुत स न ।
न प्रयच्छति यस्तस्मै तस्य त स पितापि न ॥ १०४

आढ्नस्य महाराज गृहा स्वऽपि सुदुर्भरा ।
विनिगापोऽस्तु सुभरा समग्रा सागराम्बरा ॥ १०५

मातरस्य नर मस्था [वश्यास्तु] समस्ता अपि सिद्धय ।
सम्पदश्च यथा काता अभिगम्यामुपागता ॥ १०६

धैर्यमात्रमहायस्याप्यसहायस्य भूपत ।
उत्तु' प्रजाभयस्योचैर्वशे वर्तमा धरा ॥ १०७

उभाभ्यां कालकामाभ्यां भ्रातृभ्यामथ भूषितम् ।
ब्राह्म्या श्रिया भ्राजमानं ब्रह्मण्यं ब्राह्मणैर्वृतम् ॥ ९

सम्यगभ्यर्च्यमभ्यर्च्य प्रणम्यापि च भार्गवम् ।
इन्द्रद्युम्न इव द्युम्नं मौक्तिकैर्भूरि दापयत् ॥ १०

अथैष धीनिधानेन प्रधानेन द्विजन्मना ।
विश्वनाथाभिधानेन सावधानेन साधुना ॥ ११

मुदितैर्दानमानाभ्यामात्मप्रत्यायितात्मभिः ।
जनैः कतिपयैर्युक्तं तथा परिचरैर्नरैः ॥ १२

अहर्दिवं द्रवद्दानद्रवार्द्रैर्भद्रजातिभिः ।
दन्तिभिर्हरिदश्वाश्वसमैरश्वैश्च कैश्चन ॥ १३

परार्ध्यैर्भूषणैस्तैस्तैरम्बरैश्च यथोचितैः ।
कियतापि च कोशेन सम्भाव्यश्लाघ्यविक्रमम् ॥ १४

प्रश्रितं तनयं ज्येष्ठं नयं मूर्तमिवात्मनः ।
निधाय शृङ्गारपुरे शृङ्गारमिव सम्पदाम् ॥ १५

समुद्धृत्य च वात्सल्यरसे मज्जन्निजं मनः ।
महाभागः स्वयं भागानगराभिमुखोऽभवत् ॥ १६

शम्भुस्तु तादृशीं तत्र पितुराज्ञां प्रमाणयन् ।
अर्चाकरज्जगत्यत्र यशसामिव सञ्चयम् ॥ १७

महाटवीमयेऽमुष्मिन्विषमे विषये वसन् ।
अन्वभूदन्वहं धन्वी धन्वविद्यामयं रसम् ॥ १८

अह्नः स आदिमे यामे व्यभाद्व्यायामलीलया ।
उद्यत्तनुतमस्वेदकणमुक्तागणश्रिया ॥ १९

दशचाष्टौ पुराणानि क्रमेण श्रुतवानयम् ।
नयं कामन्दकाद्युक्तमितिहासानपि स्वयम् ॥ २०

प्रवर्तांकुर्वता लोके स्वेन वृत्तेन सर्वतः ।
अमोघेन महौघेन स्वमनस्का प्रमर्दना ॥ २१

परिपाल्नितवास्वर्थं धर्मसम्प्रमृतया ।
भूतानुकम्पया कामसौरभेय्या गृहे गृहे ॥ २२

अथ राजकुमारस्य पश्यतो योगमुद्रया ।
अभयाशसिना साक्षात्समनायतरा भरा ॥ ३७

मणिमन्दिरमध्यस्थस्वर्णसिंहासनस्थिता ।
योगिनीभि परिवृता कौसुम्भवसनावृता ॥ ३८

रञ्जिताशापदिकोणै शोणै पदनखांशुभि ।
नमतोऽस्य प्रताप्णापपटलक्ष्मीं वितन्वता ॥ ३९

त्विषा चक्षूंषि मुष्णद्भि पुष्णद्भि पुण्यसच्छ्रियम् ।
दिव्यैराभरणैर्युक्तापदप्रपदग्रतिभि ॥ ४०

क्वणत्किङ्किणिकादामरशनादामजन्मभि ।
पूरयन्ती प्रसर्पद्भिर्नाभाकुहरमंशुभि ॥ ४१

प्रत्यङ्गुलिदलन्यस्तचित्ररत्नाङ्गुलीयका ।
हारवैदूर्यनिर्माणहेमकेयूरकङ्कणा ॥ ४२

लग्नमुक्तामणिमयग्रैवेयकलन्तिका ।
मार्तण्डमण्डलद्योतिमरत्नस्वर्णकुण्डला ॥ ४३

सायुधाष्टादशभुजा प्रसन्नवदनाम्बुजा ॥
मृदुग्रीवा कम्बुकण्ठी कलकण्ठी समस्वरा ॥ ४४

कीटकोटीररत्नार्चिमण्डलेन विसारिणा ।
आबिभ्रती शिरस्युच्चैरातपत्रमिवापरम् ॥ ४५

किरीटप्रोल्लसद्रत्नप्रभापटलमामन ।
प्रोल्लासयन्ता मार्तण्डबिम्बप्रस्पर्द्धिविभ्रमे ॥ ४६

शुद्धाञ्जनातिसंशुद्धनीलेन्दीवरलोचना ।
ज्योत्स्नाहरद्युतिभरमुक्ताभासुरनासिका ॥ ४७

मल्लिकादामसम्बद्धधम्मिल्लालिमनोहरा ।
अरुणारुणविभ्राजकुङ्कुमाञ्चितगाधिका ॥ ४८

विद्या विभम्य जननी वत्सेऽस्मिन् प्रस्नुतस्तनी ।
कुन्दकुड्मलसङ्काशदा श्रीवरदायिनी ॥ ४९

प्रादुरासीत्प्रतिनिधिप्रदीप्या जातवेदस ।
सहसोद्दामितनभा तडिश्चाग्निसमप्रभा । ५०

कलिग्रहग्रहाविष्टान्प्रविष्टान्राक्षसैरिव ।
पितु प्रधानान्कुमतीन्नियन्तासि नियामक ॥ ६४

ये ये तवाहिते युक्ता सक्ता दुर्मन्त्रमन्त्रिते ।
शम्भुराज क्षपयिता भवान्भुवि भविष्यसि ॥ ६५

मद्रहस्य प्रशस्य च यशस्य पल्लविष्यसि ।
मद्भक्तिभावनिरतो मदर्चाया रत कृती ॥ ६६

विहाराहारलीलासु तृप्तिमुच्चै· समेष्यसि ।
काल लीलावतीलोलललितैर्गमयिष्यसि ॥ ६७

तेजसा भास्वर साक्षाद्बुध्या जितशतक्रतु ।
प्रतापतापितारातिर्बृहद्भानुरिव स्वयम् ॥ ६८

धर्मे समधिको धीमान्धीर पुण्यजनाश्रय ।
निजदण्डाप्रदमितदुष्टो दण्डीव भासुर ॥ ६९

प्रचेताश्चेतसा स्वेन प्रचेतृविजयोद्धुर ।
प्रभञ्जनो विपक्षाणा वृक्षाणा वा प्रभञ्जन ॥ ७०

धनद पण्डितकविविप्रवृन्दस्य सर्वद ।
ईशो महेशपद्मसेवाभरसमुत्सुक ॥ ७१

नारायण इव श्रीमान्महामानी जितक्लम ।
विजयी विनयोपेतो नयोपेतो जगत्स्तुत ॥ ७३

मान्धातेव क्षमाक्षेमदक्षो दक्षिणलक्षण ।
रक्षको द्विजदेवाना गवामाश्रमिणामपि ॥ ७४

अनन्तसत्त्व प्रथितो जिताऽखिलपरिश्रम ।
नलवन्नरपालस्य कृपालु करुणानिधि ॥ ७५

दम्भोत्कर्षप्रकर्षेण घोषितो जितरोषण ।
शोषण शत्रुवदनतोयस्य नहुषो यथा ॥ ७६

पोषणो यज्ञचैत्यादियतिषड्वन्धमण्डले ।
ययातिरिव धर्मिष्ठ सुशर्मिष्ठ प्रिय सताम् ॥ ७७

आजमीढ इवार्तीव निरूढो धर्मसम्पदम् ।
विरूढकीर्ति सर्वत्र रूढो विनयमण्डलम् ॥ ७८

Footnote on p 72 contd the author s second suggestion in his own d

क्षोणिपालानिवाशेषानन्यानवज्ञानानवग्रहम् ।
क्षपयिष्यसि तान्प्राणान् रामो क्षोणिपालानिव ॥ ७९

म्लेच्छानां यवनानां च यशःपारसिनामपि ।
गुरासनानामुग्राणां मोगलानां तुरुष्किणाम् ॥ ८०

सेवसग्यदसुल्लाणपीरजादतुराणिनाम् ।
इराणिनां पठाणानां फेरङ्गिणां वमायिनाम् ॥ ८१

आरब्बानामिङ्ग्रजानां वलन्देजादिनामपि ।
अम्भोधिदुर्गदुर्गाणामम्भोधावेव गामिनाम् ॥ ८२

निरातानाममाराणां सागरानूपवासिनाम् ।
काटकानां कठोराणां महर्निशम् ॥ ८३

असतामतिसाङ्कर्यजातीनामतिनिग्रहम् ।
करिष्यसि कुमाराभो विक्रमो निग्रहे दृढम् ॥ ८४

कर्णाट प्रमहाराष्ट्रचोळकोङ्कणमूरकान् ।
गौडद्रविडसाव तपत्तनानि सहस्रशः ॥ ८५

वैराडपुण्यमगधकल्हाडकरवारकान् ।
वैजापुरायान्याकांश्चि पुण्डा देशाधिपानपि ॥ ८६

पालेगारान्नरपतीन्कांश्चिद्ग्रामाधिपानपि ।
महाहवमरोदग्रनानास्थानाधिपानपि ॥ ८७

दरादुर्गाश्रयान्कांश्चित् कांश्चिदारण्यदुर्गहान् ।
कांश्चि सेनापतीन्कांश्चिदधिपा दुर्धरानपि ॥ ८८

पालयिष्यसि विक्रम्य शक्रस्तु त्रिदिवं यथा ।
शम्भुराज महाराज स्तुल्यामा यैरभिष्टुत ॥ ८९

विचित्रगुणसम्पन्न पुत्रश्चाधिगमिष्यसि ।
सर्वसाम्राज्यपदरामतामनुभविष्यसि ॥ ९०

अल होमविधानेन तपसाऽपि जपेन च ।
सर्वेऽर्थास्तव ससिद्धा म प्रसादादितः परम् ॥ ९१

इति विहितसमाधिं शम्भुभूप स्ववत स
सकरुणहृदयश्चा कालिका कौतुकेन ।

प्रखरकदम्बैश्ठदयित्वा तदानीं
सपदि निजसखीभि सा तिरोभावमैच्छत् ॥ ९२

तस्मिन्ध्याने प्रकाम प्रथिततमगुणस्तोमलक्ष्मीन्दधानो
राज्यश्री साभिमान क्षितिपतितिलकस्याग्रजन्मा तनूज ।
लब्ध्वा नानावरीव निजहृदि सतत सस्तुवश्चाभिनन्दन्
प्रेम्णा देवामुदारामतिमुदमधिकामावहन्काञ्च शोभाम् ॥ ९३

दत्वा दत्वा प्रशस्तानभिमतविभवान्काश्चिदुच्चैर्वरीवान्
यातायां स्व निकेत झटिति निस्वत वालिमायामजस्रम् ।
भक्त्या सन्दर्शनाथा चकित इव भवद्[न्] वञ्चित तद्वियोगात्
स्वात्मान प्रौढमानी व्रत महिततमो भावयामास भूप ॥ ९४

अन्तर्भाव गतायामभिमतफलदानोद्धुराया भवान्या
वह्ने पूर्णाहुतिं ता समुचितसुरभिद्रव्यमिश्रे सुपक्वे ।
मखैर्मांसैस्तथान्नैरपि परिकलयन्होमशेष समाप्य
प्रत्येक ऋत्विनानामददादभिनवान्मेरवत्स्वर्णपुञ्जान् ॥ ९५

ऋत्विग्भ्यो दक्षिणा ता कनकमणिमयीं सन्ददानोऽतिवेल
दक्षो दाक्षिण्यशील सुरभरविटपिश्रीभर सम्भार ।
तत्र य तान्त्रिक त सकलमपि पर पूर्णता प्रापयित्वा
विप्रेभ्यो भूरि भूयो द्रविणमपि चिराद्दापयामास भक्त्या ॥ ९६

दत्वान्न ब्राह्मणेभ्यस्तदनु च विलसच्छ्रीभरोदग्रकर्मा
सद्धर्मासक्तचित्त समधिकविभवो धर्मवद्धर्ममूर्ति ।
अश्वन्निष्णातबुद्धि परममृतमिति क्षुण्णशास्त्रैकवाच
सत्त्वोद्रिक्तो विरेजे रघुरिव सुलघूभूतदुर्दान्तशत्रु ॥ ९७

इत्थ सर्व समाप्य प्रथिततममती शम्भुराजे स्वराज्य
प्राज्य पित्रा प्रदत्त विमपि च विभवै शासति प्रौढभाजि ।
दिल्लीन्द्राय प्रगल्भा प्रतिनगरमहो सञ्चरन्तश्चरास्ते
प्रादुर्वृत्तान्तजात निल कलिकलित स्वामिनोऽग्रे प्रशशु ॥ ९८

कर्णाटासुभटान्महाप्रतिभटाञ्जेतु प्रयाते शिवे
क्षोणीन्द्रैकशिरोमणौ स ममतामोहेन सम्मोहिते ।
उद्विग्नोऽपि सुरेन्द्रतुल्यमहिमा श्रीशम्भुराज कृती
सङ्कल्पामि[च्छेय] कदा मुदाय यत्नैरित्थ मन सन्दधे ॥ ९९

यदात्थ मद्धित मह्यमिदानीं सविदा स्वयम् ।
तत्तथा भविता सर्वं नान्यथा हि ममाशय ॥ २२

एक एवान्तरा मास्ति सर्वेषामिति यच्छ्रुतम् ।
तन्मया मन्मतामिज्ञवल्लेखालोकनात्स्मृतम् ॥ २३

किन्तु निश्चस्य य सर्वममु स्वविषय मयि ।
निर्विशङ्क स्वयमगाज्जिगीषुर्विषयान्तरम् ॥ २४

तस्मिन्ननागते सद्यपतौ सद्यममु प्रति ।
भवदुक्ताय यानाय मन्मतिर्न हि सम्प्रति ॥ २५

विगणय्य निज श्रेयो नावज्ञेयो गुरुर्मया ।
क्षिन्त्वमु प्रीणयिष्यामि स्वभुजा जितया श्रिया ॥ २६

मदीय पद्मादातु मम च स्यात्परिश्रम ।
किं पुनर्यदि मत्पक्षे दिल्लीन्द्रोऽस्य महोद्यम ॥ २७

मत्पक्षी भवता पत्र प्रहित भवतात्र यत् ।
तत्पत्रमेव मे प्रमपथपात्रत्वमीयुष ॥ २८

तस्य मा प्रति तत्पत्रान्मम त प्रति च स्वत ।
यदभू प्रतिभूस्तस्मादुभयत्र प्रभूयसे ॥ २९

मह्य मदीयमात्रेच तदीयमपि तत्कृते ।
मध्यस्थेनेव भवता माध्यस्थमुरीकृतम् ॥ ३०

निर्दिष्ट यत्त्वयोद्दिश्य स्नेहस्थामवमत्र माम् ।
घटेत न घटेतेति सशयस्तेऽस्तु तत्र मा ॥ ३१

दत्ते शम्भवे शम्भुर्देल्लाय च दर्पिणे ।
स्व स्व लेखमिम गुप्ततम प्राहिणुता मिथ ॥ ३२

तत्रानयो पुनर्लेखास्तथाऽन्योन्यमुपाययु ।
यथा सन्धिसन्देह स एव दृढता दधौ ॥ ३३

शम्भु स्वेभ्य सखिभ्योऽपि तमुदन्तमपालयत् ।
दल्लोऽ वदय दिल्लीद्यपिनश्च स्वाशय ॥ ३४

अत्रान्तरेऽतिविक्रान्तमासान्तानीस्नीवृतम् ।
युद्धामिमानिमिर्मन्यमाणिभिर्बहुभिर्वृतम् ॥ ३५

कवीन्द्र उवाच ।

अथासीन स पर्यङ्के सरोरुहविलोचन ।
पश्यन्पुरो मयूरादीनवादीद्वदता वर ॥ १

राजोवाच ।

मयेदमिव तद्राज्य शृणुत प्राग्समर्जितम् ।
अनयो कतरस्मै कुमाराय प्रदीयताम् ॥ २

ज्येष्ठे ज्येष्ठ कनिष्ठे च कनिष्ठमिति य क्रम ।
प्रकृते स न मार्गो हि राज्यपोरनयो सम ॥ ३

वर्तमानऽपि सर्वेऽस्मिन्नस्मेऽनवमद्युति ।
क्षारकण्ठ स वसो मे न दूरे स्थातुमर्हति ॥ ४

शम्भुरेव ततस्तस्मिन्निवेश्य इति मे मति ।
निश्चिता स्यान्मतिमता भवता यदि सम्मति ॥ ५

इत्य तेनाऽनुयुक्तेषु मयूरस्तेषु मन्त्रिषु ।
विमर्शभरनिर्मुष्टामुद्दिष्टामगमद्गिरम् ॥ ६

घटकारो घट स्वेन करोति च करोति न ।
दण्डचक्रादयस्तत्र परन्तो न किञ्चन ॥ ७

तथा कर्तुमकर्तु च प्रभुणैव प्रभूयते ।
परन्त्विह सहायैस्तु तद्यशो नानुभूयते ॥ ८

त च दशमिम चोचे शम्भुरेव जिघृक्षति ।
अमुष्मै महतेऽर्थाय दिल्लीन्द्रश्च दिदृक्षति ॥ ९

जिता सर्वसहा येन सहायेन सुपर्वणाम् ।
त सुत स्पृहयत्यस्य साहाय्याय सुरद्रुहाम् ॥ १०

तितीर्षति बत ह्यय दिल्लीन्द्रपृतनार्णवम् ।
नयेन यानपात्रेण न येन युयुजे स्वयम् ॥ ११

अल्लालभाव बिभ्राणा किरदन्तीयमुत्थिता ।
हेयपस्य सह्याद्रि नाथस्य तत्र पश्यत ॥ १२

महाराजकुमार त महाराजमिवापरम् ।
मन्यामहे वय सर्वे खर्वेण शिरसा वहम् ॥ १३

अपश्यत पश्यतामूनमात्यान्पश्यतोहरान् ।
इत्थं परिहसत्यस्मानेष नन्तुमुपागतान् ॥ १४

प्रजा इव प्रजा पाति समन्तादभयप्रदः ।
अथ कः स्यात्समुद्धर्ता राजभागस्य मज्जनः ॥ १५

न केवलेनाभयेन प्रजा प्रददते धनम् ।
सम्यगभयं प्रदर्श्यापि ताभ्य आदीयते धनम् ॥ १६

न धनेन विना सैन्यं न सैन्येन विना जयः ।
न जयेन विना राज्यं न राज्येन विना सुखम् ॥ १७

अनुयुक्तोऽनुयोक्ता यद्युक्तायुक्तोपपत्तिषु ।
तत्र व्यक्तं वदेदुक्ता न त्वव्यक्तं कदाचन ॥ १८

प्रसिद्ध एव दिल्लीन्द्रः ससिद्ध्या स दुरासदः ।
किं पुनस्तेजसानेन भवदायेन सङ्गतः ॥ १९

साहसी सहसोपेक्ष्य समृद्धां श्रियमात्मनः ।
अहो अनुसरत्येष यवनानाततायिनः ॥ २०

यावदत्याहितं नैति तावत्प्रतिविधीयते ।
न कूपखननं स्थाने दह्यमाने निकेतने ॥ २१

इति विज्ञाप्य तं भूपमन्योन्यमुखदर्शिभिः ।
तन्मतस्थायिमतिभिर्नोविमतस्थायि मन्त्रिभिः ॥ २२

तदुक्तामुक्तिमाकर्ण्य स तु नीतिमदग्रणीः ।
वेल्लनीमादितः करे साश्रूणी दधदक्षिणी ॥ २३

प्रजाभ्यो ह्यभयं दत्वा निरुणत्सि धनागमम् ।
अवजानासि चामात्यान्ममात्मानं इवाग्रहम् ॥ २४

उत्तिष्ठ शृङ्गारपुरात्तिष्ठ सज्जनपर्वते ।
इङ्गितज्ञाय कथया किं सौजात्यवर्तवर्ते ॥ २५

पद्यद्वयमिदं सम्यग्विलिख्य स्वयमीशिना ।
शम्भवे प्रापयामास पुरुषेण विजानता ॥ २६

तन्मुद्राङ्कमदः पत्रमानपत्रमिवात्मनि ।
मन्यमानो महाराजकुमारोऽयं व्यराजत ॥ २७

प्रस्थित सज्जनगिरिं शम्भुराज स्वय यदा ।
मेने शृङ्गारनगर नगर न जनस्तदा ॥ २८

अथोपकण्ठमायातमकुण्ठमतिवैभवम् ।
चरेणावेदितचर प्रमोदितचराचरम् ॥ २९

तनय स्वामिन शम्भुनामक धनदायकम् ।
प्रत्युद्गम्य प्रणम्यापि सपदि प्रभुशासनात् ॥ ३०

स्थायुकस्तस्य दुर्गस्य दुर्गमादपि दुर्गमम् ।
पुर सरै॰ परिचैरस्तथा सहचैर्नरै॰ ॥ ३१

सुधिया विश्वनाथेन नाथनिर्देशवर्तिना ।
द्विजैरन्यैश्च सहित तत्तद्विद्योपजीविभि ॥ ३२

पिनद्धकवच सज्ज सायुध सपरिच्छदम् ।
सपताक सपटह सनाह नरवाहनम् ॥ ३३

सुविनीत पुरोभूय पुर सर इव स्वयम् ।
प्रापयामास शनकै सज्जनाद्रिशिरोगृहम् ॥ ३४

असुभि सम्मतेऽमुष्मिन्सज्जनाद्रिमिते सुते ।
असज्जनमिवात्मानममस्तात्मनि पार्थिव ॥ ३५

सज्जनाद्रिर्जनाह्लादविज्ञाननिधिनाऽमुना ।
अधिरूढेन समभादुदयाद्रिरिवेन्दुना ॥ ३६

कदाचिदर्धरात्रेऽमु सुप्त तत्र निकेतने ।
नियोगेन त्रिलेश्वर्या प्राह वागशरीरिणी ॥ ३७

वत्स गच्छ द्रुत तत्र यत्र दिल्लापतेर्बलम् ।
प्रस्थितस्य तवाध्वान प्रतिरुद्धु न केऽप्यलम् ॥ ३८

प्रत्यूषे तु समुत्थाय स पूर्वेव श्रुतिं वहन् ।
न्यगदद्द्रुतमानाय्य सज्जनाद्यधिकारिणम् ॥ ३९

महातार्थ खलु महाबलिसङ्गमनामकम् ।
यदुद्धरति न स्नानमात्रेण बन नामकम् ॥ ४०

अद्य तथाप्यह तावत्त्व तारकवत्क महत् ।
प्रस्थापय मया साक स्थापयात्राऽपि निश्चन ॥ ४१

अस्त्यन्तिके हि महती ताम्रास्यानामनीकिनी ।
अथवा किं तया कार्यं मय्यस्त्याहवकारिणि ॥ ४२

महोत्साहस्तमित्युक्त्वा कृत्यवित्कृतिनां वरः ।
निरगात्सदनात्तस्मात्सज्ज' स्वजनसंवृतः ॥ ४३

दुर्गपालमनुज्ञाप्य तोरणोपान्तचत्वरात् ।
स त्वरावान्महासत्त्वः पुरोभूत्स पुरसरः ॥ ४४

तं यान्तमनुयान्ति स्म तदीयाः सर्व एव हि ।
इन्दिन्दिरा इवामोदमरविन्दवनोद्भवम् ॥ ४५

पदे पदे च तुरगस्तुरगस्तस्य गच्छतः ।
न्हेपयामास मुदिरं न्हेपमाणो मनोजवः ॥ ४६

किकीदिविप्रभृतिभिः शकुनैः शकुनावहैः ।
मरुता चानुकूलेन मृदुशीतसुगन्धिना ॥ ४७

सपादि स्थितयाभ्येत्य माहेय्या च सवत्सया ।
कुम्भेन चाम्भ-पूर्णेन मन्वानो मुदमुन्नताम् ॥ ४८

यत्र कृष्णा च वेण्या[णी] च नद्यौ द्वे सङ्गते मिथः ।
तत्[हि]तीर्थं सारसदृक् स स्वदृग्गोचरं व्यधात् ॥ ४९

अथो यथावदाप्लुत्य सम्भेदे तत्र निर्वृतः ।
व्यतरद्विपुल वित्त विप्रेभ्यो विश्वविश्रुत' ॥ ५०

अथ वीररसावेशभरायत्तो मदोद्धतः ।
ससितिवर्त्ती सप्तसप्तितेजाः कङ्कटकावृतः ॥ ५१

गौरगौरवभृद्गुर्व्या मौर्व्या योजितकार्मुकः ।
उपासङ्गमुखाकृष्यमाणबाणः सुदुर्धरः ॥ ५२

निदिध्यानुयानाय दुर्गपालेन धीमता ।
राजपुत्रान्महाराजपुत्रस्तत्र वचोऽब्रवीत् ॥ ५३

शम्भुराज उवाच ।

कृत बतानुयानेन भवतामवतामिह ।
यतो यातः परावृत्य यदि प्राणितुमिच्छथ ॥ ५४

एष व्रजामि दिल्लीन्द्रवाहिनीमवगाहितुम् ।
एष्यामि च पुनः स्वीयं सह्याद्रिं सहसार्दितुम् ॥ ५५

मत्सन्देशमिमं स्वाय दुर्गपालाय शासत ।
अथवा शिवराजाय महाराजाय संसदि ॥ ५६

अमुष्योक्तिमिमां श्रुत्वा ययुस्ते च यथागतम् ।
प्रत्युद्ययुश्च दिल्लीन्द्रसैन्यानि तमुदङ्मुखम् ॥ ५७

सङ्गमे शम्भुना स्वेन सज्जेन स्वजनैः समम् ।
दलेलेन च सम्प्रेष्य मुदेऽमुष्य निजम्बलम् ॥ ५८

समयः पूर्वमेवासीदयं शम्भुदलेलयोः ।
स्वस्वकार्यानुरोधेन मिथः सञ्जातहार्दयोः ॥ ५९

आडम्बराडम्बरेण दारिताम्बरगह्वरा ।
दिल्लीन्द्रसञ्ज्ञया नाम सा ननाम पताकिनी ॥ ६०

शिवराजसुतं तत्र सर्वराजसु पूजितम् ।
बले बलेन सदृशं कपाटपृथुवक्षसम् ॥ ६१

कृष्णसारसदृक्षाक्षं मुकुराभमुखत्विषम् ।
पृथुभालं महाबाहुं सभालङ्कारमुज्ज्वलम् ॥ ६२

वाचा मृदुतरं वाचामाचारेण मनोहरम् ।
शिवराजात्मजं वीक्ष्य राजा वव्र[व]दात्मज[जम्] ॥ ६३

साम्बन्धिकस्य सान्निध्यात्साम्यसम्बन्धमावहन् ।
अहयुरभिसङ्गम्य स्हीन स्हीत इत्यऽजनि ॥ ६४

शिवमिव युधि भीमं सम्यगुत्तीर्णभीमं
प्रहितबलसमेतं राजलक्ष्मीनिकेतम् ।
तमथ निरवहेलं प्रेमशाली दलेलः
श्रितहितनिजपथ्यं प्रत्युदेति स्म सद्यः ॥ ६५

बहुमतोपचाररचनासुषमाश्रयाय
तत्तन्नृपालसमुदायचिरोपिताय ।
शम्भुं निजाय शिबिराय मनोहराय
दिल्लीदिगस्पतिचमूपतिरानिनाय ॥ ६६

अजनि हृदि यदीये कोऽपि हर्षोऽतिवेल:
स किल यवनसेनाधीशधुर्यो दलेल: ।
सपदि सदुपचारं कारयामास पार्श्वे
स्वशिबिरसमवेशं शम्भुसेनानिवेशम् ॥ ६७

सूर्यवंशे निवासकरकवीन्द्रपरमानन्दप्रकाशितायामध्यायशतसंमितायां-
शुभलक्षणलक्षितायां वैयासिक्यां संहितायामध्याय: ।) D

मनीषिण ऊचु: ।

अथार्थशास्त्ररीतीनां नीतीनामपि वेत्तरि ।
अभेत्तरि स्थितीनां च छेत्तरि द्विषि मर्मणाम् ॥ १

शुभ्रेन यशसा दिक्षु विदिक्ष्वपि च विश्रुते ।
राज्याधिकारिणि सुते प्रथिते सुबहुश्रुते ॥ २

वञ्चयित्वा जनं सर्वं विषयात्स्वाद्विनिर्गते ।
चिन्तामणाविवाकस्मात्कराल्कचन विच्युते ॥ ३

सिद्धमन्त्र इवोपेत्य दैवात्सपदि विस्मृते ।
अधनोऽर्थेऽध्वनीनस्य वीते वीतविरोद्धने ॥ ४

पोते सायात्रिकस्येव न तत्केनव्यसंयुते ।
प्रतिकूलेन मरुता द्वीपाद्द्वीपान्तरं श्रिते ॥ ५

युक्तो मयूरप्रमुखैर्मन्त्रिभिर्मन्त्रवेदिभि: ।
शिवराज: कृती तत्र कमुपायमचिन्तयत् ॥ ६

स च शम्भुर्महाभाग: प्रागल्भ्यमधिकं वहन् ।
अन्वहं यवने तस्मिन्नहंयुरपि विश्वसन् ॥ ७

अवर्तत यथं सोऽपि शम्भौ स्वां भुवमागते ।
परमानन्द तत्सर्वं शंस सम्प्रति न: प्रति ॥ ८

कवीन्द्र उवाच ।

सज्जनाद्रेर्विनिर्गत्य सायमन्धे महाशये ।
सद्य: पीठरमालीयं प्रदर्शयितुमुद्यते ॥ ९

सन्धाय दिल्लीपतिना शम्भौ तन्नीवृत श्रिते ।
कर्तर्या कर्त्यमानेषु स्वेष्वन्त्रेष्विव कातर ॥ १०

वत्सलः सच्छलान्म्लेच्छबलादतिबलाद्भयम् ।
तस्मिन्सम्भावयन्भूरि शिवराजोऽन्वतप्यत ॥ ११

शिवराज उवाच ।

मयाऽवधिया शम्भुर्नोपकण्ठे निवेशित ।
ससिद्धवैव विशुद्धात्मा न च कण्ठमर्णाकुल ॥ १२

सुधिना मन्त्रिभि. सर्वैर्मदीया शेमुषी तथा ।
स आत्मजो ममात्मेव सपत्नानाश्रयद्यथा ॥ १३

यदर्थं राज्यमेतन्मे स किमर्थं श्रितः परान् ।
नानुबध्नाति हृ स्वार्थोऽप्यभिमानवतो नरान् ॥ १४

उत्सृज्य यः सिद्धमर्थमसिद्ध लब्धुमिच्छति ।
लब्ध्वापि स इम दैवात्सद्यस्तमिव हास्यति ॥ १५

यदसावतिवैयात्यादवनाज्ञातिवैरिण' ।
अश्रयच्छ्रेयसे स्वाय तेन मे दूयते मन ॥ १६

आभ्यन्तरेण कलिना बलिना स उपप्लुत. ।
पश्यतो मे बतोडाय वरात्कीर इवागमत् ॥ १७

स्वया बालतया तासु तासु लीलासु लालसन् ।
अहो अनागस त प्रत्यरोच परष वचः ॥ १८

तत्तच्चिन्ताचयाम्भोधिवीचिविव्हलितात्मना ।
इत्थ व्रतानुतेपे च तेपे च प्रभुणाऽमुना ॥ १९

अथ त स्वीयसाम्राज्यस्थितिनैश्चिन्त्यनीरधेः ।
सेतु सद्य समानेतु शक्तः प्रायतत प्रभुः ॥ २०

शम्भुरप्यनुभावेन स्वेन ता धुरमुद्वहन् ।
तृणायामन्यत तदा यवनानीकिनीगणम् ॥ २१

दलेलस्तु स्वय नीत्वा शिबिराय शिवात्मजम् ।
रह' प्राह महाबुद्धिः स्वासनार्धोपवेशितम् ॥ २२

दलेल उवाच ।

निधाय मयि विश्रम्भमायातोऽसि वरं कृतम् ।
गुरुणा त्वामनादृत्य स्व गौरवमनादृतम् ॥ २३

श्रेयसा भूयसावाप्य स्वसमानत्वमाशया ।
अहंयुतायुताः केचिन्न सहन्ते सुतानपि ॥ २४

न मदीयाः श्रिय किन्तु तावकीना इमा श्रिय ।
इह मावह सन्देह पुत्रादप्यसि मे प्रियः ॥ २५

न दानेन विना सम्पन्न शीलेन विना वधूः ।
न सत्येन विना वाणी राजते राजनन्दन ॥ २६

धन्वनाट विदर्भश्च लब्धान्यानपि नीवृतः ।
प्रयच्छ प्रक्रियास्तास्ता क्रियाश्चाभिमताः क्रिया ॥ २७

महाप्रभुरिमा यस्मै सत्क्रिया त्वय्यविक्रियाम् ।
क्रियावति करोत्यद्य कार्यमार्य कुरुष्व तत् ॥ २८

त्वद्धिताय प्रवृत्तस्य यद्यपि स्यान्ममाहितम् ।
तथापि तन्महाबाहो मया सम्यगुरीकृतम् ॥ २९

आभिर्वाग्भिः प्रगल्भाभिः स प्रोक्तस्तेन वाग्मिना ।
समरोचत पीयूषसरःसहचरं वचः ॥ ३०

उड्डीय नीडात्स्वार्थाय जातपक्षा खगा यथा ।
पितुः सनीडात्क्रामन्ति तथा पुत्राः सुशिक्षिताः ॥ ३१

प्रवसेल्लुब्धनिषिद्धेष्वपि विधिषु स्वप्रसिद्धताम् ।
जानता गुरुणा तर्हि पुनः स विनिवार्यताम् ॥ ३२

वाहयित्वा धुर धुर्यं परीक्षन्ते परीक्षकाः ।
अस्य नैव गुणः किन्तु तस्य विचोरत्यसौ यतः ॥ ३३

येन लोकेन नाज्ञापि यथा दिल्लीपतिस्तथा ।
इह कर्तुमकर्तुं वा भवानेवाविभूः स्वनः ॥ ३४

लङ्घते किल कल्पान्ते मर्यादां मकरालयः ।
न तु जातु विलङ्घन्ते भारतीं स्वां भवादृशाः ॥ ३५

हितानामहितानां वा हितार्थं यः प्रवर्तते ।
तस्योपकृतिशीलस्य नाहित जातु जायते ॥ ३६

अहितीभूयते येन हितस्य हितकारिण ।
द्रुह्यन्ति ध्रुसदस्तस्मै कृतघ्नायापकारिणे ॥ ३७

स्वत्त सर्वमताभिज्ञे त्वयि विज्ञापना तथा ।
स्फटिकैर्घटिते सौधे दह्यमाना सुधा यथा ॥ ३८

इमा दलेलः सरसाममुष्य वाणीमुदारा मनसा विमृश्य ।
भूयासि भूपालमणे शिवस्य श्रेयासि मेने स्थगितश्चिरस्य ॥ ३९

अथैष तस्मै द्विरदास्तुरङ्गान्
दिल्लीश्वरेण प्रहितानुदग्रान् ।
शृङ्गारितान्स्वाभरणोपपन्नान्
समर्पयामास कृतोरुमान ॥ ४०

त त प्रपद्य परिबर्हमनेकमर्हं
सम्भावितानि विरदानि च तानि तानि ।
सद्यो दलेलविनियोजितसन्निवेश
शम्भुस्ततो निजमियाय चमूनिवेशम् ॥ ४१

इह्यनुपुराणे सूर्यवंशे निवास० अध्याय । ११

कवीन्द्र उवाच ।

ततो दिने दिने तत्र शम्भुराज प्रतापवान् ।
अनुसारविद्. सारवत. पर्वतवत् स्थिरान् ॥ १

सत्वरान्स्वामिकार्येषु पद्भ्यामपि च गत्वरान् ।
तत्तद्वेतिधरान्धीरान्धुरीणान्धुर्यकर्मणि ॥ २

ससत्रकान्परिज्ञातानभिज्ञातान् यशस्विन ।
उदारप्रकृतीन्भव्याकृतीनविकृतीन्कृती ॥ ३

समग्रहीत्सद्गृहार्थी सैनिकान्सत्तिवादिन ।
शिखाक्षदोजसां येषा विशिख्या• शब्दवेधिन ॥ ४

अभ्याहवाभिमानिभ्य फलविभ्य स्मयोद्धता ।
अमु पर्यचरस्तत्र पत्तिचम्व सहस्रश ॥ ५

सत्वन्वह मदोन्मत्ते भद्रजातौ मतङ्गजे ।
शृङ्गारिते मदोदग्रे समग्रानीकमग्रगे ॥ ६

दलेलेन सहासीन पीनस्कन्ध सुलोचनः ।
नमतो नमयन्मौलीन्यवनानामनेकशः ॥ ७

मुष्णन्तेजांसि सर्वेषां जिष्णुप्रतिमविक्रमः ।
गृह्णन्प्रणाम केषांचित्कांश्चित्पश्यन्कृपादृशा ॥ ८

हसन्कैश्चिद्विलासेन कांश्चित्कुर्वन्कथा मिथः ।
स्वननेन सम साक्षात्सुधासहचरोत्तम ॥ ९

अखर्वगर्वैर्वर्यैः प्रासपट्टिशपाणिभिः ।
अनुयातो महाशूरैः शक्रोऽमरवरैर्यथा ॥ १०

अन्यान्यायुधजातानि तानि तानि समन्ततः ।
सज्जीविधाय धावद्भिः पुरः परिजनैरलम् ॥ ११

वृतो महोदप्रधामप्रधानैः प्रधनोद्धतैः ।
अनुयातो विनीतात्मा महाराजात्मजः कृती ॥ १२

सैन्यमध्येऽतिशुशुभे षण्मुख सुमुखो यथा ।
तदा दलेलः प्रोद्दिप्तभुजधामसमुन्नत ॥ १३

शम्भुराज समुद्वीक्ष्य वचन किंचिदब्रवीत् ।
सुवर्णघटित चेतोहारि पीयूषसुन्दरम् ॥ १४

शक्रप्रस्थैकशक्रेणावक्रेण प्रधनप्रयः ।
प्रार्थितस्त्व महाराजासह्य सह्यमुपद्रुतुम् ॥ १५

स्वायत्तीकर्तुमप्युच्चैस्त्वद्दहस्तेन केवलम् ।
दातु महाधिपत्य च स य किंचि पुनस्तव ॥ १६

त्यक्तलोकैस्त्वत्तस्य ममतामोहितात्मनः ।
शिवराजाधिराज्य च प्रशासतु पुनर्भवान् ॥ १७

स कर्म वाप्यमत्कर्म कर्तव्य विजिगीषुणा ।
कीर्तिर्वाप्यपकीर्तिर्वा यथा स्यात्स्थायिनी समा ॥ १८

राजरान दशमुखोऽग्रज पितृमम स्वयम् ।
पराजित्यामर्हालब्धां शङ्कानङ्कमिवार्जिताम् ॥ १९

सलमन्त्रो पुरागो राम दशरथात्मजम् ।
पराजित्य स्वजनक राज्यश्रियमवापतुः ॥ २०

उद्यमेन विना नास्ति विक्रमो विक्रम विना ।
सिद्धि सिद्धिं विना ख्यातिर्विना ख्यातिं महद्यश ॥ ३४

महद्यशो विनाऽस्य जगन्न जगतो विना ।
रति प्राज्यैरसाम्रा यत्पदवी नानुभूयते ॥ ३५

त्व समृद्ध समिद्धाग्निप्रतापस्तपनोज्ज्वल ।
वर्धिष्णुजिष्णुरोचिष्णुधामाराम इवापर ॥ ३६

पृथुकोदण्डनिर्मुक्तकाण्डमण्डलताडिता ।
हृदि निद्रा दिवा रात्रौ न ते गच्छन्ति दुर्हृद ॥ ३७

भवत्प्रतापसन्तप्तस्तपन प्रतिवासरम् ।
निमज्जन तनो येव साय साय सरित्पतौ ॥ ३८

भवत्कीर्त्या परिवस्त कुमुदाधिपति क्षयम् ।
प्रतिमास कृष्णपक्षे सङ्कुचति नृपात्मज ॥ ३९

भवतो विश्वविजयप्रख्यातबलशोभिन ।
अरातिना भ्रुवमपि क सहेताहित चरन् ॥ ४०

लोभादिविष्टै सचिवैर्ममताहृतचेतस ।
पितुस्त्व कलिवातस्य पद ससाधयिष्यसि ॥ ४१

स्वभावयेति सम्भाष्य ददौ गर्वकुञ्जर ।
अतिमात्र धनुस्ताय यथा त्रैम्बक[त्रैय्यम्बक] धनु ॥ ४२

स्वर्णपृष्ठ भारसह कमनायतराकृति ।
शार्ङ्ग हरेर्यथा शार्ङ्ग स्वर्णबिन्दुविचित्रितम् ॥ ४३

लसद्गुण वीरमनोहारि दारुणदारणम् ।
कारण शौर्यसम्पत्तर्युद्धरङ्गविभूषणम् ॥ ४४

सारण बलमत्ताना परवारणवारणम् ।
हसतु कोटियुगलाभाभ्या स्वर्णहिमाचलौ ॥ ४५

विधात्रा विहित किन्तु मेरुविन्ध्याद्रिणो[?]रलम् ।
तुलनाय महारत्नभूत नूनतम श्रिया ॥ ४६

अथ चकार जिज्ञासुर्यत्न तस्य महामन ।
कुरु सज्ज राजपुत्रे गुणैर्गोचमगोचन ॥ ४७

माधवैकसहायेन सुराधिपतिना बलात् ।
हतो वृत्रो विचित्राणि चरित्राणि कृतानि च ॥ ६२

वह्निमात्रसहायेन रुद्रेण मदन पुरा ।
स्निग्धमुग्धतनुर्दग्धोऽसाधि कीर्तिदिगन्तरे ॥ ६३

विभीषणसहायेन सौमित्रेयेण धीमता ।
जीविनाद्भ्रंशितो मेघनादो बत मदोद्धत ॥ ६४

अनलेनानिले सख्य मुख्य सम्भाव्य सर्वदा ।
दन्दह्यते वन घोरमसह्यममरैरपि ॥ ६५

खाण्डवे पाण्डव लब्ध्वा सहाय कृष्णमच्युत ।
अकरोत्ताण्डव वह्निराखण्डलमहेलयन् ॥ ६६

अरुण सारथिं कृत्वा भास्करेण प्रभाभरै ।
व्यापिता भुवनश्रेणा नि श्रेणा श्रेयस कृता ॥ ६७

चतुर्भिर्भ्रातृभि सार्धं द्रुपदाद्यैर्नराधिपै ।
लब्ध्वा साहाय्यक धर्मराजो राज्यमथाकरात् ॥ ६८

बृहन्नडासहायेनोत्तरेण प्रविजानता ।
विजिता कौरवा सर्वे भीष्मद्रोणपुर सरा ॥ ६९

देवसनासखि वेन विशाखेनाखिलाहित ।
तारको निहितो सङ्ख्ये मुख्येनामित्रघातिना ॥ ७०

पुष्पवद्भ्या सुधापाने राहुर्वेहुमदोद्धत ।
घातितो विष्णुचक्रेण वक्रदैत्यविदारिणा ॥ ७१

सन्ध्यामात्रसहायेन नृसिंहेनासुरद्विषा ।
हिरण्यकशिपोर्वक्षो दारित नखरै खरै ॥ ७२

इ यादि[वि] चिन्त्य हृदये दिल्लीश्वरचमूपति ।
कल्पद्रुममिव राज्याथा श्रितोऽस्मि भवदाश्रयम् ॥ ७३

मनोरथा मदाया ये ते सिद्धा इति भावये ।
पथ्यामुतथ्यानुजवद्वादास्व यतो गिरम् ॥ ७४

तथ्यपथ्यस्य को लोके वक्ता स्यात्वां विना मम ।
त्वमेव मित्र मित्राभतेज पुञ्जसमुद्धरम् ॥ ७५

जनकेन विहीनोऽस्मि ममताग्रस्तचेतसा ।
वैमात्रेयेण शनिना विदूरमभिलक्षितः ॥ ७६

मयूरादिप्रभृतिभि प्रजाविप्रकारिभि ।
राक्षसैरिव दुष्प्रेक्ष्यैर्दूराद्दृष्टै कुमन्त्रिभिः ॥ ७७

जननी मोहममताग्रस्तापि चमूपते ।
कलिगौरवतो यर्हि तर्हि पूज्यतमी मम ॥ ७८

प्रजानामेवकारणयाद्यान्दमयितु बलात् ।
शासितु सचिवान्सेनापतीन्स्तेयादिमोहितान् ॥ ७९

मदीयमेव तद्राज्य तत्र क स्याद्भ्रमो मम ।
केनचिद्धेतुना सेनापतेः सम्यगुदीरितम् ॥ ८०

जनकानन्तर राजा ज्येष्ठपुत्रो भवयुत ।
पण्डिता कथयन्त्युच्चैर्देशे देशे सभास्वपि ॥ ८१

अह ज्येष्ठो गरिष्ठश्च बन्धभिर्बहुभिर्गुणै ।
महाराजस्य पदवीमह भोक्ता गुणाकरः ॥ ८२

त्वत्सहायेन दिल्लीन्द्रप्रसादेन मयाऽधुना ।
देशदुर्गाणि बहुधा पत्तनानि सहस्रशः ॥ ८३

साधयिष्ये दिवारात्र रिपूणामिति चिन्तये ।
इति लालप्य त तत्र दलेल शम्भुभूपतिः ॥ ८४

महावीररसावेशाञ्चितपुलकनूरुह. ।
बभौ सूर्य इव श्रीमान् राजपुत्रो महाद्युतिः ॥ ८५

ततो मौनमुपागच्छद्विचक्षणविचक्षण ।
कुमार इव तेजस्वी कुमार शिवभूपतेः ॥ ८६

श्रुत्वा दलेल सम्भमकलङ्कन्वर वच ।
औरङ्गशाहसन्देशार्यदूतानानुस्मरन् ॥ ८७

महाप्रेमभरारम्भ दर्शयन्वचमाचिरम् ।
अस्तुवच्छम्भुनृपति पाणिनोपरि माददत् ॥ ८८

दिने दिने गजारूढो श्रीदलेलशिवात्मजौ ।
क्षपयन्त [न्तौ] कथा इव दिनानि नयनाधिपम् ॥ ८९

औरङ्गशाहसन्देशाद्विजयाद्यपुर प्रति ।
प्रस्थानमकरोच्छम्भुममे कृत्वा चमूपति ॥ ९०

भूपालदुर्गदुर्धर्षे शिवराजस्य धीमत ।
शम्भुराजकरेणोच्चैरभिमर्षाग्रहीकृती ॥ ९१

अन्यान्यपि च दुर्गाणि राजपुत्रपुर सर ।
अग्रहीत्स्वग्रस्थानि सुस्थानि धनादिभि ॥ ९२

इत्थ शम्भुनृपो दलेलखानाग्रे सञ्चरन्सर्वदा
युद्धकुद्धविरुद्धराजपटलीं निघ्नन्कृतघ्नानपि ।
त भूपालगड क्रुधा विकृथतामानीय मानी स्वय
धीर सान्द्रकृपाम्बुधि सम्धिक प्रेम्णा दलेलेऽर्पयत् ॥ ९३

योद्धा योद्धा समिद्धानलसमविलसच्चण्डबाहुप्रतापो
निर्दग्धारातिरण्य समधिकधिषण शूरसेनाशरण्य ।
सानन्द नन्दनन्दप्रतिमनवयशस्तोमसोमादय श्री
पश्यन्दिल्लीन्द्रसेनापतिमतिमहितो राजसुनुश्चकासे ॥ ९४

भूपालादिगडा कुडा अपि तथा श्रीशम्भुसाहाग्यत
स्वायत्तारचिता अनीकपतिना श्रीमद्दलेलेन यत् ।
तत्सश्रुय विचिन्त्य विक्रमभर चित्तेन नन्दोच्चकै
दिल्लीन्द्र शिवभूमिपालविषये नृयानि तेने कालि ॥ ९५

इति विहितजयश्री सश्रितो वारसङ्घै
समधिकपदवन्धैर्मागधै स्तूयमान ।
शिवनरपतिपुत्रश्चारुचञ्चच्चरित्र
प्रतिसमरमजस्र द्योतति स्मातिदृप्त ॥ ९६

किल कलिरपि भूयो वीक्ष्य वृद्धिं स्वकीया
निजहृदि वहु मेने मोहपूर्वप्रधानान् ।
कृतमिति बत कृत्य भावयन्भव्यभावै
रधिकनवविलास सम्भ्रमेणाजहर्ष ॥ ९७

तत्तत्कार्यपरम्पराविरचनाद्दुर्दान्तसम्मर्दनाद्
वीराणा परिपालनाद्भुजवलात्तत्त स्वकल्पनात् ।
श्रीशम्भो करुणाकटाक्षविभवाच्छ्रीमाञ् शिवस्यात्मज
शम्भु श्रेष्ठतमो बभूव सतत दिल्लीन्द्रसेनापते ॥ ९८

इत्यनुपुराणे सूर्यवशे निवासकरकवीन्द्रपरमानन्दकृताध्याय । १२

मर्न्तापिण ऊचु ।

अथ भूपालदुर्गं च पितुर्न परिपालितम् ।
बत तद्वर्ति चानीकं शम्भुना विश्रथीकृतम् ॥ १

स तु शम्भु शिवस्योचै· सुत सर्वजनस्तुत ।
अश्रोचदनर्हं तत्प्रतिभाति न वस्तुत ॥ २

स हि तत्र स्वय कर्तुमकर्तु चाखिल प्रभु ।
अकरोदसदकर्म क्रूर तत्केन हेतुना ॥ ३

कवीन्द्र उवाच ।

पत्तिसेनापतिर्यावत्तावद्देल्ल शिवात्मज ।
बलेदमादिशद्दूतो द्वास्थ ग्रामाधिकारिणम् ॥ ४

दूत उवाच ।

नोदग्रता गिरावस्मिन्नच सैन्यसमग्रता ।
द्विषन्निग्राहकेऽमुष्मिन्दले चेयमुदग्रता ॥ ५

दलेल सत्वसन्धोऽय निहत्य त्वा ससैनिकम् ।
गुरुरोषो गिरेरस्य शस्त्राणि करिष्यति ॥ ६

उचित तद्युज्झन्ति स्वामिनोऽर्थाय जीवितम् ।
अन्यथा तु स्वय स्वाय बतानर्थाय केवलम् ॥ ७

अतो दुर्गमिद मुञ्च श्रयासु च महाप्रभुम् ।
अल युद्धेन ते मन्द बल निजमपश्यत ॥ ८

रामसिंहस्य तनय कृष्णसिंह· सुदुर्धर ।
जगसिंहमुखाश्चान्ये राजपुत्रा प्रतापिन ॥ ९

श्यामानन्तूपसिंहश्च पद्मसिंहश्च विश्रुत ।
तथैव केसरीसिंह कर्णसिंहसुता इमे ॥ १०

अमुना शिवराजस्य महाराजस्य सूनुना ।
साधव साधुना सार्द्धं हय हार्दमदीधरन् ॥ ११

अभी स्वभावनस्तत्र यद्यच्चक्रे स उद्धत· ।
तत्सोढ दलेलेन परा वृद्धिमुपेयुषा ॥ १२

शूरा' क्षरदसृक्पूरा क्षितिं दूरादरञ्जयन् ।
शीर्यमाणशिरस्कन्धस्फूर्परक्षसा ॥ ४०

आरुह्यारुह्य सश्लिष्टतटा सन्नद्धकङ्कटा ।
वारा केऽपि तदोत्तालास्तारा इव विरेजिरे ॥ ४१

सोढ्वाभ्यापतता पातानश्मना पृथुवर्ष्मणाम् ।
क्रुधा महायुधा केचिदधिगत्याप्यधित्यकाम् ॥ ४२

खदिराङ्गारगर्वेण स प्रकर्षेण तत्क्षणम् ।
भस्मता प्रत्यपद्यन्त पश्यता पार्श्ववर्तिनाम् ॥ ४३

अथ घोरैर्महावीरैर्गिरिदुर्गावलम्बिभि ।
महत स्वामिनाऽर्थाय जीवित मोक्तुमुद्यतै ॥ ४४

केषुचित्पात्यमानेषु पातितेषु च केषुचित् ।
विद्रावितेषु विद्राव्यमाणेष्वपि च केषुचित् ॥ ४५

गाढवर्मा तदा शम्भुवर्मा चर्मासिभृत्स्वयम् ।
धन्विभिर्गदिभिर्वीरै प्रासिभिश्चन्द्रहासिभि ॥ ४६

त्रिशूलिभिर्मुद्गरिभिर्गोणिभिर्वारबाणिभि ।
मानिभि सहितो मानी शम्भुराजोऽनुयायिभि ॥ ४७

अधिरुह्य धर सद्यस्तदा क्रुद्ध इवान्तक ।
युध्यमानो विरुद्धाना व्यदधात्कदन महत् ॥ ४८

अल भिया धियाऽलम्भि विमिय वो महायुधा ।
द्विषतोऽमून्निगृह्णीत सङ्गृह्णात यशो युधा ॥ ४९

इति शम्भुवच श्रुत्वा निद्रवन्तो न विद्रुता ।
विद्रुतास्तु परावृत्य पुनर्युद्धाय सहृता ॥ ५०

स धन्वी धनु धुन्वानस्तन्वान शरमोक्षणम् ।
विपक्षान्क्षपयन्नैक्षि दुर्लक्ष पार्थवत्क्षणम् ॥ ५१

स तेषा युध्यमानाना समानाना क्षुरादिभि ।
पार्ष्णीन्पाणीन्कफोणींश्च तथान्त्राणि त्रिकाणि च ॥ ५२

पृष्ठीन्पृष्ठानदस्थीनि सक्थीनि च भुजा स्फिज ।
क्रूरकर्मकृता तेषा पृथक्पृथगथाकरोत् ॥ ५३

शूरा: क्षरदसृक्पूरा क्षितिं दूरादरञ्जयन् ।
शीर्यमाणशिरस्कन्धकरकूर्परवक्षसा ॥ ४०

आरुह्यारुह्य सश्लिष्टतटा सन्नद्धकङ्कटा ।
वारा केऽपि तदोत्तालास्तारा इव विरेजिरे ॥ ४१

सोद्ध्वाभ्यापतता पातानश्मना पृथुवर्ष्मणाम् ।
क्रुधा महायुधा केचिदधिगत्याप्यधि यक्राम् ॥ ४२

खदिराङ्गारवर्णेन स प्रवर्षेण तत्क्षणम् ।
भस्मता प्रत्यपद्यन्त पश्यता पार्श्ववर्तिनाम् ॥ ४३

अथ धारैर्महावीरैर्गिरिदुर्गावलम्बिभि ।
महत स्वामिनाऽर्थाय जीवित मोक्तुमुद्यतै ॥ ४४

केषुचित्पात्यमानेषु पातितेषु च केषुचित् ।
विद्रावितेषु विद्राव्यमाणेष्वपि च केषुचित् ॥ ४५

गाढवर्मा तदा शम्भुवर्मा चर्मासिभृत्स्वयम् ।
धन्विभिर्गदिभिर्वीरै प्रासिभिश्चन्द्रहासिभि ॥ ४६

त्रिशूलिभिर्मुद्गरिभिर्बाणिभिर्वारवाणिभि ।
मानिभि सहितो मानी शम्भुराजोऽनुयायिभि ॥ ४७

अभिरत धर सद्यस्तदा क्रुद्ध इवान्तक ।
युध्यमानो विरुद्धाना व्यदधात्कदनं महत् ॥ ४८

अल भिया धियाऽलम्भि विमिय वो महायुधा ।
द्विषतोऽमून्निगृह्णीत सङ्गृह्णीत यशो युधा ॥ ४९

इति शम्भुवच श्रुत्वा विद्रवन्तो न विद्रुता ।
विद्रुतास्तु परावृत्य पुनर्युद्धाय सहता ॥ ५०

स धधी धन्व धुन्वानस्तन्वान शरमोक्षणम् ।
विपक्षान्क्षपयन्नैक्षि दुर्लक्ष पार्थवत्क्षणम् ॥ ५१

स तेषां युध्यमानानां समानाना क्षुरादिभि ।
पार्ष्णीपाणीन्कफोणीश्च तथान्त्राणि विशाणि च ॥ ५२

पृष्ठीपृष्ठावदस्थीनि सर्वाणि च भुजा शिर ।
मूर्धवर्मधृता तेषां पृथक्पृथगपातयत् ॥ ५३

इत्थ राजकुमारेण कुमारेणेव कुप्यता ।
शक्रारिषु समस्तेषु दुर्गरक्षेष्वनेकशः ॥ ९४

इषुभिः शकलीकृत्य पातितेषु समन्ततः ।
स्वप्रदेशेष्विराशेषेष्वपि नष्टेषु विह्वल ॥ ९६

अपह्नुत्याचतादस्मादकस्मात्क्वापि निर्गत ।
सकल स्वस्य गर्वस्य फल प्राप किरङ्कजित् ॥ ९७

प्रध्वनल्लोलकल्लोला क्रव्यकर्दमदुर्गमा ।
क्रूराकारा तदापारा प्रससारासृगापगा ॥ ९८

आप्लुना सकुतुक सहृदारैर्नीरलोहिततरङ्गवनीषु ।
मदसा मसृणितानि तदानीमाशुराशु पिशितानि पिशाचाः ॥ ९९

इत्थमेनमचल युधि जित्वा शम्भुरेव विजयी पृथुसत्त्व ।
साहसीसमुदितैर्मुदितैः स्वै सैनिकैः सह दलेऽलमवस्त् ॥ ६०

इत्यनुपुराणे कवीन्द्र अध्यायः । 13

---

*श्रीगोविन्द । कवीन्द्र उवाच ।

वन्दारुत्रिदशोदारमौलिमन्दारदामभिः ।
विचत्पदारविन्दाय गोविन्दाय नमो नमः ॥ १

पुरोहितप्रभृतिभिर्वेदवेदाङ्गवेदिभिः ।
अनूचानैः प्रवचनैर्मन्त्रविद्भिश्च मन्त्रिभि ॥ २

श्रौतेन विधिना सम्यगभिषिक्तः शिवो यदा ।
बभातुर इवानीव कालवामा कलिस्तदा ॥ ३

कैलासवासिन देव गिरीश तेजसां निधिम् ।
भालस्यहुतभुग्ज्वालालीलाप्लुष्टमनोभवम् ॥ ४

क्षणध्वस्तान्धकध्वान्त त्र्यम्बक त्रिपुरान्तकम् ।
स्वभावसिद्धविभव भव भवभयापहम् ॥ ५

भीमभव्यभयाकारमुग्रमप्यतिसुन्दरम् ।
अनादिमादि सर्वस्य श्वेतिवासममीश्वरम् ॥ ६

Contents of disconnected pages p 1

जगदेकगतिं भूतपतिं मृत्युञ्जय मृडम् ।
शङ्कर सर्वलोकाना शङ्कर प्रणपद्यत ॥ ७

अथ कल्पद्रुमलतामण्डपान्तर्निवेशिते ।
पूर्णेन्दुम *

भि ।†

आवेद्यमानजनन स्वर्णवञुलपाणिभि ॥ २४

द्वितीयमिव कैलासमधिकैलासमास्थितम् ।
दिदृक्षुर्दिविपञ्छोकविलोकितमलोकत ॥ २५

दवीयानेव देवाय नन्दिना स निवेदित ।
सन्दानिताञ्जलिपुट प्रणनाम पुरःस्थित ॥ २६

अथो गदितुमाज्ञप्त शर्वेणोन्नमितभ्रुवा ।
स तस्मै स्वविनिर्वेदहेतुमाचष्ट तत्त्वत ॥ २७

कलिरुवाच ।

यदत्तपूर्व भवता मह्य माहेश्वर युगम् ।
उदभूदधिभूस्तत्र मदन्य इति किं कृतम् ॥ २८

पुरारातेः प्रसन्नेन यदुक्त मे पुरा त्वया ।
पश्य सर्वज्ञ भगवन् राजते तदवज्ञया ॥ २९

अनेन सा नैषधेन पर्यपालि यथा पुरा ।
अनेन सा तथा शाहसुतेन परिपाल्यते ॥ ३०

उच्चै सुकृतिनानेन कृतिना कृतिभिर्युगम् ।
कृतमेवावारि यदा गति काऽपि न मे तदा ॥ ३१

महाकालस्य ते रूप काल एष सनातन ।
वत्सरान्तो निमेषादिश्चक्रवद्यो विचेष्टते ॥ ३२

आब्रह्मस्तम्बपर्यन्त यत्र लोका पुन पुन ।
भूत्वा भूत्वा प्रलीयन्ते समुद्र इव वीचय ॥ ३३

यत्र ब्राह्म्य[ह्म]मह सर्व मनूनामन्तराणि च ।
युगान्येतानि च पुन पुनरायान्ति यान्ति च ॥ ३४

* Here the portion up to verse 23 is missing which probably covered two pages

† Disconnected pages 2 and 3

यस्य य समयस्तस्मिन्स वर्तेत यथाविधि ॥ ३५

कृते युगे चतुष्पादस्त्रेतायां तु त्रिपादभूत् ।
द्वापारे तु द्विपाद्भूत्वा धर्मः क्षमामवतिष्ठते ॥ ३६

स एकपात्पुनस्तिष्ये तिष्ठन्नपि न तिष्ठति ।
त्रिविना विहितास्त्वेषा धर्मस्यास्य व्यवस्थिति ॥ ३७

प्रमथ्नाति प्रमत्तात्मा तामिमा प्रमयस्तव ।
यत्र प्रशासति महीं धर्मस्यैवास्ति दीक्षित ॥ ३८

हेमसिंहासनासीनो हेमाचल इवापर ।
महाबाहुर्महाराज शम्भुराजो व्यराजत ॥ ३९

जामदग्न्येन रामेण बलिना दानवेन च ।
कल्पद्रुमेणापि च यच्चिरस्य निरकारि न ॥ ४०

दैन्य द्विजातिजातीना तदनेन दयालुना ।
प्रददानेन वित्तानि तदा द्रुतमपाकृतम् ॥ ४१

पुरोहितास्तथाचार्या ऋत्विज श्रोत्रिया अपि ।
तत्तत्कर्मण्यभिक्रान्तास्ततोऽन्यऽरि च सूरय ॥ ४२

आसमुद्रावनीभागवर्तिनो येऽवनायका ।
धनदेनामुना सर्वे ते तदा धनदीकृता ॥ ४३

महोदयाद्द्वो तस्माद्दानशौण्डाद्ययाचत ।
प्राप पञ्चसहस्राणि य पञ्चाशदयाचत ॥ ४४

स्वर्णरत्नादिवासासि गोतुरङ्गमतङ्गजान् ।
अजानिक्रमदाच्छम्भूराजो राजसभास्तुत ॥ ४५

श्यागलीलामुदवहत्तथा तस्य प्रभो शय ।
यथा निवश्विना लेप्सु[लिप्सु]गृहेषु स्वर्णराशय ॥ ४६

दिल्लीन्द्रप्रभृतिप्रतीपपृतनानावस्कन्दनास्कन्दन
स्पष्टस्कन्दसमानमानमहस सम्पन्नधर्मस्थिते ।
भूलोकैकगते सदाशिवदयोदञ्च प्रभुत्वोन्नते
शम्भुच्छत्रपते सदोदितमिद साम्राज्यमुद्योतते ॥ ४७

इत्यनुपुराणे सूर्यवंशे निवासरङ्गकवीन्द्रपरमानन्दप्रकाशितायामध्यायशतसम्मितायां शुभलक्षणलक्षितायां वैयासिक्यामध्याय ।।५

शम्भुराज उवाच।

जिता भरसहायेन रिपवो युद्धदुर्मदा ।
कर्बूरा इव दुसाध्या श्यामला सफिरङ्गिण ॥ १०

इङ्ग्रनाथ्र वलन्देजा आरब्या मावचै सह ।
पुरुमालैकनिल्या शूरा परिजिता पुन ॥ ११

सावता फेरपदवामागता शरणार्थिन ।
रानडूकरा कराबना मदाज्ञापरिपालिन ॥ १२

शिरस्का शार्णसवलविक्रमा विगताक्रमा ।
तुरष्किका शुष्कमुखा दिगन्तारण्यमाश्रिता ॥ १३

वैजापुरीया साहाय्ये याचयन्ति बत मम ।
भागानगरनाथोऽपि नाथते मदया सदा ॥ १४

समस्तपातशाहाना मूर्ध यो मान्यविक्रम ।
आरङ्गशाह एषोऽसौ निश्चिदर्पं वहत्यहो ॥ १५

निङ्माराः मद्भटाटोपनिरीक्षणभयातुरा ।
स्वगाहुतेजा निदन्तो ददत्यास्रभूवरान् ॥ १६

चिननाथिरराजाय विश्वासितपरा अपि ।
आह्लोपुरविरा काश्चित्र वहन्ति ममामत ॥ १७

दोणावा प्रणयप्रव्हा बन्हाग्रपविवर्जिता ।
मद्भक्तिमनुगच्छन्ति प्रयच्छन्ति धन बहु ॥ १८

पगासिन समायाता विमाता सङ्गोप्यरम् ।
मामवै सरवै शूरै सागरान्तरचारिभि ॥ १९

वसूतुगमङ्ग्रूर*[वसुरमङ्ग्रुर]चिनचोचगोमन्तपालजा ।
पसया[ई]चोनसुरतवराचीमस्कतोद्भवा ॥ २०

---

[10] After 10 ab R ins
सद्ना इन्द्रिमाधेन स्वगद्वाये समागता ।

[11] b R यवना अपि (for यवनै सह)

[12] R om 12 c 13 b

[14] R om 15 ab

[16] d R स्त्रयन्ति करागुदु ।

[17] R om 17-22
R om 33 c l

N B *वसुरमङ्गुलचिन Basur Mangalore and China are ports The original in the copy does not suit the metre

चेनपट्टणघोगारभडोचदिरभूभरा ।
मोवासमुम्बर्या[ई]मोसम्बजादत्रणसम्भरा ॥ २१

महोसदा सिंहलजा नागाजद्वीपजा भटा ।
वदयन्ति खट्टाटोपाद्दास्य मम महोत्कटम् ॥ २२

गिरिकन्दरसञ्चारा भिल्ला मल्ला इतोद्धता ।
मत्प्रथा प्रथयन्त्युच्चैर्वचसा मनसापि च ॥ २३

पुण्डा प्रचण्डदोर्दण्डकण्डूताण्डवखण्डिता ।
अखण्ड खण्डशो दासभावमाकलयन्त्युत ॥ २४

सदा मदभरोदग्रा पालेगारा प्रहारिण ।
सन्दानिताञ्जलिपुटास्तिष्ठन्त्यजिरके मम ॥ २५

मामक कटक वीक्ष्य काटका कठिना अपि ।
मामेवाशु प्रपद्यन्ते शरण गलितोद्यमा ॥ २६

साष्टासमाश्रया वारदेशस्था केऽपि भूभुज ।
समालभन्ते नो निद्रा मत्प्रतापाग्नितापिता ॥ २७

सौनूरवासिन केऽपि नरेन्द्रप्रवरा खरा ।
मोगला मद्भटैर्भूय प्रगृहीता गलग्रहे ॥ २८

पञ्चाग्निरस्तव्यपराक्रमतामागताश्चिरम् ।
समुद्रतीरसञ्चारा आभीरा॰ सरनोन्मुखा ॥ २९

ञिन्दुराश्रयसञ्जातप्रतापप्रथितत्विष ।
अहो प्रयच्छन्ति कर भीता मद्भटसङ्करे ॥ ३०

सोधेरग नृपश्रेष्ठा जङ्गमा परमोद्धता ।
प्रपूजयन्ति मामेव हितास पादपद्मसुरस्रम् ॥ ३१

---

२५ d R नित्यमेव ममाङ्गने ।

२६ d R शरणार्थिन (for गलितोद्यमा)

२७ cd R मत्प्रतापाग्निसन्तप्ता निद्रा नोपलभन्त्युत ।

२८ b R वरा शूरवदम्बक ।

२९ c R —सरधाना (for–सञ्चारा)

३० ab R विदनूराश्रयसम्पातप्रतापाग्निमहोज्ज्वला ।

केचिद्दुर्गमदुर्गेषु नरसिंहाः प्रहारिणः ।
माता शशकवच्छश्वद्वनत्यन्तर्हिता इव ॥ ३२

चञ्चीचञ्चावरपुरप्राकारान्तरवर्तिनः ।
मदीया एव सम्भूता प्रभूतधनतोषिताः ॥ ३३

विलक्षणाः कोङ्कणकाः प्रतिक्षणमहर्निशम् ।
सुलक्षणान्यभ्यसन्ति मद्भटानां समागमात् ॥ ३४

नानेमावल्काः केऽपि शूराः परविडम्बकाः ।
मदग्रेसरिणो भूत्वा धावन्ति बत दासवत् ॥ ३५

तथा पोवनमध्यस्थाः प्रशस्ताः सङ्गरेष्वलम् ।
वीराः प्रवीराः दुर्गाणि रक्षन्ति च हितङ्कराः ॥ ३६

खेटेश्वरगता वीरा वरा राजन्यमूर्धसु ।
मदाश्रयात्स्वाश्रमेषु विश्रमन्ति श्रियावृताः ॥ ३७

वीराकीर्णतरव्रातावृत वीरातमावलम् ।
येऽवलम्ब्य बतोत्तसा भूभुजा तेऽनुयायिनः ॥ ३८

[32] a R अतिदुर्गमदुर्गस्था —After 32 R ins
फरासिनः समाक्रान्ता विक्रान्ताः सङ्गरे दृढम् ।
मामकैः सकलैः शूरैः सम[रा]न्तरचारिभिः ॥
त्रिनेत्राधिवरशनाय विनासितपरा अपि ।
आहोपुरषिकां काश्चिन्न वहन्ति ममाग्रतः ॥
दुर्लोचाः कलिताः शेषपाखण्डाः खण्डमुकण्ठम् ।
आददन्ति विनादेन चलन्तो मामका इति ॥
दोग्भावाः प्रणयप्रह्वा बह्वाशवविवर्जिताः ।
मद्भक्तिमनुगच्छन्ति प्रयच्छन्ति धनं बहु ॥

[33] After 33 ab R ins
मन्के मामके वीक्ष्यारण्यानन्दगम्भृता ।
कट्टीना दीनवक्त्ना सदने मद्भय सदा ॥
विशेषयान्त विरता सिन्धुमार्गादनेकधा ।

[35] cd R मदग्रेसरतां प्राप्य धावन्ति विनदन्ति च ॥

[36] After 36 R ins
पौरुसारैरनिन्द्या सत्वया मण्डिते सदा ।
मदर्थं धनमाशाय प्राणानुज्झन्ति सङ्गरे ॥

[37] R cm 37 44

देशमुल्या खोपडा ये वृद्धरोहिडसंस्थिता ।
जोधेरगा परे बालरोहिडेखोरवासिन ॥ ३९

केचिचे ल्वणावासा सदा समरलालसा ।
कान्दखोरसवासा भानुप्रतिमतेजस ॥ ४०

मोसेखोरगृहा पर्णीवारणूतारलखोरजे ।
कोंयिनातारजा केचिज्जोरचाम्पलखोरिण ॥ ४१

इन्द्रापूरसिरोल्स्था बारामतिजुनारजा ।
नारातटी पुण्यवायी[ई]सासवाडक्षुपेश्वरा ॥ ४२

मानगोकर्णमिरजमनोल्यावागलादिषु ।
देशेषु येषु ये भूपा मदाज्ञा मानयन्त्यरम् ॥ ४३

चारणग्रामसम्भूता किराता जोरभाषिण ।
आभिरन्ति कर द्वारावान्त बद्धवराश्विरम् ॥ ४४

मूठेखोराल्या पौडरगोरभूप्रभविष्णव ।
म पक्षमनुरक्षन्त क्षिण्वन्त्यहितमण्डलम् ॥ ४५

मूल्सीवस्थितागुञ्जणसारासाश्विरोडिजा ।
मदायेन प्रभावेन कुर्वन्ति भुवने यश ॥ ४६

[45] R reads
मूठेखोरगृहा केऽपि भग प्रोत्कम्मानिन ।
आशसयन्ति मदस्तादन विजयमेव च ॥

[46] ab R मूलसावस्थिता श्रेययाननामसमधिता ।
d R रमन्ति श्रीकन्दवे—After 46 R ins
केचिद् गुञ्जणसवासा सुभगा रणकर्कशा ।
मद्राश्रता गता सन्त प्रकुर्वन्ति यशो भुवि ॥
तथा हरणमध्यस्था परेषा हरणोद्यता ।
मदाशाविद्वरा: सर्वे निवसन्ति सुखं गृहे ।
तथा हीरडसस्थाना मदाश्रयमुपागता ।
भूदुगाण्यनुरक्षन्ति रक्षयन्ति हितं मम ॥
पाण्खोरकृतावासा प्रवासेकृतश्रमा ।
मदाश्रय संश्रयन्तो भजन्ति शिवमुत्कटम् ॥
भूय परल्सारस्था अध्यनां मम सङ्गता ।
जैत्रयात्रा प्रकुर्वन्ति प्रेक्षन्ति सभास्वलम् ॥

कुडाळम्वोरे प्रखरास्तथा हेटकुडाळकोः ।
अभिख्यां कामपि मम प्रेष्याः प्रख्यापयन्त्यहो ॥ ४७

भूपा हीरडसोद्भूताः प्रभूताभिजनप्रियाः ।
मञ्जैत्रयात्राः कुर्वाणाः प्रोल्लसन्ति पदे पदे ॥ ४८

फोंडेकराः सालसीकाश्चान्देरीसाङ्खलीकराः ।
मणेरीमर्दनगडहेरेकरनिवासिनः ॥ ४९

बाडीडिचोलीनगरे ख्याताः सगरवद्गुणैः ।
राजपूरसमावेशाः परे सौदालजा नृपाः ॥ ५०

पांमूपत्तनभूमिस्था वरा लाङ्गेकरा अपि ।
देवलग्रामसम्भूता देवरूखभवाः परे ॥ ५१

सङ्गमेश्वरभूभूता दामोलीदर्पदर्पिताः ।
सावर्डेकरनामानश्चिपोलणभवास्तथा ॥ ५२

फुणगूसहृतावासा धामणेकविलासिनः ।
ह्यातखाम्बेकराः केचिन्मत्ताः केळेकराभिधाः ॥ ५३

तथा तारलखोरस्थाः शूरा केचन सम्मताः ।
मत्पत्तिसेना पतिता भान्ति प्राप्य क्षितौ किल ॥
मेढेगोराश्रयाः प्रायः प्रकर्तुं प्रसभोद्यताः ।
मत्पत्तिमन्यपार्श्वस्थाः प्रस्थाने प्रभवन्त्युत ॥

47 b R. खरांशुरिव रश्मिभिः ।

48 R cm 48

49 b R तथा हेटकुडालकाः—After 49 R ins ·
शृङ्खलाकरसयुक्ताश्चान्देरीग्रामवासिनः ।
मत्पत्तिसेनावासाङ्गमञ्चोभुवन्ति सङ्गरे ॥
अन्ये बारणखोरस्था रोहिडेखोरजैः सह ।

50 d R. तथा सौन्दलजा अपि ।

52 b R सावर्डेकरजा हर्द—After 52 ab R ins
प्रपालयन्ति दक्षाङ्ग सेनाया मम सर्वदा ।
चिपोलणभवाः केचिद्दाभोलीप्रभवास्तथा ॥

53 After 53 R ins
सालसीपत्तनगृहाः केचिद्वेलेकराः सदा ।
पुत्रपौत्रैः परियुता स्वराज्यपदवीङ्गताः ॥
अवन्ति मम सेनाया दक्षवामकरावपि ।

कल्याणप्रान्तसञ्जाता भीवण्डीजनुष परे ।
श्येनग्रामभवा केचित्तथा खानवलीयका ॥ ६०

नानादेशसमायाता प्रवीरा वीरमण्डले ।
सुर्वेदारा नामकाश्च जुम्लेदारा सहस्रश ॥ ६१

हवालदारा प्रख्यातास्तथा सर्णोबता अपि ।
[ए]काकिन परे केऽपि केऽपि बन्धुसुहृद्वृता ॥ ६२

डिचोलीकव्वाडस्था शिवेश्वरनिवासिन ।
आङ्कोलेकरनामानस्तथा बाधेकरा अपि ॥ ६३

कुलशीलावृता सर्वे शक्त्या पृथुविक्रमा ।
मदीयपत्तिसेनाया जनयन्ति सुखश्रियम् ॥ ६४

महाभापबभरिता कानडीयप्रथा गता ।
वामकूर्परता यान्त मत्सैन्यस्य रणोत्सवा ॥
आरलग्रामनिऽयाता रेन्नममागया ।
सोलाङ्कुरीया साष्टमूलभवा शालवनीयका ॥

[60] d R राशिवडकरमिश्रिता —After 60 R ins
वामकुर्परतामस्मत्सेनाया कल्पयन्त्युत ।
प्रेङ्खत्कञ्चिन केचित्कारका पश्मुखोयमा ।
वामकुर्नि दक्षकुर्नि पालयन्ति बलस्य मे ॥
प्रवग प्रथिता खानवलीग्राममसुद्भवा ।
मत्सैन्यमध्यस्थेनाभिशातयन्ति दिशो दश ॥
मदीयसेनानेत्रभार बिभ्रति सर्वदा ।
नानाभूदुर्गरक्षितमश्रया क्रूरमानसा ॥
मदीयसैन्यकणाभा दीपयन्ति मदाव्रता ।

[61] R om 61 ab

[62] After 62 R ins
अन्ति मम सैन्येऽस्मिन्नानादेशसमुद्भवा ।

[63] After 63 R ins
स्वस्वविक्रमसन्दीप्ता शस्त्रप्रथिता परम् ।
मत्सेना प्रपदस्थाना यान्ति निजतेजसा ॥
वर्गदनसमाक्षेसप्रगमाधिपगोयमा ।
स्सका स त म भूमाध्वनगुणोत्तमोत्तमा ॥

[64] R om 64

पण्डाताण्डवनिष्णाता गीष्पतेः समताङ्गताः ।
रचयन्ति श्रियं काश्चित्सभासु मम पण्डिताः ॥ ६५

अथर्वण इवाथर्वरहस्यपरिशालिनः ।
लसन्ति ब्राह्मणा ब्रह्मविदः सर्वत्र कर्मसु ॥ ६६

चतुर्वेदविदः केचित्त्रिवेदीपारगामिनः ।
द्विवेदाध्ययिनः केचिदेकवेदरताः परे ॥ ६७

श्रोत्रियाः स्नातका मौनव्रतिनो जापका अपि ।
तापसा जटिलाः केचिद्वल्कलाजिनवाससः ॥ ६८

यायजूका योगविदो दीक्षिता अग्निहोत्रिणः ।
अयाचितव्रता ब्रह्मचारिणश्चोर्ध्वरेतसः ॥ ६९

अधोमुखा ऊर्ध्वमुखा जीर्णपर्णाशनास्तथा ।
शीर्णपर्णकृताहारा उञ्छवृत्तिरता परे ॥ ६८

पञ्चाग्निसाधना वायुभक्षका धूमभक्षकाः ।
तोयाहाराः फलाहाराः कन्दमूलाशनाः पुन ॥ ६९

नानावेषधराः केचिज्जटिला मुण्डिनोऽपि च ।
त्रिदण्डिनः केऽपि लसत्त्रिजटा द्विजटा अपि ॥ ७०

उलूखलमुखाः केचिद्गोमुखा गोमयाशनाः ।
गोमूत्रप्राशनाः केचिच्छाकाहाराश्च केचन ॥ ७१

रामानुजा वैष्णवाश्च तत्समुद्राङ्किता अपि ।
शुद्धमुद्राङ्कितैः सौरैः शाक्तैर्गाणेशकैः सह ॥ ७२

---

68 R cm 68 cd

70 R cm 70 cd

71 After 71 R ins

कृशा अपि दिनेशाभप्रभाभरविलासिन ।
मत्कल्याणपरा सर्वे तिष्ठन्ति मम सद्मनि ॥
मन्त्रयन्त्ररहस्यज्ञास्तान्त्रिका मान्त्रिका अपि ।
समुदायैः समुदय मत्सभासु गम[द]न्त्यमी ।
षड्दर्शनरहस्यज्ञाः प्रशस्ताः सद्कथास्वपि ॥
आवेदयन्ति सतत मत्कल्याणपर विधिम् ।
गणि[ण]ता गुणिनः केचिद् गणितग्रहमण्डला ।
वल्गन्ति दैवं बहुशः सभासु मम सुव्रताः ॥

R cm 71-73 d

शैवैः केचिद्बलसिद्धैर्मान्त्रिकैस्तान्त्रिकैर्वृताः ।
मुनयो यतयः केचित्प्रसन्नमतयः सदा ॥ ७३

सिद्धाः सिद्धिसमृद्धार्था गणकैरनुरक्षिताः ।
चिन्तयन्ति ममाभीष्टं निरुपद्रवसंश्रयाः ॥ ७४

केऽपि कार्मणवेत्तारः परकृत्यानिवारकाः ।
आभिचारान् परकृतान् वारयन्ति मम प्रियाः ॥ ७५

पुराणा ब्राह्मणाः केऽपि पुराणार्थप्रकाशकाः ।
पौराण्यः प्रथिता गाथा कथयन्तः सभास्थिताः ॥ ७६

अलङ्कारविदः केऽपि धिषणापतिधीभराः ।
आलोपयन्ति वाग्जालैर्मामकं मानसं मुहुः ॥ ७७

तर्कशास्त्रैकपठनात्कर्कशास्तार्किका जनाः ।
रञ्जयन्ति महोद्ग्राहैः समाजे मानसं मम ॥ ७८

पूर्वोत्तरा च मीमांसा पठित्वा केऽपि धीवराः ।
समर्थयन्ति सार्थेन स्वार्थान् स्वार्थपरायणाः ॥ ७९

महाभाष्यप्रवक्तारश्छेत्तारः संशयस्य च ।
प्रदर्शयन्ति धात्वर्थान्नानारूपान्ममाग्रतः ॥ ८०

महाकाव्यकलालापललिताः कलिताऽखिलाः ।
आभूषयन्ति परममास्थानीस्थानमास्थिताः ॥ ८१

चतुर्दशसु विद्यासु शिक्षिता दीक्षिता अपि ।
विवदन्ति मिथो वादैः स्वमतस्थापनस्थिराः ॥ ८२

चतुःषष्टिकलातत्त्वपारगा कुलभूषणा ।
विशेषयन्ति मद्रङ्गे परस्परजिगीषव ॥ ८३

---

74 R cm 74 ab

75 After 75 R read 84-89

76 d R कथयन्ति ममाग्रत ।

77 b R विषणापतिबुद्धय ।

78 b R कर्कशत्वमुपागता –d R समाज मम तार्किका. ।

81 ab R नानाकाव्यकलालापकोविदा कविनायका· ।

81 cd R आभूषयन्ति परम समाज मामक सदा ।

82 R transfer 82 83 d R स्वमतस्थापनोद्धुरा ।

83 R cm 83 cd

नासत्याविव सर्वासु चिकित्सासु विचक्षणा ।
आवहन्ति श्रियं काश्चिन्मामका रोगहारिण ॥ ८४

व्यायामशिक्षका केचित्सम्भ्रमे सम्भृता सदा ।
यन्त्रा धात्विदङ्गमये दीपयन्ति ममाग्रत ॥ ८५

गान्धर्वविद्यासारस्य वेत्तारो दर्शका अपि ।
गायन्ति गायना गाथा सुस्वरा वैणिकै सह ॥ ८६

मार्दङ्गिका पाणिवादा व्याकल्पनपण्डिता ।
भाण्डै सह महारङ्गे रञ्जयन्ति मनो मम ॥ ८७

नाट्य[नाट्य]ज्ञानाभिज्ञतमा सदाऽहम्मनिवर्जिता ।
नटन्ति विनटन्त्युच्चैर्नटा केचन तारणे ॥ ८८

आभङ्गुरारम्भश्रीभरा स्तनभैरम् ।
नृत्यन्ति वारवध्वा सरागा सरागे रगा ॥ ८९

विचित्रचित्ररचनाचतुराश्चतुलोत्तम ।
चित्रकाराश्चित्रयन्ति सचित्रा मद्गृहान्तरम् ॥ ९०

कारव कारुशास्त्रार्थवेत्तारश्चारुकुण्डला ।
सुरेन्द्रभवनाकारान् रचयन्ति मम प्र[गृ]हान् ॥ ९१

परीक्षका परीक्षाभिर्नैकाभी रत्नसञ्चयान् ।
परीक्षन्ति स्फुल्लक्ष्मा दक्षिणाधारलक्षणा ॥ ९२

वयवित्रयमयुधे सनन सत्यवादिन ।
वणिग्जना प्रकुर्वन्ति मत्पुरे गतभीतय ॥ ९३

तुरङ्गवाहनोद्यमेणा येऽपि तुरङ्गमा ।
हेषन्ति नृत्यन्त इव चत्वरे यामिकै सह ॥ ९४

गन्धमदा सदोद्यमेगा केऽपि मतङ्गजा ।
गर्जन्ति घनगम्भीरमनिशं गानिदारणा ॥ ९५

After ९३ ab R ins
कश्चार चत्वर सर्व दशयन्त [illegible] ।

a R ननारावकल्पिता ।

d R रत्न मम मन्दिरे ।

ab R परीक्ष्या न मर्व [illegible] ।

रथिभिः संयुताः केचिदङ्गणेऽमी महारथाः ।
विभान्ति भानुप्रतिमास्तेजोभिर्मेऽरिभयङ्कराः ॥ ९६

मया दत्तानि देवेन्द्राः पितृभिः सहिताश्चिरम् ।
हव्यकव्यानि गृह्णन्ति वितन्वन्ति मम प्रियम् ॥ ९७

इत्थमापूरितो गौर्या शङ्करेण मनोरथः ।
तथापि जागर्ति मयि चिन्तानन्ता ह्यनागता ॥ ९८

कथं सुतो मम भवेत्प्राज्यसाम्राज्यकारणम् ।
सुधावरा समास्तारा प्रविचार्यार्यसम्मता ॥ ९९

कानुष्ठानस्य रचना पुरश्चर्याऽथ का पुनः ।
प्रकर्तव्या मया ब्रूत सप्रधानाः समन्त्रिणः ॥ १००

इत्थं शम्भुनृपः प्रगल्भविभवः शत्रुश्रियं भर्त्सयन्
शम्भ्वाराधनसाधनोऽपि तुलजासर्वस्वभूतः पुनः ।
पुत्रेहां मनसा वहन्निजसभास्ताराञ्जिगद्योच्चकैः
स्तूष्णीमास सतृष्ण एव निभृतं देव्याः समाराधने ॥ १०१

इत्यनुपुराणे सूर्यवंशे परमानन्दात्मजदेवदत्तोद्भवप्रकाशितायां शुभलक्षणलक्षितायां
शिवपुराणान्तर्गतायामनेकाध्यायसाधितायां वैयासिक्यामंशावतरणे
राजाधिराजशम्भुराजोक्तिर्नाम अध्यायः ।

---

97 a R देवा अपि मया दत्तम् ।

98 R reads for 98

इत्थं मनोरथोऽस्माकं शङ्करेण प्रपूरितः ।
तथाप्येका कापि चिन्ता मयि जागर्ति साम्प्रतम् ॥

99 cd R सर्वे ब्रूत सभास्तारा प्रविचार्य स्वके हृदि ।

100 cd R कार्या मया वा वदत प्रधानमन्त्रिभिः सह ।

101 c R पुत्रेहां मनसा वहन् ।

–d R देव्याः समाराधने ।

करीन्द्र उवाच ।

इत्थं निगद्य धरणीपाले शिवसुते तदा ।
तूष्णीम्भूते सभास्तारा परस्परमुखेक्षणाः ॥ १

छन्दोगामात्यसहिताः सोपाध्याया सयोगिन ।
शिवयोगिनमत्यर्थं पुरस्कृत्य तपोनिधिम् ॥ २

अमुनन्वचनैश्चारुचमत्कृतिविधायकैः ।
एकचित्तामता गत्वा शृणुत द्विजसत्तमा ॥ ३

मन्त्रिण ऊचु ।

भो राजन्यकुलोत्तस चिन्ता मा कुरु सर्वथा ।
आपूरितार्थनिचया योगनिद्रा हरेः पराम् ॥ ४

परापरैकसिद्धीना दात्रीं पात्रीं सुखस्य च ।
दमिताशेषदैत्येन्द्रमण्डला मङ्गलालयाम् ॥ ५

तडित्कोटिप्रतीकाशतेजोभरविराजिताम् ।
पञ्चाशद्वर्णनिलया सुरूपा मदमन्थराम् ॥ ६

मदघूर्णितरक्ताक्षीं योगियोगैकगोचराम् ।
चराचरस्य निर्माणकारिणीं शङ्करप्रियाम् ॥ ७

शक्तीनामपि सर्वासामाद्या वन्द्या विशेषत. ।
वेद्या समस्ततन्त्रौघैर्मन्त्रसङ्घप्रवर्तिनीम् ॥ ८

भक्तकुलैकवरदा दरदा दनुसन्ततौ ।
दयान्विता सदोद्दामपाखण्डदमनोद्धुराम् ॥ ९

मुक्तामणिप्रघटितमायूरोद्भासिनासिकाम् ।
ताटङ्कयुगलीभूतभानुराकेशभासुराम् ॥ १०

---

3 d R तच्छृण्वन्तु मनीषिण ।

4 c R आराधयस्व तां कालीम् ।

6 b R तेजोभरतरङ्गिणीम् ।

–c R सद्रूपां (for निलयां)

9 b R दनुजेन्द्रले [प्वर्ग] (लां ?) (for सन्ततौ) R om 9 cd

10 R transp 10 ab and 10 cd After 10 R ins
कुचकुम्भसमाकारतुहिनस्वर्णपर्वतनाम् ।

सोपाध्यायैर्द्विजश्रेष्ठै सिद्धैरन्यैर्मुहुर्मुहु ।
सम्वर्धितोऽयं वाग्जालैर्भारतिभव्यसमन्विते ॥ ३१

शिवराजात्मज शम्भू राजराजसम श्रिया ।
आनन्दसिन्धुलहरीनिमग्न समजायत ॥ ३२

ततोऽस्तुत्वा स्वमनसा कालीं स्वीयामुपासनाम् ।
आमन्त्रोदर्कसम्पर्क प्रसन्नवदनो नृप ॥ ३३

मनीषिण ऊचु ।

यतीन्द्र काली या प्रोक्ता सर्वतत्त्वयुत्तमोत्तमा ।
तस्या स्वरूप किं प्रमाणं किं वीर्यं को मनु स्मृत ॥ ३४

का पूजा को विधि यत्र क काल सिद्धिसाधने ।
यद्यस्ति करुणा चित्ते कथयाशु समासत ॥ ३५

तवैव सिद्धि सर्वत्र परमा शिवयोगिन ।
स्थानजन्मभवां काञ्चिद्वद त्व ललिताक्षरै ॥ ३६

गणेशभट्ट यो नाम कोऽभूदेशानभट्टक ।
एतया प्रवृत्ति सद्गुरु प्रधानां वक्तुमर्हसि ॥ ३७

अगम्यपुण्यचरितश्रवणे यत कौतुकम् ।
नवीनार्थे वरीवर्ति स्पृहा भो कविनायक ॥ ३८

इति पृष्ट कविश्रेष्ठ सम्भ्रमेण मनीषिभि ।
रहस्यमपि हर्षाज्जगाद वदतां वर ॥ ३९

करान्द्र उवाच ।

मनीषिणः सावधाना शृणुध्व चरित महत् ।
पुण्य पवित्रं परम काल्या श्रोत्रसुखावहम् ॥ ४०

आसीत्पुरा धरा सर्वा सलिलेन परिप्लुता ।
योगनिद्रामयो विष्णुर्योगनिद्रामदीधरत् ॥ ४१

वटस्य पत्रस्य पुटे शयाने पुरुषोत्तमे ।
तदा तत्कर्णमलजौ प्रभूतबलदर्पितौ ॥ ४२

मधुकैटभनामानौ दानवौ साधुगर्हितौ ।
दैवेनाविष्टहृदयौ कालयन्त्रनियन्त्रितौ ॥ ४३

आस्फोटयन्तौ स्वभुजौ तृणीकृत्य जगत्त्रयीम् ।
महामदभरोदग्रौ द्रोहोद्रिक्तसमेधितौ ॥ ४४

अकस्मादिव सम्बुद्धौ कालानलसमद्युता ।
प्रतीतौ विश्वविजये परस्परहितैषिणौ ॥ ४५

एकाशाविव सर्वस्वभूतौ दनुजसन्तते ।
उन्मत्तौ क्रोधरक्ताक्षौ विष्णुनाभिकृतालयौ ॥ ४६

महाकायव्यभरितौ चरितौ बलिना वरौ ।
धातारमत्तुमालोलौ विरेजाते मनस्विनौ ॥ ४७

ततो विधाता तौ वीक्ष्य भयाकुलितमानस ।
निद्रामुद्राङ्कितो विष्णु किं कार्यमिति चिन्तयन् ॥ ४८

क्षण तूष्णीं समास्थाय प्रविचार्य स्वके हृदि ।
अत्यर्थमस्तुवत्स्तोत्रैर्योगनिद्रामनुत्तमाम् ॥ ४९

---

44 d R समर्धितौ (for समेधितौ)

46 b R दनुकुलेज्वल (for °जसन्तते)

46 d R कृतालय (for लयौ) 47 R Transp 47 ab and 47 cd

47 b R प्रवलौ (for चरितौ) cd R धातारमत्तुमुद्युक्तौ स्ववीर्यभरशालिनौ ।

48 After 48 ab R ins

अस्तुवन्मनसा तत्र योगनिद्रामनुत्तमाम् ।

कान्तिस्त्वमेव किल कान्तिसमूहभाजां
दैवं त्वमेव वत दैवसमेधिनानाम् ।
राज्यं त्वमेव परितप्ततपोधनानां
मातः प्रसीद परिपालय मामनाथम् ॥ ६०

ख्यातिस्त्वमेव परमासि सुलक्षणानां
विद्या त्वं नयवतां विनयोज्ज्वलानाम् ।
हासस्त्वमेव कलिताद्भुतविस्मयानां
मातः प्रसीद परिपालय मामनाथम् ॥ ६१

नाट्यं त्वमेव नटन नटनायकानां
लास्यं त्वमेव सुभगं गणिकाजनानाम् ।
लज्जाऽसि काऽपि सकला कुलकामिनीनां
मातः प्रसीद परिपालय मामनाथम् ॥ ६२

विश्वेश्वरी त्वमसि विश्वविनोदशीला
दुःशीलदारणकरी शरणागतानाम् ।
नारायणी त्वमथ पालनचारुशीला
मातः प्रसीद परिपालय मामनाथम् ॥ ६३

माया त्वमेव भुवनत्रयमोहिनी त्वं
विधारयानसमये भुवनानि भूयः ।
स्वीयोदरे वहसि बालमुकुन्दमूर्ति
मातः प्रसीद परिपालय मामनाथम् ॥ ६४

वृत्तिर्निवृत्तिभरिताथ जनप्रवृत्ति
क्षान्ति क्षतिश्च परिसन्नतिरुन्नतिश्च ।
प्रीतिर्दितिश्च सुमति कुमतिस्त्वमेवा
मात प्रसीद परिपालय मामनाथम् ॥ ६५

स्पीति स्थितिश्च निनतिर्लघुता च भीति
स्फूर्तिश्च कापि निष्कृति प्रकृतिश्च काचित् ।
कृत्य कृतिश्च निष्कृति परमाकृतिस्त्व
मात. प्रसीद परिपालय मामनाथम् ॥ ६६

यज्ञास्त्वमेव सन्ना यजन त्वमेव
दीक्षावना रुचिचमत्कृतिदाऽथ दीक्षा ।
शिक्षावतामपि सता प्रमिता तितिक्षा
मात प्रसाद परिपालय मामनाथम् ॥ ६७

रक्षा भयाकुलितमानसमानवाना
भिक्षा च भिक्षुकजनस्य नरस्य माया ।
सिद्धि समृद्धिसहिता गृहिणा गृहस्था
मात प्रसाद परिपालय मामनाथम् ॥ ६८

अस्त्र तवैव बत रूपममोघवार्य
शस्त्र च शास्त्रमपि नाटकभाणजातम् ।
सङ्गीतगीतमपि वाद्यमथासि नादो
मात प्रसीद परिपालय मामनाथम् ॥ ६९

[65] R cm 65 66

[67] b R सौदामिनी वज्रधरी त्वमेव ।
c कान्तस्त्वमेव सुमुखो रमणी त्वमेव ।
After 67 R ins
अस्त्राणि शस्त्राणि च ते स्वरूपम् ।
शास्त्राणि नानार्थमतोन्नतानि ॥
कीर्तिस्त्वमेव सुमति कुमतिस्त्वमेव ।
मात प्रसीद . ।

[68] R cm 68 74

निद्रामयी त्वमसि मुद्रितजीवदृष्टि
स्वप्न प्रशस्तिमसिता प्रथितस्त्वमेव ।
बोध प्रबोधममयेऽप्यथ का तुरीया
मात प्रसीद परिपालय मामनाथम् ॥ ७०

देव्या त्वया प्रवितताानि विभान्त्यमूनि
भव्योज्ज्वलानि भुवनानि विजृम्भितानि ।
सर्वस्य सर्वमसि वर्धितशर्वगर्वे
मात प्रसीद परिपालय मामनाथम् ॥ ७१

कारुण्यमन्दलितकान्तिभर कटाक्ष
ये तावकीनमनवे समुपालभन्त ।
ते दुस्तराण्यनुतरन्ति भरन्ति भाग्यै
रम्ब प्रसाद परिपालय मामनाथम् ॥ ७२

लिप्सावतीप्सितनतिं परिपूरयन्ती
जागर्षि विश्वजन्ये वलितालिलीला ।
एवापि शङ्करवधूरवधूतपापा
मात प्रसीद परिपालय मामनाथम् ॥ ७३

प्रौढा प्रगल्भधिषणा अपि ये सुधीरा-
स्त्वामीरयन्ति परमामृतहेतुभूताम् ।
भूयो भजन्ति न भजन्ति जनुर्जनन्या
मात प्रसाद परिपालय मामनाथम् ॥ ७४

इथ स्तुता भगवता विधिना विमानै
र्नानाविधै सरभस नमिता च भूय ।
सम्प्रार्थिता भगवता त्वदा तदानीं
विष्णु मुमोच सहसा करुणार्द्रमूर्ति ॥ ७५

मुक्तस्तया निभृतनामसमन्वयेऽद्यै
विष्णु प्रसन्नमना दनुजालिजिष्णु ।
महायुधन युयुधे विभ पद्मदिव्य
साहस्रवर्षमनमोघपराक्रमोऽपि ॥ ७६

---

[75] d R प्रादुर्बभूव पुरत करुणार्द्रचित्त ।
[76] a R परमनामम (for निभृत°)

तौ मायया बत तमोगुणया विमुग्धौ
दृप्तौ तदोचतुरिद वचन विचित्रम् ।
तुष्टा वय मुररिपो वरमावृणीष्व
युद्धस्य[द्धेन]तेऽप्यन[ल]मनेन विकल्पितेन ॥ ७७

वाक्य समाकर्ण्य वरेण्यनाम्ना
प्रयाचितौ मृत्युपथाय दुष्टौ ।
अथोचतुस्तौ जलहीनभूमा
वावा जहि त्व मधुकैटभारे ॥ ७८

अङ्के तत. श्रीरमणो गृहीत्वा
तौ दानवौ स्वीयसुदर्शनेन ।
जहार तेषा हृदयस्थजीव
शिव पद प्रापयिषु॰ प्रकामम् ॥ ७९

आविष्णो॰ प्रभविष्णुतामथ समावीक्ष्योच्चकैर्भूजल
तेजोवायुयुत नभश्च सुषमा दध्रेऽधिका कामपि ।
चक्रुस्तोत्रशतै स्तुतिं विधिमुखा काल्या प्रकामक्षणा
बध्वा हस्तसरोरुहाणि विनयान्नानाप्रणामानपि ॥ ८०

विरचितशुभकीर्ति काऽपि मूर्ति शिवाया
नलिनसदनचित्ताकाङ्क्षित पूरयित्वा ।
तदनु झटिति लीलान्तर्हिताभूत्प्रभूत
प्रथिततमगुणश्री. आजनित्री त्रिलोक्या ॥ ८१

इत्यनुपुराणे सूर्यवशे विवासकरपरमान-दात्मजदेवदत्तेन्द्रवगोविन्दकवीन्द्रप्रकाशितायां शिवपुराणान्तर्गतायामनेकाध्यायसाधितायामशावतरणे कालीप्रभावनिरूपणमध्याय ॥२॥

---

77 d R युद्धेन तेप्यलमनेन विकल्पितेन ।

78 R आकर्ण्य वाक्यमिदमाशु जनार्दनेन सयाचितौ मृत्युपथाय भूय ।
तावूचतुस्तोयविहीनभूमावावा जहि त्व मधुकैटभारे ॥

79 a R स्वके (for तत)

80 a R प्रभविष्णुता हृदि (for °विष्णुतामथ)
c R प्रकामोत्सवा (for °मक्षणा) d R बध्वा हस्तसरोरुहावलिमथो नाना प्रणामानपि ।

वनीद्र उवाच ।

अथोऽभिधास्ये परम मन्त्र तत्र प्रगोपितम् ।
वराङ्गमिव सर्वेषा गोप्य प्रविदुषामपि ॥ १

स्वय कृतमिवाकर्म जननीजारगर्भवत् ।
कन्यासम्भोगवपुभिर्भगिन्या परिभोगवत् ॥ २

अभक्ष्यभक्षणमिव मित्रद्रव्यापहारवत् ।
गोप्य सर्वप्रयत्नेन पण्डितेन मया यथा ॥ ३

नाशिष्याय कदा ब्रूयान्न शठाय कदाचन ।
न दाम्भिकायाकृतिने न च नष्टोद्धताय च ॥ ४

यदि ब्रूयात्प्रमादेन देवताशापमाप्नुयात् ।
तस्मै कुप्यन्ति योगिन्य सोऽनर्थ सुमहान्स्मृत ॥ ५

पद्मभूर्वह्निमारूढो मालिनाकलितान्तर ।
द्विजराजकृतात्तसो बीजमेतत्त्रिवारत ॥ ६

ये पठन्ति कविश्रेष्ठास्ते ज्येष्ठा कविमण्डले ।
सिद्धि पारमिका याति दक्षिणाया प्रभावत ॥ ६

हर सरक्षण च द्रभूषित द्वि प्रयाजयेत् ।
जपकाले सधिषणविषणा परिमर्दयेत् ॥ ७

शूली त्रिवेदा ललितो लक्ष्मारावेशराञ्जित ।
यो द्वि स्मरति शत्रू स क्षिपत्यतिपराक्रम ॥ ८

वत्स्त्रान्ते क्षेत्रमयो ज्ञान विष्णुसमन्वितम् ।
आमा दार्घकृतावासो धरा स्मरविराजिता ॥ ९

---

1 b R मन्त्र सर्वोत्तमोत्तमम् । After R ins
य जप्त्वा साधकश्रेष्ठो व्रजत्सिद्धिमनुत्तमाम् ।
-R omits 1c 5d ,

6 For 6 R subst
ब्रह्मवह्निसमारूढ कलायुक्त चन्द्रशेखर ।
बीजमेव महाशौरि पञ्चादौ त्रिवारत ॥

7 a R व्योमरक्षणयुक् (for हर सरक्षण)
cd R बीजयुग्ममिद प्रोक्त भुक्तमुक्तिफलप्रदम् ।

8 a R शूलात्रिवेदीमारूढा ।
cd R यो द्विर्जपति विद्याना पारग सुभगो भवेत् ।

9 d R विराजिता (for °जिता) After 10 R reads 12 cd

मयूर पद्मनाभेनालङ्कृतोऽस्ते नदेत्तुन ।
बीजसप्तकम शुचैर्नहिमान्ता महोज्ज्वलाम् ॥ १०

प्रतिबीजाभिरूपो ब्रह्मविष्णुशिवात्मक ।
अनन्तपुण्यनिलयो योगिनामपि दुर्लभ ॥ ११

कल्पानीत वर वस्तु वर्णव्यक्तिमुपागतम् ।
द्वात्रिंशत्यक्षरो मन्त्र सर्वेप्सितसमृद्धिद ॥ १२

यस्यानुष्ठानमात्रेण शक्र सुरपद गत ।
कुबेर धननाथत्व वह्निस्तेजस्वितामपि ॥ १३

आस्ते यमो नियमकृत् त्रिलोक्यालोकलोचित ।
निर्ऋतिर्नैर्ऋतिप्रायसाम्राज्यपदवामगात् ॥ १४

वारणाकृतसन्नासो वरुणस्तोयनाथताम् ।
ईशानोऽभूदयेशान्या तुषाराद्रिसुतापति ।
प्रभञ्जन प्रयन्ता भेजेऽखिलविभञ्जने ॥ १५

स्वपक्षवल्सन्दृप्तो गरुड पक्षिनाथताम् ॥ १६

पालन कुरुते विष्णु प्रभविष्णु पदे पदे ।
रोचिष्णुता दिनमणि प्रपेदे गगनेऽधिकाम् ॥ १७

वाचस्पति समुदभूद्धिषणस्य विशेषत ।
सुधामशुरिमोद्गारानदधच्छीतदीधिति ॥ १८

रम्भा दम्भानप्सरसामहरद्रूपसम्पदा ।
गन्धर्वाणामधिपतिर्विश्वावसुरथाभवत् ॥ १९

शेषो विशेषप्रथिमा धराभार बभार ह ।
अपारविघ्नसहारधुरीणोऽभूद्गणाधिप ॥ २०

---

११ R om 11 ab

१२ R om 12 ab and reads 12 cd after 10

१३ c R धनदामाप्त्य (for नाथत्वं)

१४ b R गोवर्णित (for लोचित)

१५ cd R ईशान्यामपरतामाप चभद्रिरिपत्नी ।
R om 15 c 16 b

१७ d R अगमद् (for प्रपेदे)

२० c. R अनन्तविघ्न (for अपार°)

देवेन्द्रसेनापतिता स्थिरा भेजे षडाननः ।
त्रिलोकीमकरोद्वेधा ब्रह्माण्डान्यपि कानिचित् ॥ २१

रत्नाकरत्वमुदधिर्वृणोद्रत्नसञ्चये ।
अमन्दगन्धकुसुमो मन्दारो नन्दनेऽवसत् ॥ २२

हरणे हरिणा नीता रुक्मिणीप्राणवल्लभा ।
प्रेष्ठा ज्येष्ठा गुणश्रेष्ठा बभूव रमणीगणे ॥ २३

महाविक्रमसम्पूर्णो भार्गवः क्षात्रमण्डलम् ।
आचकर्त शरैरुग्रैरेकविंशतिसङ्ख्यया ॥ २४

शुक्रः प्रेष्ठक्रम काव्यमकरोद्धव्यदायकम् ।
ततो वव्रे कवीन्द्रत्व सुरासुरसमान्तरे ॥ २५

अचिन्त्यरूपचरितौ नासत्यौ सत्यसश्रयौ ।
समीयतु समगुणौ भिषग्वरवरेशताम् ॥ २६

प्रेष्ठव्रतो वशिष्ठोऽसौ विश्वामित्रपराक्रमम् ।
जग्रासाव्यग्रहृदयो हर्षयन्शिष्यमण्डलम् ॥ २७

ब्रह्मर्षित्व प्रकर्षेण ब्रह्मर्षिषु समावृणोत् ।
विश्वामित्र पवित्रातिचरित्र साधुसम्मत· ॥ २८

गन्धर्वयक्षप्रवरकिन्नरैरभिशोभित ।
अवाप पर्वतेन्द्रत्व तुषाराद्रि स्फुरद्धिम· ॥ २९

मेरु सुवर्णप्राकारपरिखाशतभासुर· ।
समस्तदेववनितास्थानश्रियमसेवत ॥ ३०

---

21 cd R वेधास्त्रिलोकी निर्माण चक्रे समुदितोद्यम ।
–After 21 R ins
प्रभवन प्रवृत्ता मेनेऽखिलविभञ्जने ।

22 R cm 22 c 23 d

24 a R –सयुक्तो (for –सम्पूर्णो) –c R आनघान (for आचकर्त)

25 a R महाक्रम (for प्रेष्ठ°) –cd R वव्रे कवीन्द्रपदवीं सुरासुरवन्दितम् ।

27 a R प्रष्ठोनना[प्रष्ठक्रतु]वशिष्ठोऽपि –cd R षभञ्ज जनयन्हर्षं प्रकर्षं शिष्यमण्डले ।

29 d R समुज्ज्वल (for स्फुरद्धिम)

30 cd R समस्तदेवजनतास्थानता समनुग्रहीत् ।

मार्कण्डेयो महायोगी योगयोगाङ्गगोचरः ।
दीर्घायुरप्रतिहतवर्षीयाण्युपाव्रजत् ॥ ३१

सुरर्षयो नारदाद्याः पुलस्त्याद्या महर्षयः ।
ब्रह्मर्षयः कश्यपाद्याः सम्प्रापुः स्वमनोरथान् ॥ ३२

कामो निष्काम कुसुमशरौघैर्धनुषा सह ।
अजयज्जगतीं नेतृज्योतिरुद्दीपयन्निव ॥ ३३

शीकरागुरिव प्रोक्तं मनोर्माहात्म्यमुत्तमम् ।
यस्य स्मरणमात्रेण सिद्धिभाग्जायते नरः ॥ ३४

अथो यन्त्रं केरलानां वक्ष्यहं साम्प्रदायिकम् ।
यस्मिन्प्रपूजिता देवी साधकाय प्रसीदति ॥ ३५

शाक्तं गन्धाष्टकं गृह्य विशोध्य रहसि स्थितः ।
कौशेयके विरचयेन्नवीने लोचनप्रियम् ॥ ३६

रम्यं षट्कोणमालिख्य त्रिकोणत्रितयं ततः ।
वसुपत्रं धरागेहं त्रिरेखाङ्कितमुत्तमम् ॥ ३७

चतुर्द्वारविशोभाढ्यमृजुरेखासमुज्ज्वलम् ।
अनिमाद्युभायासमन्त्रमर्चयितुर्भवेत् ॥ ३८

आदौ पुष्पाञ्जलिं दत्त्वा देव्यै पुष्पसमाकुलम् ।
साधकः पीठशक्तीनामथार्चनमुपाचरेत् ॥ ३९

सजयां विजयां पश्चादजितामपराजिताम् ।
नित्यां विलासिनीं दोग्ध्रीमघोरामथ मङ्गलाम् ॥ ४०

31 d R [illegible] (for उपाव्रजत्)

32 c R [illegible] (for [illegible]) d R [illegible]।
-After 33 R ins
[illegible]।

34 R om 34

36 b R [illegible]। R om 35 c 36 d

38 d R [illegible]। R om 39

40 For 33 R subst.
[illegible]।
[illegible] ॥

पीठशक्तय एताः स्युरथावरणदेवताः ।
समासेन प्रवक्ष्यामि देवतां तुल्यरूपिणीम् ॥ ४१

महाकालरतां माद्यां महाप्रेतशिवोपरि ।
शिवाभिर्घोररावाभिः समन्ताद्दिक्षु वेष्टिताम् ॥ ४२

घोराट्टहासा मदिरापानव्याघूर्णलोचनाम् ।
स्मरन्पुष्पाञ्जलिं कुर्वन्नङ्गानि प्रयजेत्ततः ॥ ४३

पूर्वां दिशं समारभ्य षडस्रयन्त्रमध्यगे ।
काली कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम् ॥ ४४

विप्रचित्तामथ नवकोणेऽन्या नवरूपिणीः ।
उग्रामुग्रप्रभां दीप्तां नीलां पश्चाद्घनामपि ।
बलाकिकामथो मात्रां मुद्रां मित्रामपि क्रमात् ॥ ४५

सरोरुहाष्टपत्रेषु ललितेषु यथाक्रमम् ।
ब्राह्मी नारायणी माहेश्वरी चामुण्डिकामपि ॥ ४६

कौमारीमीशां पश्चादर्चयेदपराजिताम् ।
वाराही नारसिंही च वसुसङ्ख्या वसुप्रदाः ॥ ४७

अथो भूपुरेरेखासु शोभनीषु समन्ततः ।
भैरवीञ्च महाभैरवीमथो सिंहभैरवीम् ॥ ४८

धूम्रभैरविका भीमभैरवीमुन्मनादिकाम् ।
वशीकरणपूर्वा च मोहनाद्यामत परम् ॥ ४९

दिगधीशान्हेतियुतानर्चयेत्साधकोत्तम ।
एवमाराधिता काली सिद्धा भवति मन्त्रिण ॥ ५०

कृत्वा पुरा पुरश्चर्यामाचार्येणानुमोदित ।
प्रयोगान्तन्त्रमार्गोक्तान्कल्पयेत्कल्पितार्थदान् ॥ ५१

अ युत्तम साधकाना साधुसाधितसाधन ।
आत्मनोऽन्यस्य सर्वार्थजातमातनुतेऽचिरात् ॥ ५२

निन्दा प्रहास कौटिल्य द्वेष रोष जुगुप्सनम् ।
रहस्यभेदन मानहानि ताडनतर्जने ॥ ५३

दुरुदन्त दुरालाप दुरेहा दुर्निरीक्षणम् ।
दु स्थिति दुर्नय दु खाऽऽरोपण मर्मघाटणम् ॥ ५४

आक्षेपमुग्रवचनमनास्तिक्यमनादरम् ।
यदीच्छेत्सिद्धिमतुला स्त्रीभ्य एतद्विवर्जयेत् ॥ ५५

एवमाचारवान्मन्त्री पुरश्चरणसिद्धये ।
प्रकुर्वीत धृतोत्साहो होमब्राह्मणभोजने ॥ ५६

शिवाबलिमुखान्सर्वान्बलीन्सम्यक्समर्पयेत् ।
पूजान्ते साधकोत्तमो भुनक्ति विपुल यश ॥ ५७

आदीप्य दीपान्परितो घृततैलसमन्वितान् ।
कुङ्कुमागरुकस्तूरीचन्दनैरर्चयेच्छिवाम् ॥ ५८

सहस्रनामपाठादि कुर्यात्स्वगुरुशिक्षया ।
सुवासिन्य कुमार्यश्च बटुक गणनायकम् ॥ ५९

सिद्ध्यै यतमनोवृत्तिर्भावभक्तिसमन्वित ।
समर्चयेत्सममतिरेतान्सिद्धिप्रदायकान् ॥ ६०

---

[48] R cm 48 ab
[49] R cm 49 66

रात्रर्धमिते सदैव समये ध्यानप्रसक्तो नरो
यो मन्त्रं परमं पठन्ध्वजनालाप हठाद्वर्जयन् ।
भूशाय्यासनसंस्थितो ललनया नानाविलासैर्लल्लन्
काल्या स [स] वलयलनावशुभदा प्रौढा कटाक्षक्रमान् ॥ ६१

ध्यायेद्वामोर्ध्वहस्ते परिकलितमसिं मुण्डमस्य तताऽधो
हस्ते भाति यस्या प्रवरभयहर दक्षिणाभ्यां वहन्ताम् ।
म याद्यादिलसत्कोटिप्रतिभटविकसद्दाविर्ति कालरामा
कालीं भालाग्रचन्द्रां सुललितरसना दिव्यभूषावृताङ्गीम् ॥ ६२

इ थ ध्यात्वलुरमा विगलितकवरीं कालिका वारवामा
कालातीता कलाढ्या नवरसमन्मुखी कृष्णवेषा सुभूषाम् ।
कृत्वा वार्ता निशाङ्के जपति मनुवर सर्वसिद्धाश्वराणा
मीशत्व याति तत्र वस्यति सतत स वरा सत्यसद्व ॥ ६३

होमद्रव्यैरपारैः परमरसपरा वह्निमध्यऽतिरेव
मन्त्रं जल्पन्पवित्र गतविषयरतिर्यो जुहोति प्रकामम् ।
नानाभावाविशेषानतुगमति कविर्भव्यरम्यऽनुरूपान्
नि शेष दापजात परिहरति रतिं याति कालिकमाया ॥ ६४

निद्रा वामपि तद्विकामपहर मुद्रा दधानोऽधिक
प्रेम्णा सान्द्ररूपामृताद्रहृदयाभासरमतान्विताम् ।
भक्त्या पूरितमानस सरमस त्यक्त्वासौ नान्स
पूजायां स कवि प्रगल्भकलिकासाम्रा यमामृच्छति ॥ ६५

इत्थ कालामहत्त्व कथितमिह मया तत्त्वभूत मुनीनां
योगीन्द्राणा यतानामहितुजनुषा भूसुराणां सुराणाम् ।
अथ वक्ष्यामि विश्वविकल्पहर योगिन श्रीशिवस्य
प्रौढ पुण्य चरित्र रुचिरविरचया मा द्विजन्द्रा शृणुध्वम् ॥ ६६

रुद्रतनुपुराणे सूर्यवंशे अध्याय रुद्रवाय समाप्त ॥

कुरण्टकै कुरवकै॰ कदम्बैर्देवदारुभिः ।
कन्दैर्मूलै॰ फलै॰ पुष्पैः पल्लवैरङ्कुरैश्चिता ॥ ११

आम्रैराम्रातकैर्निम्बैर्निचुलैर्वञ्जुलैः पुनः ।
मन्दारै॰ पारिजातैश्च वटाश्वत्थार्जुनैरपि ।
कार्णिकारैः सकरनैर्मधूकै॰ सीनुनीलुकैः ॥

बिल्वैर्भल्लानकैः सीताफलै रामफलैरथ ।
अनानसैश्च रम्भाभिः क्रमुकैर्नारिकेरकैः ॥ १४

खर्जूरैश्चन्दनै रक्तचन्दनैः कृष्णचन्दनैः ।
सुगन्धापूर्णदिक्प्रान्तप्रौढकेसरभूभरैः ॥ १५

पलाशैर्नव्यलतिकाकलितैर्ललितैर्दलैः ।
ब्राह्मीभिरक्षैशीभिर्विविधैश्च शिरीषकैः ॥ १६

अलङ्कृता मतिमता मनोभिमतदायिनी ।
वर्तते त्रिपथातीरे मन्दमारुतवीजिते ॥ १७

तस्या महासिद्धिधर॰ सर्वसिद्धजनप्रियः ।
पठन्वेदान्यायदुक सर्वशास्त्रार्थपारगः ॥ १८

अथर्वणरहस्यज्ञ प्रज्ञावान्प्राज्ञसम्मत ।
जनयन्दोषदमन जनानां स्वीयदर्शनैः ॥ १९

ब्रह्मश्रियावृतो दान्त शान्त॰ क्षान्त॰ शुचिरिमन॰ ।
ऊर्ध्वरेता ब्रह्मचर्यचर्यानानार्यपूजित॰ ॥ २०

---

[11] R cm 11

[12] c R कदम्ब [म्बै]र्कणिकारैश्च । –After 12 R ins
करवैर्बदरीवृन्दै श्रीरैर्धात्रपीलुकैः ।
वधुरैश्चन्दनै रक्तचन्दनै कृष्ट[ष्ण]चन्दनै ।
पानरपैरनेकैश्च वनस्पतिगणैरपि ॥

[13] R cm 13 15

[16] R cm 16 c 17 b

[18] After 18 ab R inserts
तत्रमा भानुमरसाधनुर्मुग इवापर ।
c R वेदान्पठन (for पठन्वेदान्)

[19] c R दोषनाशनो (for °दमनं)

[20] b R भगवान (for शुचिर्स्मित) –d R नानार्षगम्मत (for °पूजित)

धृतव्रतिव्रतस्तीव्रसाधितानन्तसाधनः ।
आर्याभक्तो व्यक्तमनिर्भन्त्रयन्त्रप्रवर्तकः ॥ २१

महासत्त्वोऽतिगम्भीरस्तत्त्वचित्तनदर्शकः ।
दूष्यतिथ्यः स्फारशिष्यो निर्दूष्यो दोषवर्जितः ॥ २२

अध्यात्मरक्तो सद्भक्तस्त्यक्तसङ्गोऽपि भक्तदः ।
अष्टागयोगकुशलो वृती सुश्रुतिमानितः ॥ २३

निर्वाणपदवीकाङ्क्षाकाङ्क्षको महलक्षकः ।
चतुःषष्टिकलावेत्ता ज्ञानविज्ञानपारगः ॥ २४

पद्मासनस्थितो दक्षः श्वेतयज्ञोपवीतकः ।
श्वेतोत्तरीयकः श्वेतकुसुमप्रीतः सिताम्बरः ॥ २५

श्वेतानुलेपलिप्ताङ्गः श्वेतासनसमास्थितः ।
शिवयोः सामरस्यानि चित्ते समनुभावयन् ॥ २६

अक्षोभ्यैः स्वकृपापाङ्गैरुद्धरन्देशिकव्रजान् ।
अनुग्रहाय जगतां विग्रही वन शङ्करः ॥ २७

अभ्रान्तो भ्रान्तिसहर्ता [विश्वनि ?] भ्रमणक्रम ।
दक्षिणामूर्तिरूपेण भ्रमन्सम्भ्रमसम्भृत ॥ २८

जगत्या सत्यसुलभः सुभगः सत्यसश्रयः ।
सत्यव्रतः सत्यनपाः सत्यवाक्यविशारदः ॥ २९

---

[21] R cm 21 ab

[22] R cm 22 cd

[23] a R साधूना (for सद्भक्तम्) -b R सम्मन. सुजनप्रिय. ।
d R नि सङ्गो निर्मम. कृती ।

[24] ab R निर्वाणपदवीमिच्छन्बद्धपद्मासन सुधी ।

[25] R cm. 25 ab For 25 cd R ins
शुक्लाम्बरधर शुक्लचन्दनेनानुलेपित ।

[26] R cm 26 ab -d R समनुचिन्तयन् (for °भावयन्)
-After 26 R ins
कृपाकटाक्षविक्षेपैरुद्धरन् शिष्यमण्डलम् ।

[27] R cm 27 ab

[28] ab R भ्रमन्गुरुस्वरूपेण जगत्यां सत्यमधर ।
R cm 28 c 29 b

[29] d R सत्यवाक्यपरायण. ।

स्वभ्रूभङ्गाक्षेपलीलापरिप्लुष्टाहिताबलिः ।
अहन्तारहितो साही बालोन्मत्तपिशाचवत् ॥ ४१

वैराग्यपरिपूर्णोऽपि महासौभाग्यदायकः ।
दुर्भाग्यदमनोपायो गङ्गाम्भ इव भासुरः ॥ ४२

कृतार्थः सिद्धिकामाना प्रणामनियमोज्ज्वलः ।
परापेक्षणपरः परब्रह्मस्वरूपवित् ॥ ४३

कश्चित्सिद्धः समुद्रश्री सर्वेषा श्रुतिमागतः ।
आसीदासीमपर्णीवन्ये मुक्तिवल्लभः ॥ ४४

शिवयोगी नाम कश्चिद्ब्राह्मणः कोङ्कणोद्भवः ।
करहाटस्फुटमतिर्निर्घनगर्भारनिस्वनः ॥ ४५

निशम्य तस्य सिद्धस्य चरितं परमाद्भुतम् ।
हित्वा कोङ्कणकं देश तं देशं समुपाययौ ॥ ४६

तत्र गत्वाऽथ स दृष्ट्वा स्पृष्ट्वा पादसरोरुहे ।
बद्धाञ्जलिपुटोऽतिप्रश्रयाणुर्लीलामपाहरन् ॥ ४७

सिद्धेन सोऽथ सम्पृष्टः नामग्रहणपूर्वकम् ।
ग्रामगोत्रे महोदग्रे श्रावयामास सम्भ्रमात् ॥ ४८

शिवयोगी श्रावयित्वा कुलशीलादिकं स्वकम् ।
गुरुणेनाद्भुत सिद्ध वरयामास सुव्रत ॥ ४९

अतेवामिनमायान्तमन्ते वस्तु सुरक्षणम् ।
सामग्री समु[दमु] तत्रान्तेवासाय विचक्षण ॥ ५०

---

41 a R [illegible] -d R [illegible]
42 d R [illegible]
43 R cm 43 cd
44 After 44 ab R ins
[illegible]
-d R [illegible] (for मुक्तिवल्लभ)
45 a R [illegible] (for कोङ्कणोद्भव) -R cm 45 cd
46 d R [illegible] (for [illegible])
47 R cm 47 a 49 b
49 c R गुरुणेनाद्भुतं (for [illegible])
50 ab R [illegible] R cm 50 cd

अथ सिद्धैर्महासिद्धैरनेकैः परिवारितः ।
पुण्याहं वाचयित्वाऽऽशु वाद्यघोषपुरस्सरम् ॥ ६३

कौशेयेन नवीनेन बन्धयित्वा विलोचने ।
रहस्यानीय तं शिष्यं योगिनं शिवयोगिनम् ॥ ६४

अध्वपट्टमथाशोध्य सिद्धः शास्त्रोक्तमार्गतः ।
दिव्यलक्षणसंयुक्तं दीक्षापट्टमकल्पयत् ॥ ६५

तीव्रवेधमयीं दीक्षां सप्तमीमाचरत्ततः ।
यथा शिष्यस्य सर्वत्र दिव्यभावः प्रजायते ॥ ६६

अथो चक्रचतुर्द्वार्षु चतुर्दिक्ष्वन्तरे पुनः ।
बिन्दौ दलेषु वलयेषूक्तेषु समनुक्रमात् ॥ ६७

नानौषधिकाषमिश्रजलपूर्णान्मनोरमान् ।
संस्थितान्कलशान्गृह्य पूर्वपूर्वक्रमादरात् ॥ ६८

अस्नापयन्मन्त्रपूतैस्तोयैस्तीर्थालिजृम्भितैः ।
पूर्वाम्नायभवान्मन्त्रान्पवित्रान्मन्त्रगोपितान् ॥ ६९

योगिने कथयामास कर्णे सार्थरहस्यकान् ।
स सिद्धः सर्वसिद्धानां प्रथमो गोरखो यथा ॥ ७०

आहृत्य दक्षिणान्कुम्भान्दक्षिणाम्नायजान्मनून् ।
स्नपयन्कथयामास दत्तात्रेय इव ज्वलन् ॥ ७१

पश्चिमाम्नायसम्भूतान्मन्त्रान्स्माधिप्रकाशयन् ।
अभिषिञ्चन् पाश्चिमकैः कलशैः शिष्यवल्लभम् ॥ ७२

---

[63] ab R अध्वपट्टं विशोध्याशु स सिद्धः सिद्धसम्मतः ।

[64] cd R शिवस्य स्वीयशिष्यत्वदीक्षापट्टं विधाय च ।

[65] R cm 65

[66] b R सप्तमा पर्यकल्पयत् । -R cm 66 c 69 b

[69] cd R पूर्वाम्नायमथोषार्यं पूर्वकुम्भे सुशोभने ।

[70] R cm 70 ab

[71] b R दक्षिणाम्नायमुत्तमम् । -d R इवापर (for इव ज्वलन्)

[72] For 72 R subst
पाश्चिमान्कलशान्गृह्य पश्चिमाम्नायजान्मनून् ।
अभिषिञ्चन्कथयत्तथा रैवतको यथा ॥

तत्र सत्त्वर. सत्त्वमाराध्य शुचिस्मित ।
इत्थमाज्ञापयामास सिद्धो रैवतको यथा ॥ ७३

तथोत्तरान्घटान्गृह्योत्तराम्नायविचक्षण: ।
अवोवदत्कर्णमूले शिष्यस्य वडवाल्वत् ॥ ७४

त्रिन्द्वन्तराल्गै कैश्चित्पीयूषौषधिपूरितै. ।
कलशै: स्नपयामास कथयामास सुव्रत: ॥ ७५

अत्यूर्ध्वगतिदं कश्चिदूर्ध्वाम्नायं महाफलम् ।
प्रथित सर्वसिद्धेषु सिद्धो नागार्जुनो यथा ॥ ७६

त्रिन्दुमध्यगतं कुम्भ नवरत्नविराजितम् ॥ ७७

नवपल्लवसङ्कीर्णं नवौषधिरसावृतम् ।
नानामञ्जरिकाकीर्णं नवपुष्पसमाकुलम् ॥ ७८

कुङ्कुमागरुकस्तूरीमृगनाभिसमर्चितम् ।
धूपित विविधैर्गन्धै रक्तचन्दनचर्चितम् ॥ ७९

अष्टगन्धमयैर्गन्धैर्लेपित परिलोलितम् ।
पिष्टैतैश्चारुसीमन्तचूर्णैराचीर्णमन्तरा ॥ ८०

एलालवङ्गकर्पूरपूगकङ्कोलसङ्कुलम् ।
ताम्बूलीदलखर्जूरीनारिकेरफलावृतम् ।
रक्तकौशेयवसन रक्तमाल्यविभूषितम् ॥ ८१

स्वहस्ते कलश गृह्य [धृत्वा] प्रशस्ते सिद्धनायक: ।
कृपाकटाक्षभरितो ललितो गुणसम्पदा ॥ ८२

नेति नेतीति नेतीति यत्पर श्रुतयो जगु ।
अनुत्तर तमाम्नायमभिषेक प्रकल्पयन् ॥ ८३

व्यादिदेश प्रसन्नात्मा कर्णमूले सुशोभने ।
शिष्यस्य गिरिजानाथो हयग्रीवस्य यादृशम् ॥ ८४

---

73 R cm 73 82

83 1 b R वदन् (for जगु) -d R शिववचिजगाद स ।

84 R cm 84

पूर्णदीक्षां विधायेत्थमागमोक्तेन वर्त्मना ।
साम्प्रदायं स्वकं प्रोच्य दृष्टिबन्धं विसृज्य च ॥ ८५

निजक्रमागतं कञ्चिद्गुरुक्रममथादिशत् ।
येन शिष्यस्य परमा सिद्धिर्भवति नान्यथा ॥ ८६

आद्य तद्दिननाथार्णं गृहीत्वातिमनोरमम् ।
चकार निजशिष्यस्य नाम सम्भ्रमपूर्वकम् ॥ ८७

तेन दीक्षाप्रभावेण स शिवो ब्राह्मणाग्रणीः ।
योगीति ख्यातिमगमत्सिद्धिपारमुपागतः ॥ ८८

शिवयोगी ततस्तत्र बहुकालं गुरोर्गृहे ।
वसन्नाल्हादयामास ससेवाभिविधक्रमैः ॥ ८९

आराधयन्महोदारसेवाभिर्गुरुमञ्जसा ।
शिवयोगी मुनिश्रेष्ठः सिद्धिं काम्यप्युपालभत् ॥ ९०

प्रसन्नचेताः सततं जपन्ध्यायन्स्तुवन्नमन् ।
सिद्धस्य चरितं चित्रं शिवयोगी पपाठ सः ॥ ९१

इत्थं भक्तिभरं पश्यन्स सिद्धः शिवयोगिनः ।
आज्ञापयामास चिरं ब्रह्मचर्यव्रतञ्चर ॥ ९२

पाणिग्रहं कञ्चिदपि मा कुरुष्व व्रतेच्छया ।
शिष्यत्वेन नराधीश योगिन्मा वृणु सर्वथा ॥ ९३

---

87 a R आद्यतद्दा[द्रा]रनाथाण[र्णं] । -cd R शिष्यस्य कल्पयामास स सिद्धो नाम सम्भ्रमात् ।

89 cd R तोषयामास त्वविवत्तस्य प्रियतमान्परान् ।

90 For 90 R subst
प्रगल्भोदारसेवाभिराराध्यगुरुमादरात् ।
अन्भच्छिवयोगी स सिद्धिं काम्पमपि सुव्रत ॥

91 c R विविन् (for चित्र)

92 a R ज्ञात्वा (for पश्यन्)

योगी स सिद्धस्य वचो निशम्य
प्रणम्य पादौ परिलभ्य भव्यम् ।
सङ्कल्पवाक्य सरल करिष्ये
ययावथो याम्यदिश व्रतार्था ॥ ९४

विद्योतद्ब्रह्मवर्चा परिचरिततपा भावयन्मन्त्रजात
पश्यन् क्षेत्राणि नानारसभरभरित पर्यटन्तीर्थपङ्क्ती ।
प्रेम्णा शृङ्गारपुर्यां व्यचरदयमठीं कोङ्कणकूरदेशे
वस्तु योगी प्रसिद्धस्तदनु नुतगुण सन्निवासञ्चकार ॥ ९५

इत्यनुपुराणे सूर्यवंशे निवासकरपरमानन्दाश्रमदेवदत्तोद्भवगोविन्दतीर्थप्रकाशितायामनेका ध्यायसाधितायां शुभलक्षणलक्षितायां शिवपुराणान्तर्गतायामशानवरणे अध्याय ॥ ४ ॥

---

[94] R cm 94 bcd

[95] a R विद्योतद्वह्निवचा (for °ब्रह्मवर्चा)

After 95 R inserts

मदाज्ञया त्रिपुरजित् तव पुत्रो भविष्यति ।
भूभारस्यापि सहारं करिष्यति न सशय ॥ ७५
तारयिष्यति भूदेवान् दु खपङ्कादतन्द्रित ।
मदायष्यति दुर्घोषान् निर्वैरान्स्थापयिष्यति ॥ ७६
रक्षयिष्यति धेनूनां गणान् यवनहस्तत ।
श्रीकृष्ण इव तपस्वी वधूरानन्दयिष्यति ॥ ७७
संस्थापयिष्यति मुदा धर्मं शमसमन्वित ।
आह्लादयिष्यति धनै सूरकाङ्कणनागरान् ॥ ७८
धुरन्धरान्राजकृत्ये नवीनान्कल्पयिष्यति ।
स्वपूजाया जनाभक्ति धरिष्यति न संशय ॥ ७९
सौरान् शाक्तान् गाणपत्यान् शैवानाववर्तयिष्यति ।
अर्चनं बालकृष्णस्य प्रेम्णा परिचरिष्यति ॥ ८०
तान्त्रि साम महामायो बहुकार्यं चरिष्यति ।
आचारिष्यति सौम्य समवन्छत्राधिपत्यनाम् ॥ ८१
निरन्तरं वनऽतीव पावप्यंधर्मर्गिष्यति ।
स्वमतेनैव सर्वाणि कार्याण्याकल्पयिष्यति ॥ ८२
महानन्दभरान्नित्य सदैव विहरिष्यति ।
वारयिष्यत्यरिष्टानि दूरादेव गतस्पृह ॥ ८३
अत पुत्रार्थं राजेन्द्र चिन्ता मा कुरु काञ्चित् ॥

कोङ्गरस्थवच श्रु ना मत्तास्ते दशनामिन ।
भङ्क्तु मठं तस्य कश्चिदुदतिष्ठ-क्लेर्बलात् ॥ ४१

तत्र गत्वाऽथ त वाक्य तापस शिवयोगिनम् ।
जगदम्बाप्रभावेण मोहमेव समाव्रजन् ॥ ४२

कश्चि प्रचलचित्ताशा पुरो भूय समावदन् ।
भोजनोपचित्र किञ्चिदहि नो चेद्विनश्यसि ॥ ४३

इत्यारय तो वचन कुत्सनेद्रूक्षमण्डितम् ।
ज्ञात्वा नभञ्जुस्ते मठ्या जपोर्के शिवयोगिनि ॥ ४४

दन्ता कटकटायन्त साटोप मदगर्विता ।
उत्तोल्य परशून्केचित्प्रहर्तुमुपचक्रमु ॥ ४५

अमु समस्त वृत्तान्त नाश्रृणोच्छिष्यदच्युत ।
ध्यानस्तिमितनेत्र स सस्मार त्रिपुराम्बिकाम् ॥ ४५

आ यहस्तगत वाक्य गुरु शिष्यत्वरान्वित ।
कश्चिद्विमोचय मन्त्रविद्या स्वामि इन्द्रजालिकीम् ॥ ४६

सिद्धवद्दर्शयामास शृणुत द्विजनायका ।
करेण यष्टिका गृह्य वञ्जुलस्य मनोरमाम् ॥ ४७

त्रिर्गेम भ्रामयामास दर्शयन्निजलाघवम् ।
वञ्जुलभ्रमणा सर्वे निर्यगन्ति ताहर ॥ ४८

स्थाणुबद्धा इव मुनेर्[जै]र्गुणै परमदारुणा ।
प्रनि प्रतीक्ष्मगमस्तम्भस्तया सुदुस्तर ॥ ४९

तन उद्यकुशु सर्वे दीनास्या दानभाषिण ।
मुधापराद्धमस्माभिर्योगिनो मन्दबुद्धिभि ॥ ५०

अथ मध्याह्नसमये जाते लीनविहङ्गमे ।
कोटरेषु विशालेषु वृक्षाणा परमादरात् ॥ ५१

माहिषा[प]षु वराहेषु ख पु ग्वड्गु]च गजेषु च ।
चमराषु नदीतीरे निचरसु सुशीतल ॥ ५२

देवतार्चनसक्तेषु सर्वेषु गृहचारिषु ।
सराश्रयेषु धुमणिवरतप्तेषु केवलम् ॥ ५५

विसृज्य ध्यानमखिलं शिवयोगी महामतिः ।
अपश्यदतिहर्षेण समस्तानाततायिनः ॥ ५६

ध्यानं विमुच्यापचितिं समाप्य जपपूर्विकाम् ।
प्रफुल्लनयनो योगी स्वमठी समलोकत ॥ ५७

ततस्ते वीक्षितास्तेन योगिना दशनामिनः ।
आबद्धबाहुयुगलाः पश्चात्तिर्यगधोऽर्वनैः ॥ ५८

स्वशिष्यमब्रवीद्योगी कस्येदं मन्त्रलाघवम् ।
ब्रात्यसन्यासिनः केन निबद्धा भुजमण्डले ॥ ५९

एतेषामपराधः को भुजदण्डनिबन्धनम् ।
लब्धं वद कथयतात्युच्चैर्ब्रात्ययतीश्वरैः ॥ ६०

छात्रमध्याच्छात्रनेता कश्चित्प्रथमवर्णिकः ।
निवेदयामास धियं व्रात्यानां दुष्टचेतसाम् ॥ ६१

निशम्य सकलं तेषां व्रात्यानां दुष्टचेष्टितम् ।
प्रत्यक्षकरुणामूर्तिः कृपया कामप्ययातनात् ॥ ६२

विमोचयेमानधुना स्वकर्मफलभोगिनः ।
अवोचदित्थं शिष्याय विनीतायामितात्मने ॥ ६३

शिष्यस्ततः शक्रजालमखिलं परिनिर्मितम् ।
चकर्त वाञ्छुलीं यष्टिं भ्रामयन्ननुलोमतः ॥ ६३

बाहुबन्धनतो मुक्ता व्रात्या गर्वावियोगिनः ।
विनेनुः प्रणतिं भूयः शिवयोगिपदाम्बुजे ॥ ६४

शिवयोगी तत्र सोऽथ करुणाकृष्टमानसः ।
लेपायाम [उपायन] मनोहारि प्रददौ प्रणयावृतः ॥ ६५

यथानथमयो जग्मुर्विस्रब्धा दशनामिनः ।
अखर्वगर्वगलिता दलिता इव तेजसा ॥ ६६

उन्मुक्तबाहुबन्धेषु गतेषु दशनामिषु ।
पप्रथेऽस्य प्रभा भूयस्तरां श्रीशिवयोगिनः ॥ ६७

ततो जनाः कोङ्कणस्था भीता योगीन्द्रतेजसा ।
चमत्कारं समाख्यामुः स्तुतिभिर्वावलम्बिरे ॥ ६८

इत्थं निशम्य वचनं स यतिस्तं दयान्वितः ।
निजगाद बटो सर्वं कथयाम्यहमादरात् ॥ १५

इत्थमाकर्ण्य तद्वाक्यं स बटुस्त्वरयान्वित ।
शिष्यस्तत्त महाप्रेम्णा ववन्दे पादपङ्कजे ॥ १६

अहं शिष्योऽस्मि दासोऽस्मि भक्तोऽस्मि तव सुव्रत ।
इत्यात्पयतिश्रेष्ठ वरिष्ठगुणमण्डितम् ॥ १७

शिष्यत्वेन नतं तं स वरयित्वा यतिस्तदा ।
स्वमठीं प्रापयामास दिव्यभावविनोदिनीम् ॥ १८

अकुण्ठोत्कण्ठया वीत स बटुस्तदनन्तरम् ।
मठीमटन्मठपते कार्यजातममन्यत ॥ १९

अनल्पा बटुर्विद्यामविद्याङ्कुरभञ्जिनीम् ।
समभ्यस्य समुदितख्याति कतिपयैर्दिनैः ॥ २०

अभ्यस्तेषु समस्तेषु सार्थेषु मनुपूर्वकै ।
मुदमाप बटौ तस्मिन्स भिक्षु प्रविचक्षण ॥ २१

सरहस्या समभ्यस्य बटुर्विद्या यतीश्वरात् ।
समर्प्य दक्षिणा काञ्चिदेशकालानुरूपिणीम् ॥ २२

ससेव्य विविधोपायैर्गतापायैर्निरन्तरम् ।
स्वदेशदर्शनाकाङ्क्षी जग्राहाज्ञा हताग्रह ॥ २३

अदादाज्ञामथ गुरुराशीर्भिरभिनन्द्य तम् ।
विविधाभिरनेकाभिर्ललिताभिर्निरन्तरम् ॥ २४

गृहीताज्ञा मठपतेर्हित्वा वाराणसी पुरीम् ।
स्व देशमगमद्वेगान्मनोमारुतरंहसा ॥ २५

गणेशनामा स बटुर्यदा कोङ्कणमागत ।
तदा स्फीति समभवत्प्रशस्या तस्य भूतले ॥ २६

अशृण्वन्सकला लोका विद्यासामर्थ्यमञ्जसा ।
ततोऽभवद्गणेशस्य सततं मानदायका ॥ २७

आदौ गन्धाक्षतापाद्यासनाद्यानुपचारकान् ।
ददौ समाजेषु जनो गणेशाय द्विजातिनाम् ॥ २८

इत्थं प्रसिद्धिं सर्वत्र गणेशस्य यदाऽभवत् ।
शम्भुराजस्तमाकर्ण्य सदस्यत्वेऽनुमन्यत ॥ २९

क्षितिपतिकुलचूडारत्नभूतः प्रभूत
द्विजवरकुलदाता शासिता दुर्जनानाम् ।
शिवनरपतिसूनुः सभ्यतां प्रापयित्वा
बुधगणवररत्नं तं गणेशं ननन्द ॥ ३०

इत्यनुपुराणे सूर्यवंशे निवासकरपरमानन्दात्मजदेवदत्तेश्वरप्रकाशितायां शिवपुराणा न्तर्गतायामनेकाध्यायसाधितायां संहितायामशान्तरणेऽध्यायः ॥ ६ ॥

कवीन्द्र उवाच ।

श्रीशृङ्गारपुरे कश्चिच्चन्द्रवंशसमुद्भवः ।
अभूत्प्रभूतमहिमा राजारामनृपाधिपः ॥ १

सूर्यराज इति ख्यातः स्वबाहुबलदर्पितः ।
सहायास्तस्य चाभवन् शिवस्का क्षत्रियर्षभाः ॥ २

तेषामुपाध्यायवरः केशवो द्विजनायकः ।
उपाध्यायाभिधां बिभ्रन् देशे कोङ्कणके चिरम् ॥ ३

समस्तकार्यजातानि वसिष्ठ इव साधयन् ।
मध्येसभं गीष्पतिवद्विहरन्साधुभाषिणे ॥ ४

आवभासेतरां विप्रवृन्देषु गुणसम्पदा ।
दर्पाद्रुपतिपदवीमधिरूढः प्रकल्पयन् ॥ ५

श्रीमान्पण्डितराजो यः शिवराजप्रियङ्करः ।
रघुनाथ इति ख्यातो विद्यासागरपारगः ॥ ६

अश्रृणोद्विप्रमुख्येभ्यः सर्वलक्षणलक्षितम् ।
तं सर्वगुणसम्पन्नं केशवं ब्राह्मणर्षभम् ॥ ७

ततः कतिपयाहोभिः सूर्यराजसमन्विताः ।
शिवस्काः शिवराजेन स्वापत्ताः गौरवाञ्चिताः ॥ ८

रघुनाथस्ततो वेगात्केशवं विप्रपुङ्गवम् ।
गताश्रयं गतस्थानं गतगेहं गतश्रियम् ॥ ९

गलितार्चाकर्क भ्रष्टविभ्रम जातसाध्वसम्।
स्वहस्तस्तवे प्रणया स्थापयामास सादरम् ॥ १०

पण्डितताना गुणध्वसाद्विप्राणा मानखण्डनात्।
उपमर्दी ऋषी द्राणा गणराना प्रहासत ॥ ११

रघुनाथ क्षयाविष्टो विशिष्टोऽपि धरातले।
प्रययावतिवेगेन दिदृक्षुरमरावतीम् ॥ १२

तथैव शिवराजोऽपि सर्वलोकशिवङ्कर ।
असर्पदतिवेगेन द्रष्टु कैलासनायकम् ॥ १३

अथो साम्राज्यपदवीं परकुञ्जरगृञ्जन ।
शिवराजात्मजो भेजे शम्भुराजो गुणोज्ज्वल ॥ १४

तत केशवभट्टेन लब्धा पण्डितराजता।
पूर्वोपाध्यायपदवी त्यक्ता जीर्णवधूरिव ॥ १५

त्यक्तामर्षो धृतोत्कर्ष प्रहर्षपरिभूषित ।
केशव प्रीणयामास विप्रान् शम्भुसभागतान् ॥ १६

केषाञ्चिदग्रहाराणि दापयामास लाघवात्।
वर्षाशनानि केषाञ्चित्कारयामास सुव्रत ॥ १७

महाषोडशदानानि व्रतानि विविधानि च।
प्रदर्शयामास मुदा शम्भुभूपाय धीमते ॥ १८

अधर्मखण्डन धर्मस्थापन नियतव्रत ।
केशवो रचयामास हस्तन नृपतेर्मुहु ॥ १९

नीतिशास्त्राण्यशेषाणि दर्शयित्वा नरेश्वर।
नीतिं सस्थापयामास शाश्वतीं धरणीतले ॥ २०

यच्च समभव सर्वं दु साध्यमधिभूतलम्।
साधयामास तत्सर्वं मन्त्रैर्वेदसमुद्भवै ॥ २१

प्रसन्नवदनोऽधिक लक्षितलक्षणो दक्षिण
प्रवृद्धधिषणो महाविदिनसर्वतन्त्रज ।
अभूत्प्रियसखो गुणै शिवनृपात्मजस्योच्चै
विचित्रचरितावलि विरचयन् सदा केशव ॥ २२

यत्काल्याः शिवयोगिनो यदतुलं श्रीमद्गणेशस्य यद्
यच्छ्रीकेशवशर्मणस्त्रिभुवने माहात्म्यमन्यादृशम् ।
तत्सर्वं कथितं मया नृपतिना पुत्रेहया साधितं
यद्यत्कर्म तदेव भो बुधगण ! वक्ष्याम्यथो सम्भ्रमैः ॥ २३

इत्यनुपुराणे सूर्यवंशे निवासकरपरमानन्दात्मजदेवदत्तोद्धवप्रकाशितायामध्यायशतसाधितायां शिवपुराणान्तर्गतायां संहितायां केशवभट्टमाहात्म्यनिरूपणं नाम अध्यायः ॥ ७ ॥

सुरत्राणीयसैन्यास्तथा
सर्वत्र प्रथितप्रशस्तयशसा पृथ्वीतले पार्थिवः ।
श्रीमच्छाहसुवंशमण्डनमणेरद्धा शिरस्याधुना
किं वक्तव्यमतो नु शौर्यमसुरैरेकाङ्किताङ्किता ॥ ४७

छत्रं रायगिरौ धृतं धृतिमता सिंहासनं साधितं
शत्रूणां शमनं कृतं सुबहुशो म्लेच्छाः क्षयं प्रापिताः ।
आबाल्याच्छिवमातृभक्तिरतुला सम्यक्समासादिता
तस्यैवोग्रबलेन सर्वजगतीसाम्राज्यमासादितम् ॥ ४८

तस्यानेकनरेन्द्रसेवितपदद्वन्द्वस्य निर्द्वन्द्वस
द्वावाबोधमयी मयीति सुखदा शक्तिः शुभाऽसौ पुरा ।
पीयूषा शकलेन कल्पकतरोर्वल्लीव जन्मान्तरे
रत्नं रत्नपुरेश्वरस्य भवति प्राकन्यराज्यं परम् ॥ ४९

एव स्नेहप्रस्फुरणादुत्तरोत्तरवर्धिष्णुतावलनादेव दिनदर्शनमपि नूतनमिवाकलनादुभयोर्भूयस्तरामतिदु सहा वियोगसहिष्णुता समजनि । तस्यातिशयितस्नेहासङ्गानुषङ्गाससक्तचेतस : कादि : कालीति शक्ती स्त इति निगमागमप्रतिपादितोपासनामार्गप्रविष्टस्य पुरोहितपुत्रस्यास्यामेव जन्म गृहीया वान्यधर्माननुभवितुमिति भूय · कर्ममर्मसम्पादयित्री जन्मान्तरीयशर्मसम्पत्ति दात्री शोभमानगात्री कर्मवशसम्भवनिमित्तविधिनिर्मितैकविधिपात्री नानाविधपुण्यक्षेत्रपुरथ्यर्या परम्परासुवासनसत्पात्री सहैव प्रचचार । तमद्ययजन्मान ब्राह्मण तपोविघ्नमाचरामीति निर्बन्ध प्रार्थनापुर सर प्रसारितशुद्धाञ्जलिरनेकप्राकारिकपुण्यक्षेत्र प्रचलनशीलोऽपि दु शील : सुशील नामा परमप्रियान्वधि सदाशिवगण शृङ्गाररसासक्तयो : सुखोपविष्टयो : शिवयोर्नेत्रसञ्ज्ञामात्रवलमवलम्ब्याविष्कृतवैरिभाव प्रकटीकुर्वन् बहुश · प्रत्यूहपुञ्जै : पीडयति स्म । सोऽपि तमतिवञ्चयित्वैव कतिपयैरहोभिर्दर्शनमात्रेणैवानेकविधपापिजनसङ्घातसम्भारितजगदुद्धारकतापत्रयोन्मूलनान्वयार्थी कृतजगन्नाथनामधेयदारुब्रह्मस्वरूपिपुरुषोत्तमसन्निधानातिपुण्यवरपुरुषोत्तमक्षेत्रे पुण्यनक्षत्रे स्वर्लोकसोपानपरम्परासु सुखेनैव पदप्रक्षेपण निधिनिक्षेपणमिव स्वय स्वीचकार । तद्वार्ताश्रवणनिरसितसर्वाङ्गवृत्तिनिश्चेष्टपुत्त्रिकेव राजपुत्रिका तत्पुत्रपरिष्वङ्गसुख लेलिहानेव तयाभिभूता त्रिगुणात्मिका तनु द्वित्रिदिनैरेव तत्याज । इत्य सम्प्रदर्शितकथाकलापवृत्त्या शिवराजाभिधा प्राप्तस्य सुशीलनाम्न : सयीति नाम विशिष्टायां हैहयवशभूमिपतेरात्मजाया लब्धसम्बन्ध : * ।

---

* R ins after the above

मुनिद्व एव । अङ्कुरितवैरिभावविभावितात्वरणतया शम्भुसदा प्रविष्टस्य पुरोहितसूनो विभिद् वक्रिमभावे विभाव्यत पितु पुत्रस्य च । स्वस्ववामनानुबन्धानुबद्धसम्बन्धा अपि त्रय त्रिगुणात्मिका शरीरसम्पद मातुरेव सूचनामात्रप्रदर्शन विहितमत्र ग्रन्थविस्तरभयाद्विस्तरेणालम् ।

श्रीशम्भोश्चरणानुसेवनरतौ तौ दम्पती सर्वदा
यथाकाल उपागतान्बहुविधा सम्पूजयन्तौ गुरान् ।
प्रेमोद्रेकसुखैसुखैरनुदिन स्वर्गैरहोभिस्तयो
शम्भु प्रादुरभूत्सन शुभतर स्वाभीकुमारप्रभ ॥ २०
राज्ये वृद्धिमुपागत बहुतर शौर्य शिवेनार्जित
कीर्तिर्दिक्षु दशस्वपि प्रसरिता प्रत्यग्रभूतन्विका ।
शम्भारद्भुतविक्रमस्य विशद श्रीविक्रमार्कानुगे
विज्ञाते सकलैर्जनैरजनि तत् माहात्म्यमन्याश्रयम् ॥ २१

Section V

SAMBHAJI S PERFORMANCE OF A SACRIFICE

कवीन्द्र उवाच ।

समाकर्ण्य नृपश्रेष्ठ शिवयोगिप्रभाषितम् ।
ऋत्विग्वरैर्मन्त्रिमुख्यै प्रधानैरनुमोदित ॥ १

कर्तुं पुत्रेष्टिमुद्युक्तस्त्वरावान्शम्भुभूपति ।
आज्ञापयामास तदा सेवकानाशुकारिण ॥ २

आचार्य सम्भृताश्चर्यवाक्प्रपञ्चो विचक्षणे ।
प्रष्टव्यो यज्ञसामग्री केन वा क्रियतामिति ॥ ३

कथयिष्यति शास्त्रोक्तरीत्या यान् स पुरोहित ।
सम्भारान् यज्ञियास्तांस्तानानयध्वमितस्तत ॥ ४

वापीकूपतटाकाब्धिनदीनदजलान्यलम् ।
आहर्तव्यानि चतुरैर्मनोमारुतरहसा ॥ ५

इत्यादिश्य तथैवान्यान् सेवकान् व्यादिशन्नृप ।
आहूयन्ता द्विजश्रेष्ठा वरिष्ठगुणमण्डिता ॥ ७

शिल्पविद्यासु निष्णातान् शिल्पिनोऽनल्पलाघवान् ।
आनयध्वं समाहूय परीक्ष्य मतिविभ्रमे ॥ ८

इत्थं नरेन्द्रसन्दिष्टास्त्वरया वाक्यकारिण ।
कर्तुं कार्याण्यशेषाणि जग्मुर्हर्षपरिप्लुता ॥ ९

देशान् ग्रामान् पत्तनानि नगराण्याश्रमानपि ।
गत्वा समाह्वयामासुर्विप्रेन्द्रान् शम्भुसेवका ॥ १०

प्रथा स्वर्लोकाभिभवैर्हरन्तो विश्वकर्मण ।
आकारिता शिल्पिमुख्या प्रगल्भै शम्भुसेवकै ॥ ११

निशम्य कारणं सर्वे विप्रा सिद्धाश्च शिल्पिन ।
पुत्रैः पौत्रैः परिवृता शिष्यैश्च विधृतक्षणे ॥ १२

श्वेतोष्णीषा लसच्छ्वेतकञ्चुका श्वेतवासस ।
धौतदन्ताक्षता भाले समागच्छन्मुदान्विता ॥ १३

अथो दिग तादायाता ब्राह्मणा शास्त्रपारगा ।
दत्वा फल राजहस्ते निगद्य बहु भावुकम् ॥ १४

आदिष्टेषु नरेन्द्रेण पीठेषु विविशुस्तत ।
सम्पृष्टा कुशलप्रश्नै पाद्याद्यैरुपचारकै ॥ १५

प्रपूजिता सप्रणय साष्टाङ्गमभिवन्दिता ।
सर्वे सुमनसोऽभूवन् द्विजेन्द्रा शास्त्रपारगा ॥ १६

ज्ञात्वा तुष्टान् द्विजज्येष्ठाञ्श्रेष्ठवाञ् शम्भुभूपति ।
नत्वा निवेदयाञ्चक्रे स्वस्य कार्यमशेषत ॥ १७

शम्भुराज उवाच ।

पठितानि च शास्त्राणि श्रुतानि च पुन पुन ।
पुराणानि प्रदत्तानि दानानि विविधानि च ॥ १८

विजिता शत्रव सर्वे बान्धवा परिलालिता ।
सवर्धितानि मित्राणि सुहृद परिपालिता ॥ १९

वचा द्राणा महाकाव्यालापानमृतहारिण ।
आवर्ण्य लक्षश स्वर्णभारा दत्ता गजा हया ॥ २०

यज्ञा कृता बहुविधा दक्षिणाभिरलङ्कृता ।
आराधिता दत्तवरा कालीकालाङ्कसंस्थिता ॥ २१

आसेविताश्च गुरव पितरावपि पूजितौ ।
इदानीं कर्तुमुद्युक्त पुत्रेष्टिं स्वेष्टदायिनीम् ॥ २२

नानादेशपरिप्राप्ता ब्राह्मणाश्चरितव्रता ।
कुरुध्वमुरसाहाय्य वचसा मनसाऽधुना ॥ २३

एकाग्रमनसो भूत्वा परीक्षत धरातलम् ।
शिल्पिमुख्यान् पुरस्कृत्य मापयध्व प्रमाणत ॥ २४

इत्थ द्विजवर्या सर्वे व्यादिष्टा शिवसूनुना ।
पपराक्षुर्मापुश्च [परीक्ष्य मापयामासु] शास्त्रतो यज्ञभूमिकाम् ॥ २५

अनन्ताया मापिताया दिष्टे दिष्टज्ञसूचिते ।
नवा कल्पचमत्कारा शिल्पिनो मृष्टकुण्डला ॥ २६

यद्वत्त क्षितिपस्याज्ञा शिरसा नवमाल्यवत् ।
प्रसन्नमनस सर्वे पालितोपितवर्तुला ॥ २७

चतुर्द्वारनिशोभाढ्य चारुस्तम्भविराजितम् ।
देवदारुमयैर्दारुचयैरुपरिसाधितम् ॥ २८

नालैर्हरि मणिदलैराच्छादितमनेकधा ।
अतिशातलया शश्वच्छायया परिलक्षितम् ॥ २९

समानच नरप्रा तोच्छलत्पानाययन्त्रकम् ।
इतस्ततो निरचितजलकुण्डकदम्बकम् ॥ ३०

पुरत परमोदारसभया परिमण्डितम् ।
समभूमिभराक्रान्त प्रशस्तगुणगह्वरम् ॥ ३१

बहि प्रखलपानायप्रणालाभिर्मनोहरम् ।
मण्डप रचयामासुर्लोकलाचनतस्करम् ॥ ३२

घटित मण्डपे विप्रा सम्भ्रमाच्छम्भुभूमिपम् ।
ग ग पठि ग कल्याण श्लक्ष्ण वचनमब्रुवन् ॥ ३३

शिवामन महाराज शम्भा शम्भुकृपाङ्कुर ।
एकचित्ताग्रता ग गाऽस्मदाय वचन शृणु ॥ ३४

ब्राह्मणा ऊचु ।

परक्षिता महापायैर्गतापायैर्रसु गरा ।
पुत्रप्रदि फलदा यस्या भूयाप्रभ्रष्टसशया ॥ ३५

सिद्धिप्रदानि चिह्नानि वाक्षिता पथ कानिचित् ।
गाग सरसा पुरतो बालाना शुभभाषितम् ॥ ३६

सुवासिन्य कुमार्यश्च ब्राह्मणा पुष्पहस्तका ।
भारद्वाजादिका पुण्या पक्षिणश्च समाक्षिता ॥ ३७

विश्वस्ता स्वैरिणी काचिल्लक्षिता भव्यशंसिना ।
आयान्ती रूपम्हरा दृष्टा वारविलासिनी ॥ ३८

निरतानि मनाज्ञानि श्रुतानि शुभपक्षिणाम् ।
अस्थिखर्परपाषाणरहिता मिश्रिता धरा ॥ ३९

शाधने मुनिभिर्यादृक्पुराणे परिवर्णिता ।
यथा पङ्क्तिरथस्यासाधज्ञे प्रानजनप्रिया ॥ ४०

सिद्धि सिद्धि सिद्धिरिति दनदूतन भाषिना ।
श्रुना तरिश्वादस्माभि साश्वादिन सरस्वती ॥ ४१

देवदुन्दुभिनिर्घोषो विश्रुतो गगनान्तरे ।
निरीक्षिता पुष्पवृष्टिः पतन्ती व्योममण्डपात् ॥
आकर्णितं कम्रराग गान गन्धर्वकल्पितम् ।
इत्यादिभिर्भव्यचिह्नैः सिद्धिर्हस्ततलागता ॥ ४२
गिरिजायाः प्रसादेन ब्राह्मणानां विशेषतः ।
अतोऽहि शम्भुराजेन्द्र त्वमस्मात् सत्यवादिनः ॥ ४३

कणाद उवाच ।

निशम्य वचनं तेषां विप्राणां नृपनायकः ।
सत्पुत्रसम्भवाकाङ्क्षी हर्षो वर्षमुपागमत् ॥ ४४
निजगाद वचः किञ्चिद्भूरिभावार्थसम्भृतम् ।
वशिष्ठादीन् मुनिवरानजो रघुसुतो यथा ॥ ४५

शम्भुराज उवाच ।

यद्भवद्भिर्निगदितं तत्तथैव भविष्यति ।
इत्थं सम्भाष्य सोऽपि राजा विश्वम्भरामरान् ॥ ४६
पूजयामास विधिवद्दानमानासनादिभिः ।
आभूषणैः स्वर्णमणिघटितैरम्बरैरपि ॥ ४७
एतस्मिन्नन्तरे सर्वे शिल्पिनाऽनल्पबुद्धयः ।
महाध्वजं महाच्छायं परितो बद्धतोरणम् ॥ ४८
कुण्डैर्यथार्हैर्विराजितं स्थण्डिलैर्निर्मितैरपि ।
वेदिकाभिः परिवृतं तुङ्गाट्टविराजितम् ॥ ४९
अपर्यं शाविताना(?)न्त दशरिश्मु प्रमाणतः ।
रञ्जितं रङ्गमल्लाभिः शोभनीभिरितस्ततः ॥ ५०
आबद्धकाण्डपटकं चारुचन्द्रकमण्डितम् ।
रत्नस्तम्भसमीतस्तम्भमण्डलभासुरम् ॥ ५१
मुक्तामणिमयैर्गुच्छैराचितान्तरमन्तरा ।
अन्तर्गनपर्यन्ते रचितं समलङ्कृतम् ॥ ५२
हेममुक्ताकल्पिताभिर्जालिकाभिः समावृतम् ।
पातपटलमयान्तरदगलन्मसम्भृतम् ॥ ५३

इक्षुभिर्बहुभिर्वृद्धैर्रहन्त श्रियमुन्नताम् ।
फलैर्लम्बद्भिरपारि विभान्त रुचिपूरितै ॥ ५४

सौवर्णैरथ दौर्वर्णैस्ताम्रपित्तलनिर्मितै ।
द्वारोपान्तेषु विन्यस्तै पूर्णकुम्भै परिप्लुतम् ॥ ५५

पुन्नागमल्लिकाजातीपुष्पमालाविभूषितम् ।
निबद्धाभिर्मञ्जराभिर्जनमानसरञ्जकम् ॥ ५६

प्रवालकान्तिरिपुभि कोमलैर्नवपल्लवै ।
विद्योतमानमाबद्धैस्त्रिजगन्मोहनक्षमम् ॥ ५७

कृत निवेदयामासुर्मण्डप विनयान्विता ।
नत्वा पादाब्जयुगले भूपायामिततेजसे ॥ ५८

शिल्पिप्रजल्पितेऽनल्पचमत्कृतिविकल्पके ।
इत्थ श्रुते नरेन्द्रेण प्रदत्ता धनराशय ॥ ५९

पारितोषिकमालभ्य ननामु [नेमुस्ते] शम्भुभूमिपम् ।
शिल्पिन स्वकरौ बध्वा वारवार मुदान्विता ॥ ६०

याज्ञियानथ सम्भारान्समस्तानाशुकारिण ।
परिगृह्य समाजग्मु सर्वौषधिविमिश्रितान् ॥ ६१

आनयित्वा [आनाय्य च] समस्तेभ्यस्तीर्थेभ्य पावन वनम् ।
ववन्दुर्भूपचरणावथो केचन सेवका ॥ ६२

पुत्रजीवधनव्रात पुत्रोत्पत्तिफलप्रदम् ।
विचेत्यान्ये महाप्रेष्या आययु कार्यसाधका ॥ ६३

यद्यत्सम्भव सर्व याज्ञिय वस्तु भूतले ।
स्वीयैरनुचरैस्तत्तदानीत वीक्ष्य भूपति ॥ ६४

विविनाल् आलब्धोत्सवात् पल्लवपञ्च प्रकल्पितम् ।
विशिष्टदिष्टे दैवज्ञदिष्ट दिष्टमुपस्थितम् ॥ ६५

आहूय चारान् चतुराननचातुर्यहारिण ।
निमन्त्रणाय भूपाना प्रेषयामास सत्वर ॥ ६६

आहूता शम्भुराजेन राजान पृथुविक्रमा ।
दिदृक्षमाणा पुत्रेष्टि समाजग्मु स्वदेशत ॥ ६७

वणिग्जना बहुविधा विविधान्वस्तुसञ्चयान् ।
विक्रयार्थमुपाजग्मुर्महानन्दभरालसाः ॥ ६९

प्रशस्यलास्यलीलाभिर्भर्त्सयन्त्य सुराङ्गनाः ।
पिककण्ठ्यः कम्बुकण्ठ्यो वारमुख्याः समाययुः ॥ ७०

हसन्तस्तुम्बरोर्गान तथा विश्वावसोरपि ।
महोत्सवाय महते गायका शीघ्रमाययु. ॥ ७१

विनोदका नटा मल्ला विटा भाण्डा सुदूरत. ।
पुत्रेष्टि परमोत्साहैरायाता परिवीक्षितुम् ॥ ७२

पङ्ग्वन्धबधिरास्तत्र दीनाऽनाथगणाः परे ।
पाशैराशामयैर्बद्धा इवागत्य चकाशिरे ॥ ७३

आयातेषु समस्तेषु विप्रभूमीश्वरादिषु ।
यथायोग्यनिवासाय निल्यानददन्नृप ॥ ७४

दत्वा निवास सर्वेषा कृत्वार्चनमनन्तरम् ।
आह्लादयामास मुहुर्भोजनाच्छादनादिभि ॥ ७५

तत्र उदितरुचिर्नरेन्द्रचन्द्रो
बुधवरविप्रपुरोहितानुनीत ।
व्यरचयदतुला बनाधिवास
निजकुलमन्त्रिणि भारमाशु दत्वा ॥ ७६

वादित्राणां निनादो गगनगिरिगुहा पूरयन् दुन्दुभीना
घोषो भव्योक्तिशब्द. समधिसमभितः सस्थिताना प्रजानाम् ।
आलापो गायकाना ध्वनिरपि गणिकागीतज प्रादुरासीत्
क्षोणीन्द्रेणाधिवासे सुतजननकरे कल्पितेऽनल्पभावैः ॥ ७७

इत्यनुपुराणे सूर्यवशे निवामकरपरमानन्दात्मजदेवदत्तोद्भवगोविन्दकवीन्द्रप्रकाशिताया शुभलक्षणलक्षितायां शिवपुराणान्तर्गतायां सहितायां यज्ञसामग्रीसमुपलब्ध्य-धिवासो नाम अध्यायः ।

—

कवीन्द्र उवाच ।

कृत्वाधिवास पुत्रेष्ट्या सम्भ्रमेण सयीसुत ।
द्वितीयदिवसे प्रातर्मङ्गलस्नानभासुर' ॥ १

शुक्लवस्त्रावृतो विप्रपरीत. साधुमानित ।
पुण्याह वाचयित्वाशु गीतवादित्रनिस्वनै ॥ २

नान्दीमुखान् समाराध्य देवान् पितृगणानपि ।
आचार्यान् विनयात्नत्वा ध्यात्वा स्वाभीष्टदेवताम् ॥ ३

योगिनीमण्डल स्तुत्वा स्मृत्वा श्रीगुरुपादुकाम् ।
नित्यदानविधिं कृत्वा गृहीत्वा शिष्टसम्मतम् ॥ ४

प्रार्थयित्वा सिद्धगण मानयित्वा कुलाङ्गना ।
भावयित्वा कार्यसिद्धिं वर्जयित्वाऽहित वच ॥ ५

उग्रत्वमखिल हित्वा धुर दत्वा स्वमन्त्रिणि ।
ऋत्विजां वरण चक्रे राजा पङ्क्तिरथो यथा ॥ ६

सदस्याश्चानुमन्तारो होतार परिवीक्षका ।
उद्गातारश्च साध्वर्या वृतास्तेन चकाशिरे ॥ ७

उत्तमेषूत्तमा मध्या मध्यमेषु निवेशिता ।
नीचा नीचेषु कृत्येषु सत्कृत्य शिवसूनुना ॥ ८

अधिकारो नरेन्द्रेण यस्य योऽभू समर्पित ।
स तमेवाकरोत्तत्र गततन्द्रो गतालस ॥ ९

बालवृद्धातुरान्धानामनाथाना परिग्रह ।
कारितोऽधिकृतानुक्त्वा सयीपुत्रेण धीमता ॥ १०

तुहिनाद्रिसमाकारा एधुशाल्यन्नराशय ।
आसन् प्रकल्पितास्तत्र पुत्रेष्टिपरमोत्सवे ॥ ११

एकवर्णगवां दुग्धैर्मुग्धै समनुसाधितै ।
पायसै परिपूर्णानि भाण्डानि प्रचकाशिरे ॥ १२

पोलिकानामपूपाना वटकाना महाधरा ।
शष्कुल्याना पूरिकाणा लड्डुकाना विरेजिरे ॥ १३

नानापक्वान्नजातीनां भक्ष्याणां व्यञ्जनैः सह ।
पुञ्जाः पूर्णैर्नरैस्तत्र पूगशः परिकल्पिताः ॥ १४

गुडौदनानि चित्राणि कृशरान्नानि कानिचित् ।
समण्डा फेणिकास्तत्र विबभुः पर्वतोपमाः ॥ १५

घृतपक्वैस्तैलपक्वैर्मन्दाग्निपरिपाचितैः ।
पिष्टकैरभिसम्भूतास्तत्र भूरि शिलोच्चयाः ॥ १६

कचोरिकाश्चारुतरा वटिकश्चाणकोद्भवाः ।
कन्दमूलाङ्कुरफलैः पुष्पपल्लवकोरकैः ॥ १७

स्फुरद्रुचिभराः शाका लेह्यचोष्यसमन्विताः ।
जितखेदैस्तत्र सूदैः कृत्वा संस्थापिता बभुः ॥ १८

सिताघृतामृतदधिमधूनामतुला ह्रदाः ।
बभासुरिन्द्रस्य गृहे सुधाकुण्डचया यथा ॥ १९

इत्थमन्नानि सिद्धानि कृत्वा कृत्वा प्रतिक्षणम् ।
आयातेभ्यो याचकेभ्यो ददुरन्नाधिकारिणः ॥ २०

दीयतां दीयतां भूयो भुज्यतां भुज्यतामिति ।
स्फारः शब्दः प्रादुरभूत्सत्रे सर्वगुणोन्नते ॥ २१

गृह्यतामन्नं खाद्यञ्च त्यजध्वमवशिष्टकम् ।
सूपाधिकारिणः सर्वेऽब्रुवन् लिप्सार्थिनो द्विजान् ॥ २२

पेयं खाद्यं बहुविधं पीयतां खाद्यतामिति ।
दीयतां स्थीयतां तत्र शब्दो व्योम समास्पृशत् ॥ २३

दिवसे दिवसे तत्र ववृधे स महोत्सवः ।
यस्मिन्ननाथा दीनाश्च तुतुषुर्भोजनादिभिः ॥ २४

इत्थं कुर्वञ्शम्भुभूपो विप्राणां परिभोजनम् ।
आचार्यसम्मतो विप्राननुष्ठातुं समादिशत् ॥ २५

येन विघ्नस्य संहारः सद्यो भवति सर्वथा ।
कथयामास तं विप्रानादौ गणपतेर्जपम् ॥ २६

दुर्गाणि यस्यास्तरति नामोच्चारेण मानवः ।
दुर्गाया ब्राह्मणा मन्त्रं जजपुर्भूपनोदिताः ॥ २७

नमस्कारान्भास्करस्य कर्तुमारोग्यसिद्धये ।
ब्राह्मणान् ब्रह्मनिपुणान् राजेन्द्रो वरणीमदात् ॥ २८

अभिषेकं हरस्यापि चक्रुर्भूपाज्ञया द्विजा ।
येन सर्वेष्टससिद्धिर्भविष्यति न सशय ॥ २९

उपोषणानि श्रीविष्णो सतृष्णा शम्भुसिद्धये ।
आतन्वस्तत्वनिष्णाता सत्वव्रतो द्विजातय ॥ ३०

नवग्रहाणा परमान्मन्त्रान्मान्त्रिकसत्तमा ।
भूपप्रदिष्टा प्राजपन् पुत्रेष्टिफलदायकान् ॥ ३१

अमङ्गलस्य विलयो मङ्गलस्य महोदय ।
येन त मङ्गल पुत्रहेतोर्विप्रा प्र[अ]पूजयन् ॥ ३२

ये ये देवा समभवन् वरदा शीघ्रसिद्धिदा ।
तास्तानाराधयामासुर्द्विजेन्द्रा सर्वसिद्धये ॥ ३३

अश्वत्थसेवन केचिद्ग्रामासेवन तथा ।
अकुर्वन् भूपसिध्यर्थं तुलसीपूजनादिकम् ॥ ३४

सहस्रनामस्तोत्राणि कवचान्यपि सिद्धये ।
अपठन् ब्राह्मणोत्तमा हसा इव सुनिर्मला ॥ ३५

अध स्वमस्तक केचिदूर्ध्वं पादसरोरुहे ।
कृत्वाऽतपन् भूपसिद्धिकामुका कामुका इव ॥ ३६

एकाशन केचिदपि परे नक्त प्रभोजनम् ।
धारण पारणमपि केचित्तोयप्रभक्षणम् ॥ ३७

फलादन केचिदपि केचित्पल्लवचर्वणम् ।
आहारमेके वातस्य भूपकार्यार्थमाचरन् ॥ ३८

परिवार्य करौ पृष्ठे व्युत्क्रमात्पदयोर्दृढम् ।
धृत्वाङ्गुष्ठौ बद्धपद्मासना सिद्धाश्च केचन ॥ ३९

पादौ व्युत्क्रमत केचित्स्कन्धमारोप्य सुव्रता ।
अतपन् राजकार्यार्थे सिद्धा स्वार्थे यथा पुरा ॥ ४०

दक्षाङ्गुष्ठे केचिदपि वामाङ्गुष्ठेऽथ कचन ।
अतिष्ठन् भानुवदनास्तपन्त शम्भुसिद्धये ॥ ४१

वामस्कन्धे वामपादं विधाय विधिवेदिनः ।
आकुर्वन् परमं केचिद्व्रतं श्रीशम्भुहेतवे ॥ ४२

दक्षपादं वाममूर्ध्नि दक्षमूर्ध्नि परं पदम् ।
वहन्तः केऽपि नियमं भूपार्थमथ तेनिरे ॥ ४३

एके दक्षं परे वामं बाहुयुग्ममथापरे ।
ऊर्ध्वं दधतः श्रीशम्भुकार्यार्थं व्रतमाचरन् ॥ ४४

निम्बूरसं शर्कराञ्च सायं सायं समागृणन् [समागिरन्] ।
इच्छन्तो भूपससिद्धिं तापसाः केचनोत्तमाः ॥ ४५

गुडोदकं केचिदपि द्राक्षाफलरसं परे ।
अन्ये दूर्वारसमपि निम्बपत्ररसान् परे ॥ ४६

गोमूत्रं गोमयं दुग्धं दधि तक्रञ्च केचन ।
पञ्चगव्यं माक्षिकञ्च काञ्जिकं घृतशर्कराम् ॥ ४७

खर्जूरं कण्टकिफलं पोलिका आम्रपोलिका ।
अक्रोडान्नारिकेरानि रम्याश्चारोलिका अपि ॥ ४८

बदराण्यैक्षवरसं भल्लातफलबीजकम् ।
रम्भाफलं जाम्बवानि नारिङ्गाण्यपि दाडिमम् ॥ ४९

शाकं कन्दं केचिदपि समश्नन्तो दिने दिने ।
तपांसि बहुधा चक्रुः श्रीशम्भोर्व्रतसिद्धये ॥ ५०

सर्वे नवीनवसना नवासनसमास्थिताः ।
नवीननिःस्वपात्रा उपपात्रविलासिनः ॥ ५१

रत्नाङ्गुलीयका रामाः स्फुरन्मकरकुण्डलाः ।
सरत्नवलया रत्नकेयूरावलिराजिताः ॥ ५२

गन्धाक्षताभिर्विलसल्ललाटाः शुद्धवृत्तयः ।
पुष्पमालालसत्कण्ठा ग्रैवेयकसमुज्ज्वलाः ॥ ५३

प्रत्यहं मङ्गलस्नाताघूर्णिरामलकोद्भवैः ।
महानन्दभरानेशभरिताः सिद्धिवाञ्छकाः ॥ ५४

घृता ये शम्भुराजेन कर्तुं जपमतन्द्रितम् ।
चित्रमण्डपे तत्र सूर्यप्रतिमवर्चसः ॥ ५५

अपरे भूसुरोत्तसा मुनिवन्नियतव्रता ।
रक्ताम्बरधरा सर्वे रक्तगन्धानुलेपना ॥ ५६

रक्तोत्तसा रक्तपुष्पमालावलिविराजिता ।
रक्तासनस्थिता रक्ताक्षता रक्तपरिच्छदा ॥ ५७

ताम्बूलापूरितमुखा कस्तूरीकेसराप्लुता ।
लस सुगन्धतैलौघाञ्चितदीर्घशिरोरुहा ॥ ५८

प्रसन्नमनसो द्योतन्मणिभूषणभूषिता ।
शुचिस्मिता शौचपरा पुरश्चर्याकृतश्रमा ॥ ५९

क्षुत्तृट्क्लमसहा प्रेद्धत्तेज पुञ्जमनोहरा ।
वीक्षितानन्तफलदानुष्ठाना निल शुक्रवत् ॥ ६०

कालिकाया मन्त्रजपमाचरश्चिरसौख्यदम् ।
येन सर्वेष्टससिद्धि प्रभूयान्नात्र सशय ॥ ६१

इत्थ व्रतानि कुर्वत्सु विप्रोत्तसेषु सर्वदा ।
चतुर्मण्डलसङ्ख्याक काल परमको ययौ ॥ ६२

अथैकस्मिन्दिने काली निशीथे परिपूजिता ।
मद्यैर्मांसै पायसाद्यैरन्नै सपिशितैरपि ॥ ६३

विविधैरुपहारैश्च फलैरुपवनोद्भवै ।
आराधिता नयवता शम्भुराजेन धीमता ॥ ६४

महते वरदानाय पुरस्तात्समुपस्थिता ।
दर्शयामास भूपाय स्वप्ने स्वा मूर्तिमञ्जसा ॥ ६५

चतुर्भुजा खड्गमुण्डवराभयविजृम्भिताम् ।
कालपन्नगसङ्काशवेणिकां चन्द्रभूषणाम् ॥ ६६

लससीमन्ततिलकां स्फुरत्कुङ्कुममण्डलाम् ।
मुक्ताहारमणिव्राते स्तनमेरुपरागिणीम् ॥ ६७

मुक्ताफलप्रतिस्पर्धिनासादण्डमनुत्तमाम् ।
अनर्घ्यरत्नखचितमणिकञ्चुकधारिणीम् ॥ ६८

स्वर्णतन्तुमयारक्तपट्टकूलविलासिनीम् ।
ऊर्णोत्तरीयधाना सुरभिचन्दनाम्बुजाम् ॥ ६९

कालीं समीक्ष्य क्षोणीन्द्र' प्रणनाम पदाम्बुजे ।
मनोरथ सिद्धमिति स्वक मेने दृढाशयः ॥ ७०

अतिष्ठदग्रजः स्वप्ने बध्वा स्वीय करद्वयम् ।
अप्रार्थयन्महोपायैरपायदलिनीं शिवाम् ॥ ७१

ततः सा कालिका देवी वरदानसमुद्यता ।
जगाद शम्भुराजेन्द्रमुचित रुचिर वच' ॥ ७२

काल्युवाच ।

अल जपैश्च विविधैर्व्रतैराचरितैरपि ।
तपोभिर्विप्रचितैर्नियमैरपरैरपि ॥ ७३

दानधर्मदयाभिश्च प्राख्यैर्विप्रभोजनैः ।
प्रसन्नाऽस्मि महाराज समापय महाव्रतम् ॥ ७४

पुरूप प्रतिपद्याह भविष्यामि सुतस्तव ।
भूभार सहरिष्यामि पालयिष्यामि भूसुरान् ॥ ७५

रक्षयिष्यामि धेनूना गणान् यवनहस्तत ।
अनाथास्तारयिष्यामि दु खपङ्कादिवानिशम् ॥ ७६

दुष्टान् संमर्दयिष्यामि स्थापयिष्यामि देवता' ।
धर्म सवर्धयिष्यामि हर्षयिष्यामि सुन्दरी ॥ ७८

नूतनान् कल्पयिष्यामि कार्यभारधुरन्धरान् ।
आह्लादयिष्यामि धनैर्ग्राम्यान् कोङ्कणजान्नरान् ॥ ७९

महाराष्ट्रोद्भवान् मध्यरीत्याविष्णामि भूतले ।
आनन्दयिष्यामि वधूवृन्द गोपपतिर्यथा ॥ ८०

स्वमतेनाचरिष्यामि राजधर्माननेकश. ।
स्वैरिणीनां जनपदे प्रदास्यामि महाभयम् ॥ ८१

अपराध जनक्वत क्षमिष्यामि गतस्मया ।
बहुकाल धरिष्यामि साम ताम्रदलाधिपे ॥ ८२

एकच्छत्र करिष्यामि साम्राज्य जगतीतले ।
पापर्द्धि सञ्चरिष्यामि सर्वकाले विशेषत' ॥ ८३

अत सुतार्थं राजेन्द्र चिन्ता मा कुरु कर्हिचित्।
स्वल्पैरहोभिस्तनयवदन द्रक्ष्यसि ध्रुवम् ॥ ८४

ततः कतिपयाहोभिर्महाकालो मम प्रिय ।
आकारयिष्यति मुदा त्वा स्वकीय स्थल प्रति ॥ ८५

इत्थ महावर दत्वा वराय शिवसूनवे।
अन्तर्हिता समभवन्महाकाली तदा क्षणात् ॥ ८६

शिवनरपतिसूनु· सूर्यतुल्यप्रतापो
वरमभिमतमुच्चै श्यामया सम्प्रदत्तम्।
अमृतमिव हृदब्जे श्लाघयित्वा तदानीं
समधिकमुदमापज्जागृतिं सन्दधान· ॥ ८७

इत्यनुपुराणे सूर्यवशे शिवासकरपरमानन्दात्मजदेवदत्तोद्भवगोविन्दकवीन्द्रप्रकाशितायामने-
काध्यायसाधिताया शुभलक्षणलक्षिताया शिवपुराणान्तर्गतायां सहिताया
कालीवरप्रदान नाम अध्याय ।

कवीन्द्र उवाच ।

एतस्मिन्समये देवा पुरस्कृत्य चतुर्मुखम् ।
वैकुण्ठवासिन देव वीक्षितु समुपाव्रजन् ॥ १

क्षीराम्भोनिधिमध्यस्थे कल्पद्रुमवनान्तरे ।
रत्नपल्यङ्कवद्घेरपृष्ठे स्वापपरायणम् ॥ २

निबद्धहस्तपद्मेन गरुडेनानुसेवितम् ।
विष्वक्सेनेन परितः स्तवगृतानिब मुहु ॥ ३

सम्मर्दयन्त्या पादाब्ज सप्रेमकलिताङ्घ्रिकम् ।
अङ्के स्वके कमलया लसन्त वनमालया ॥ ४

शङ्ख चक्र गदां पद्म चतुर्भि· करपङ्कजै· ।
वहन्त कौस्तुभोद्भासि वक्षस्तटमकल्मषम् ॥ ५

वैजयन्तीं नाम मालां दधन्त कण्ठदेशत· ।
अनर्घकुसुमस्थाम पीताम्बरयुगावृतम् ॥ ६

कस्तूरीतिलकभ्राजल्ललाटश्चारुलोचनम् ।
नवरत्नसमावीतमध्यसूत्रस्फुरत्त्विषम् ॥ ७

केयूरराजितभुजं वैष्णवैरभिशोभितम् ।
तुलसीदलमालाभिरभिमालिनमुन्नतम् ॥ ८

श्रीवत्साङ्कं श्रुतिलसन्मकराकृतिकुण्डलम् ।
वज्राङ्कुशध्वजसरोरुहचिह्नितपत्तलम् ॥ ९

चारुकण्ठं चारुनसं घोतद्गण्डमनोहरम् ।
स्मेरहास्यस्फुरद्गुल्लमनर्घ्यगुणमन्दिरम् ॥ १०

दीर्घस्कन्धं दीर्घबाहुं दीर्घवक्षस्तटावृतम् ।
नन्दकं शार्ङ्गं सशरं समीक्षन्तं प्रतिक्षणम् ॥ ११

पूर्णचन्द्रसमाभासवदनं सदनं श्रियः ।
मादिनीं रूपसम्पत्तिं दधानमभिमानिनम् ॥ १२

नाभिपङ्कजसञ्जातविधिं रम्योदरं वरम् ।
श्लिष्टजङ्घं सुन्दरोरुं मणिभासुरगुल्फकम् ॥ १३

नखज्योत्स्नाभिरधिकं हसन्तं रजनीपतिम् ।
प्रगल्भपरमोदारलक्षणं परमोज्ज्वलम् ॥ १४

स्तुतं फणीन्द्रराजेन स्वकीयैः सकलैर्मुखैः ।
चतुर्वेदस्तोत्ररतैर्मुनिभिः परिवारितम् ॥ १५

सिद्धैर्विद्याधरैः सर्वैः सततं समुपासितम् ।
देवर्षिभिर्नारदाद्यैराराधितमहर्निशम् ॥ १६

तुम्बुरुप्रमुखैः सर्वैर्गन्धर्वैर्गर्वकुञ्जरैः ।
रम्भाद्याभिः समस्ताभिरप्सरोभिरनारतम् ॥ १७

किन्नरीभिर्नागवधूगणैर्यक्षवधूगणैः ।
गीतं सङ्गीतमङ्गाभिस्त्रिकालं परमादरात् ॥ १८

बालार्ककोटिसुप्रमातस्करं कमलापतिम् ।
ददृशुः सकला देवा विधातृप्रमुखास्तदा ॥ १९

दृष्ट्वा मुकुन्दं प्रणतिमकुर्वन् सुरनायकाः ।
स्वखेदभारमखिलं कथयामासुरञ्जसा ॥ २०

देवा ऊचु ।

धरायामतिसम्बद्धा खलास्ताम्रा महाबला ।
गते स्वर्गं यदुपतौ समस्तभयभञ्जने ॥ २१

बौद्धावतारे परम ध्यानासक्ते निरन्तरम् ।
शिवराजे महाराजे गते रजतपर्वतम् ॥ २२

कुर्वन्ति पापसंवृद्धि प्रशस्तमददर्पिता ।
गाव क्षीणा द्विजा दीना व्रतिनो भग्नमानस ॥ २३

यतयो व्रतनिभ्रष्टा आश्रमस्था गताश्रमा ।
भङ्ग समस्तमूर्तीना यज्ञादीना परिक्षय ॥ २४

धर्मस्य निलयोऽत्रीत दानानामपि खण्डनम् ।
पुराणाना कथालापवार्ताया परिभञ्जनम् ॥ २५

खपुष्पत्कर्मरतिर्नति सन्नतिकन्नति ।
सिद्धाना सिद्धिरति क्षपिता वत पापिभि ॥ २६

उग्रावतार श्रीशम्भु सदा यज्ञपरायण ।
जपानुष्ठाननिरत समुपेक्षा तनोत्यलम् ॥ २७

दैत्यारे पुण्डरीकाक्ष गोविन्द गरुडध्वज ।
यथा धर्मस्य सस्था स्यात्त्वमुपाय विचिन्तय ॥ २८

त्वया मत्स्यावतारेण हत्वा शङ्ख महासुरम् ।
चत्वार प्रथिता वेदा आनीता मधुमर्दन ॥ २९

धृत्वा कूर्मतनु पृष्ठे मन्दरो विनिवेशित ।
विश्वम्भरापि विधृता कयाचिन्निजलीलया ॥ ३०

उत्तोल्य धरणीं दन्ते त्वमेक परमोज्ज्वल ।
बिभर्षि सौकरीं मूर्तिं नारायण नरोत्तम ॥ ३१

हिरण्यकशिपोर्वक्षस्तटीतटविपाटनम् ।
नृसिंहरूपमास्थाय मुकुन्द प्रतिपादितम् ॥ ३२

वामनीं मूर्तिमासाद्य त्रिभिर्विक्रमणे क्रमात् ।
त्रिलोकी सहसाऽऽक्रान्ता जनार्दन जगत्पते ॥ ३३

त्रि॰ सप्तकृत्वा जगतीपतयो निरर्थीकृताः ।
कुठारधारयातीव त्वया भार्गवमूर्तिना ॥ ३४

त्वया दाशरथीभूय प्रख्यातगुणसम्पदा ।
शरैरुग्रैर्विनिहतो रावणो लोकरावण ॥ ३५

हलेन सहसाकृष्य कालिन्दी परिभेदिता ।
त्वया त्रैलोक्यसारेण बलरामतनूभृता ॥ ३६

औपहास्य त्वया नीता॰ श्रुतयो बौद्धरूपिणा ।
वर्द्धिता॰ परमा बौद्धा द्विषन्तो ब्राह्मणर्षभान् ॥ ३७

तुरङ्गम समारुह्य निगृह्य यवनै॰ सह ।
भवान् कल्किस्वरूपेण कीर्ति काञ्चित् करिष्यसि ॥ ३८

ऊर्जस्वीनि स्वरूपाणि बिभर्षि कमलापते ।
बहूनि यै॰ समस्तानामानन्द परिवर्धने ॥ ३९

त्वमित्थ दुरितश्रेणीं मधुमर्दन सर्वदा ।
त्रयाणामपि लोकाना हरस्यतिकृपान्वित॰ ॥ ४०

हयीकेशाऽधुना तस्मात्त्वमेवास्मान् प्रपालय ।
लुप्तयज्ञक्रियारम्भापरिदीनमनोरथान् ॥ ४१

त्राण त्वत्तो विना विष्णो कोऽन्यो न प्रकरिष्यति ।
अतस्त्वामेव सम्प्राप्ता शरणङ्करणानिधे ॥ ४२

व्याप्तचराचरमिद मायया भवदीयया ।
त्रैलोक्य त्रिविधान् भावान् बिभर्षि हृदपद्ममान् ॥ ४३

अच्युतानन्त ह्स्मीश प्रसादसुमुखो भव ।
मग्नान् कष्टे जलानिधाविव शीघ्र समुद्धर ॥ ४४

इति सम्प्रार्थितो देवैर्माधवो वरदोऽभवत् ।
अनुकम्पासमावीतो गीर्वाणानग्निनायक॰ ॥ ४५

अवोचद्वचन शिखिवरान् वरसमुत्सुकान् ।
निष्पादयिष्यामि सुधा सुधेव सकलप्रियम् ॥ ४६

विष्णुरुवाच ।

तिष्यात्समुत्पन्नमिदं भय त्यजत निर्जरा: ।
अगण्यपुण्यचरितख्याते भृशबलान्वये ॥ ४७

शिरस्त्रकुलकन्याया राजसाया मनोरमे ।
जठरे मामकी माया पुरूपेण भविष्यति ॥ ४८

कार्य त्रिलोक्या परमप्रीत्या परिकरिष्यति ।
कृत्वा विचित्र चरित लोकानाह्लादयिष्यति ॥ ४९

दामोदरो वाक्यमित्थमुक्त्वा त्रिदिववासिन ।
विरराम महायोगी विसृज्य प्रणयान्वित. ॥ ५०

उपेन्द्रेण मुदा देवा विसृष्टा: कार्यमुन्नतम् ।
प्रतिज्ञाय प्रणम्याथ ययुर्वत यथातथम् ॥ ५१

गतेषु देवेषु निजस्थानानि मधुसूदन: ।
कमलासेवितपद· सुष्वापोरगनायके ॥ ५२

मनीषिण ऊचु ।

कवीन्द्र भवतो वाक्य विश्रुत परमाद्भुतम् ।
प्रतिज्ञात कालिकया पुरूपवरण यथा ॥ ५३

आद्या शक्ति: कथमिय जाता पुरुपरूपिणी ।
कुत्राऽपि पौरुपप्राप्तिर्न दृष्टा रमणीगणे ॥ ५४

इत्थमाकर्ण्य वचन कवीन्द्रो वाक्यकोविद ।
सानन्द कथयामास पण्डितान् श्रवणोन्मुखान् ॥ ५५

कवीन्द्र उवाच ।

एता युवतय. सय. पुरुपत्व प्रपेदिरे ।
मार्कण्डेयेन मुनिना पुराणे परिवर्णितम् ॥ ५६

नन्दगोपगृहे जाता यशोदागर्भसम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी ॥ ५७

इत्थमुक्त भगवता मृकण्डो विल सूनुना ।
तस्मादिय महामाया पुरूप प्रविरस्यति ॥ ५८

कथं पुरुषरूपत्वं यास्यतीति द्विजोत्तमाः ।
महामायात्र सन्देहं त्यजध्वमविलम्बितम् ॥ ५९

समुदितनवहर्षा निर्जराणामधीशा
मुररिपुमुखपद्माद्वाक्यमुच्चैर्निशम्य ।
स्वहितमतिविचित्रं भावयन्तः स्वचित्ते
समधिकमुदमापन्वर्जितानन्तशोकाः ॥ ६०

इत्यनुपुराणे सूर्यवंशे निरासकरपरमानन्दात्मजगोविन्दकवीन्द्रप्रकाशितायामनेकाध्याय-
साधिताया शिवपुराणान्तर्गतायामध्यायः ।

मनीषिण ऊचुः ।

काल्या प्रदर्शिते स्वप्ने राजा जागृतिमागतः ।
तदा यद्यत्कर्म चक्रे कवीन्द्र परिवर्णय ॥ १

कवीन्द्र उवाच ।

राजा जागरमासाद्य प्रातः प्राप्य सभान्तरम् ।
पुरोहितायाकथयत्स्वप्न परमहेतुकम् ॥ २

पुरोहितोऽपि तत्सर्वं निशम्य नृपभाषितम् ।
अवश्य भावि सकलं भाति कालीवचो यत. ॥ ३

जपयज्ञैस्तपोयज्ञैरलं निष्ठाप्रवर्तितैः ।
पूर्णाहुतिश्चर विभो महाराजकुमारक ॥ ४

इत्युक्तः शम्भुभूपालो गौरवेण पुरोधसा ।
कर्तुं पूर्णाहुतिमथोदतिष्ठत्परमासनात् ॥ ५

प्रतीक्ष्य होमभवन वीक्ष्य वह्निं समेधितम् ।
ब्राह्मणान् होमसंसक्तानपि सञ्जातसम्भ्रमः ॥ ६

मधैर्मांसैः सपिशितैः परमान्नविमिश्रितैः ।
एलालवङ्गकङ्कोलकर्पूरकमुकैरपि ॥ ७

जातीफलैर्नागरैरै रम्भाखर्जूरजैः फलैः ।
रसालैर्विविधैः खाद्यैरपूपैर्वटकैः सह ॥ ८

कुङ्कुमागरकस्तुरीसिन्दूरपटवासकै ।
स्फुरत्सुगन्धपटलैर्नानिधै कुसुमव्रजै ॥ ९

कौशेयै सिचयैरूर्णावस्त्रै सुन्दरकम्बलै ।
अपरैर्मिलितैर्वस्तुसञ्चयैर्नरनायक ॥ १०

घृतधाराभिरधिक स्नपयन्जातसारथिम् ।
चकार परमोदारा पूर्णाहुतिमतन्द्रित ॥ ११

पूर्णाहुतौ समाप्तायामाततान प्रभोजनम् ।
विप्राणा शम्भुराजेन्द्र प्रार्थनापूर्वक तदा ॥ १२

केपाञ्चित् प्रददौ ग्रामान् दक्षिणायै विचक्षण ।
तुरङ्गमान् गजेन्द्राश्च रथान् रत्नानि कानिचित् ॥ १३

अजानिक बहुधन शिबिका सुमनोहरा ।
सुखासनान्यश्वतरीरुष्ट्रान् गावस्समाहिषी ॥ १४

समीचीनानि वासासि भूषणानि सहस्रश ।
भाण्डानि बहुरूपाणि पात्राणि विविधानि च ॥ १५

ग्रैवेयकानि वल्यावल्यो रत्नमुद्रिका ।
काञ्चीललामप्राभृष्टकानि सदनान्यपि ॥ १६

दासीर्दासान् धान्यराशीन् कृषिक्षेत्राणि कानिचित् ।
समाददे राजसिंहो याचमानाय सर्वत ॥ १७

तथैव दशदानानि प्रख्यातानि नरेश्वर ।
प्रकल्पयामास मुदा स्वानुष्ठानप्रपूर्तये ॥ १८

महाषोडशदानानि यानिचित्परमादरात् ।
रचयामास राजेन्द्रचन्द्रो यज्ञप्रपूर्तये ॥ १९

इत्थ दानानि निभृत प्रददन् शम्भुभूपति ।
कल्पद्रुम इवालोकि लोकैर्लोकैर्महोत्सवे ॥ २०

इत्थ दान समुद्वीक्ष्य तत्र उच्चुकुशुर्जना ।
न ययातेर्न मान्धातुर्नृगस्य न वा निमे ॥ २१

न सृञ्जयस्य नैलस्य न दिलीपस्य नो शिबे ।
हरिश्चन्द्रस्य नानस्य न च रामस्य नो शिबे ॥ २२

उशीनरस्य राजर्षेर्गयस्य नहुषस्य च ।
न वाञ्छितोऽस्माभिरहो विश्रुत श्रवणेन वा ॥ २३

यावन्त पांसवो भूमेर्धारा मेघस्य यावती ।
आदादानानि तावन्ति द्विजेभ्यो राजसत्तम ॥ २४

यावन्त्य सिन्धुतीरषु वालुकाना परम्परा ।
यावन्तो धरणामध्य तृणानामपि सञ्चया ॥ २५

यावत्य स्वर्णशैलस्य शिला परमभासुरा ।
यावन्यो गगनप्रान्ते तारका परिसंस्थिता ॥ २६

माना करषु यावन्ताऽणव समुपबृंहिता ।
यावत्यस्तरुजाताना पल्लवावल्य स्मृता ॥ २७

यावन्त सागरजल संस्थिता यादसा व्रजा ।
तुषाराद्र समुदिता यावन्ता हिमजा कणा ॥ २८

कणा धान्यस्य यावन्ता धरणामधिजृम्भिता ।
तावतार्गा सुवर्णानि याचमानाय सर्वत ॥ २९

प्रददन् शम्भुराजन्द्रश्चिन्तामणिरिवापर ।
महासत्वे महादारे प्रवभावधिक श्रिया ॥ ३०

दत्वय दानमतुल तत श्रीशम्भुभूपति ।
स्वावासभूयमध्युचे सुहृन्मित्रसमन्वित ॥ ३१

निसर्जयामास मुदा द्विजेन्द्रान् स्वाश्रम प्रति ।
हर्षोत्कर्षसमावात स सद्य समजायत ॥ ३२

अथ विप्रषु यातषु पूर्णकामेषु दापनै ।
महानन्दभराविष्ट शिवराजा मसम्भव ॥ ३३

समाहूय नृपश्रेष्ठान् सभान्तरमलङ्कृतम् ।
आभूषयामास मृदुवासाभिर्मणिभूषणै ॥ ३४

अथ सर्वे नृपोत्तसा पूजिता शिवसूनुना ।
आभूषिता बहुविध यथातथमुपाययु ॥

यातेषु भूपमुख्येषु प्रजानामपि मण्डलम् ।
यथार्हं मानयामास श्रीमान् शम्भुनरेश्वर ॥ ३६

तथा मौला केचिदपि प्रधाना मन्त्रिनायका ।
मानिता विविधैर्मानैस्तदा भूपेन सादरम् ॥ ३७

दीनान्धबधिरा केचिदुत्सवार्थं समागता ।
तेऽपि सन्तोषितास्तेन क्षोणीन्द्रेण सुबुद्धिना ॥ ३८

महोत्सवे येन येन यद्यत्समनुयाचितम् ।
दत्तमासीत्तस्य शम्भुभूमीन्द्रेण महाधनम् ॥ ३९

इत्थ समाप्तिं सकलं यज्ञं नीत्वा नरेश्वर ।
यथाक्रम समानाय्यादरादृत्विग्वरोत्तमान् ॥ ४०

यस्य यद्यत्समभवद्वस्तु मानसमन्वितम् ।
तस्य तत्तत्करगतश्चकार परया मुदा ॥ ४१

गजान् तुरङ्गमानुष्ट्रान् रथानश्वतरीरपि ।
आवाह्य धनमारोप्यर्त्विज स्वान् गृहान् ययु ॥ ४२

ऋत्विजेषु समस्तेषु स्वान् गृहान् प्रस्थितेष्वलम् ।
शम्भुराजो महाराज शिवराजात्मज कृती ॥ ४३

वहन् स्वमूर्ध्नि परम श्वेतच्छत्र शशिप्रभम् ।
चामराभ्या वाज्यमान सुरराज इवापर ॥ ४४

मायूरव्यजनेनाऽपि सर्वत परिवीजित ।
अनेकसेवासुमुखै सेवकैरभिसेवित ॥ ४५

प्रसन्नवदनाम्भोजो नवाकल्पविराजित ।
मुक्ताजालै कृतोत्तसो मुक्ताकुण्डलमण्डित ॥ ४६

एकावलिं रत्नहार वहन् कण्ठे सुशोभने ।
हारमाणिक्यघटितकेयूरद्युतिबृंहित ॥ ४७

वक्ष स्थलाभिविलसत्पदक स्मरसुन्दर ।
रत्नानुवीतवलयद्वयशोभिकराम्बुज ॥ ४८

अनेकरत्नकलितकटिसूत्रमनोहर ।
दिव्याम्बरपरीधान पुष्पमालासमुज्ज्वल ॥ ४९

केशरेणानुलिप्ताङ्गो गन्धाक्षतविराजित ।
कस्तूरीतिलकभ्राजल्ललाटरुचिरञ्जित ॥ ५०

परिपूर्णानन्दभरो वैतालिकपरिप्लुत ।
